व्याप्यं गमकमित्याहुर्व्यापकं गम्यमेव च ॥
इति हेतुसाध्ययोर्लक्षणमिति ॥

[56] **आदिः—** ॥ ॐ ॥ नैयायिकदर्शने तावत् । प्रमाण १, प्रमेय २, संशय ३ ... ...

अन्तः— इति पञ्चदर्शनखण्डनम् ॥ ग्रंथाग्रम् २००॥
संवत् १५०३ वर्षे श्रावणसुदिपञ्चम्यां भौमवारे लिखितं समाप्तम् ॥ अजाहूर्यां ॥

[62] **अन्तः—** श्रीपूज्यश्रीश्रीश्रीश्रीश्रीश्रीइन्द्रनन्दिसूरिशिष्यप्रमोदनन्दिगणिना लिखितः ॥
श्रीअहम्मदाबादनगरे ॥ सं० १५५३ ॥

[67] **अन्तः—** ॥ लिखितं सकलकोविदकोटिकोटीरहीरपण्डितश्रीश्रीश्रीश्रीश्रीश्रीश्रीधीरविजयगणि-चरणसरसरसीरुहमरालबालपालनिखिललब्धवर्णलब्धप्रतिष्ठपण्डितश्रीश्रीश्रीश्रीश्रीश्री-श्रीलाभविजयगणिपदपयोजन्ममधुरवमधुव्रतगणिना वृद्धिविजयेन श्रीमेवातदेशे श्रीढूनिग्रामे राजराजिशिरोरत्नराजिनी(वि)राजितक्रमकमलयमलराजश्रीराजसिंह-विजयराज्ये । यदत्र लिखितं कूटं भवति तत्सज्जनैः संशोध्यम् ॥

(प्रान्ते-) संवति वियदम्बकर्षीन्दुमिते (१७२०) सहस्य सितसप्तमीतिथौ पीयूषमयूखवारे लिखितमदस्स(मस्य) विवरणम् । षड्दर्शनसमुच्चयपुस्तकम् ।
गणिना वृद्धिविजयेन निजाध्ययनहेतवे । सज्जनैश्चिरं वाच्य[मान]मिदमस्तु ॥
शिवमस्तु सकलसज्जनानाम् ।

[72] **सूचनम्—** (पत्राङ्क १३० अ पंक्तिः ९)

यद्यपि प्रतिज्ञादिषु पञ्चस्वयवशब्दः [१३० आ] सिद्धस्तथाप्यत्र समुदायापेक्षया तदेकदेशवचनो ग्राह्य इष्टार्थसंग्रहार्थमित्यर्थः । वामध्वजकृतं परिशिष्टटिप्पणकम् ॥ (एतदुल्लेखेनास्याः कृतेः शीर्षकं लेखकस्याभिधानमपि ज्ञायते ।)

(५२ अ) वार्त्तिकं कथमित्याशङ्क्याह यथाश्रुतं न कथमपि संगच्छत इति दर्शयति–दार्ष्टान्तिके इति ।

(५३ अ) ननु भाष्यवार्त्तिकोदाहरणोपेक्षा तद्व्याख्यानप्रवृत्तानां न युक्तेत्यत आह–तस्मादिति अपकर्षमात्रप्रदर्शनपरे भाष्यवार्तिके व्यापकाभिमतधर्मनिवृत्त्यसाध्ये सिसाधयिषितहेत्वोरन्यतरापकर्षसूचके इति तात्पर्यं न केवलमस्माकमेवमभिमतं वाचस्पतेरपि सम्मतमित्याह कार्यसमायास्त्विति ॥

(९४ अ) निराकरोति तदशिष्टमिति अशोभनमिति कृतेऽशोभनमित्यत आह–अनादेशिकत्वात् भाष्यकारादिभिरेवमव्याख्यात(९४ आ)त्वात् भाष्यकारादि-व्याख्यानमादेशः तदव्याख्यानमनादेश इति ।

(११७ आ) तदेवं भाष्यवार्तिकव्याख्यया सूत्रमेतन्न संगच्छते न चान्यद्व्याख्यानमस्ति अनुपलब्धिबाधितत्वात् – इति हृदि निधाय शङ्कते – तत्कथमेतदिति ॥

[73] **अन्तः—** सं० १५३३ वर्षे आषाढवदि ८ गुरुदिने । श्रीमद्गूणह(हि)ल्लपुरपत्तने श्रीपूर्णिमापक्षे भ० श्रीजयप्रभसूरिणा स्वयं मु० ज्ञसतिलकपठनार्थं लिलिषं(लेख) ।

[75] **आदिः—** देवदेवमभिवन्द्य शाश्वतं योगिवृन्दहृदयैकमन्दिरम् ।
वासुदेवविदुषा विरच्यते न्यायसारपदपञ्जिका परम् ॥१॥

अन्तः— इति चतुर्विंशतिजातयः ॥

[76] आदिः— ध्वंसितपरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरशर्मा प्रकाशयति ॥१॥
न्यायसिद्धान्तदीपोऽयं कथासु विजिगीषुभिः ।
धारणीयः प्रकाशाय सत्तर्कस्नेहसुप्रभः ॥२॥
(एतदन्तर्गतविषयसूचनमधो क्रियते—)
(३ आ) मङ्गलप्रकरणम् ॥ (६ आ) इति अन्धकारवादः ॥
(७ आ) इति कारणतावादः ॥ (८ आ) इति पदशक्तिवादः ॥
अथ शक्तिः । तत्र विप्रतिपत्तिः ॥ (१२ आ)मनस्त्वं परमाणुवृत्ति न वा ? - (१३ अ) इह शब्दस्य स्वातन्त्र्येण प्रामाण्यमनिच्छतोऽनुमानान्तर्भावेन प्रामाण्यमिच्छन्ति वैशेषिकादयः ... (१४ अ) अत्र कर्मतत्त्वज्ञानयोस्तुल्यबलत्वात् समुच्चयेनापवर्गकारणत्वमित्येके ... (१५ अ)इति ज्ञानकर्मसमुच्चयः ॥ अपवर्गः (१७ आ) इति संक्षेपः ॥ सिद्धार्थस्यानुभावकताया अभावात् तत्र संकेतग्रहो नास्ति– इति केषांचिन्मतम् ॥ ... (१८अ) इति सिद्धार्थवादः ॥ अन्विते शक्तिरित्यपि विचारणीयम् । ॥ (१८ अ) अन्वयशक्तिवादः ॥ १२ वायुः प्रत्यक्ष इत्येके ... ... (२० अ) इति संक्षेपः ॥ १३ निर्विकल्पे तावत् विप्रतिपत्तिः ... ... (२१ अ) इति निर्विकल्पवादः । १४ सुवर्णस्य तैजसत्वे किं मानम् ? ... ... (२५ अ) इति संक्षेपः ॥ पङ्कजादिपदानां योग एव इत्येके ... ... (२८ आ) इति योगरूढिः ॥ १६ ॥ इहानुमितौ लिङ्गस्य पक्षधर्मताप्रकारकं ... ... (३१ अ) ननु केयं व्याप्तिः ? ... (३५ अ) इति सर्वं चतुरस्रमिति ॥ १७ श्री ॥ प्रवृत्तिपरवाक्यश्रवणानन्तरं ... (४२ अ) इति विधिवादः ... (४३ अ) इत्यपूर्ववादः ॥ अन्यथाख्याते तावत् ... (४७ आ) इह अर्थापत्तिमनुमानातिरिक्तं प्रमाणमिति ... (४९ अ) इह प्राभाकराः शब्दस्य नित्यतामिच्छन्ति ... (५२ अ) इहेश्वरे परविप्रतिपत्त्या ... (५७ आ) अभावो भावत्वानाधिकरणं प्रमेयान्तरं ... ...

अन्तः— इति श्रीमहामहोपाध्यायश्रीशशधरकृतं प्रकरणं संपूर्णः(र्णम्) ॥
संवत् १६५० वर्षे फाल्गुणमासे कृष्णपक्षे द्वितीयादिने गुरुवासरे। बुरांन्हापु(पु)रे लिखितं । लेखककान्हांजी ॥

[77] अन्तः— इति श्रीमहामहोपाध्याय श्रीशशधरकृतं न्यायरत्नप्रकरणं शशधराख्यं समाप्तम् ॥
श्रीसंवत् अष्टादशाधिकषोडशशत(१६१८)तमे वर्षे शिशिरऋतौ माघे मासे शुक्लपक्षे नवम्यां तिथौ शुक्रवासरे एवंसमये सूक्ष्मजेन हीरनाम्ना स्वपठनार्थं तथा परार्थमलेख्यध्ययनसमये । (श्रीसंवत् इत्यादिकपाठोपरि हरतालो दत्तः । अत एव पठनेऽसौकर्यम्)

[79] आदिः— ॥ॐ॥ आचारस्य मूलं प्रवर्तकज्ञानं तस्य ज्ञानस्य विषयं निरूपयितुं भूमिमारचयति । ननु व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानं न व्याप्तिग्राहकं यतः

सहचारदर्शनाभावेऽपि ... ... फलेच्छा स्वरूपसत्येव प्रवर्तिका न तु तस्याः ज्ञानं एतादृशानुभवाभावात् ॥ इति वाचनाचार्यगुणरत्नगणिकृते शशधरटिप्पने विधिवादः ॥ (२३ अ) ... स्वर्गाव्यवहितपूर्ववृत्तित्वं नास्ति, तज्जन्यस्यापूर्वस्य स्वर्गाव्यवहितपूर्ववृत्तित्वं वर्तते तद्योगस्यैव पूर्ववृत्तित्वमिति यागकारणत्वमक्षतमिति ॥ वाचनाचार्यगुणरत्नगणिविरचिते शशधरटिप्पनेऽपूर्ववादः ॥ (३० अ)

... इष्टसाधनत्वानुमित्यपेक्षया गुरुभूत इति स न प्रवर्तक इति संक्षेपः । वाचनाचार्यगुणरत्नगणिविरचिते शशधरटिप्पनेऽन्यथाख्यातिवादः ॥

... सत्त्वसिद्धेः ये ये पक्षा वादिनां अर्थापत्तिकरणत्वे तेऽनया रीत्या खण्डनीयाः । वाचनाचार्यगुणरत्नगणिविरचिते शशधरटिप्पनेऽर्थापत्तिप्रकरणं संपूर्णम् ॥

[80] **अन्तः**— न्यायविद्याविदग्धस्य मीमांसापारदृश्वनः ।
कृतिर्वरदराजस्य विद्वत्सदसि राजते ॥ ६१ ॥
इति तार्किकरक्षा वरदराजकृता ॥ लिलिखाना देवकुलपाटके ॥

[85] **आदिः**— (पत्राङ्क ५३ (१५५) अप्रारभ्यतेऽधोलिखितसन्दर्भेण–)

...दृष्ट्वा मुनिनोक्तं नेदं साधनं न दूषणं यदि नैवं क्रियते । तत्पश्य मेऽक्षं पाद इति तत्तेन पादे प्रदर्शि तेन पुरजिता साधुवादो दत्तस्ततः प्रभृत्येव चासौ-अक्षपाद इति प्रतीत इत्याहुः । सरस्वतीबाल्हदीवसाधवः । किमर्थमित्थं प्ररोचनया प्रवर्त्यत इत्यत्राह–सरसेति । ... ...

(तस्मिन्नेव पत्रे मध्यभागे) साकारज्ञानस्य प्रमाणत्वं विज्ञानवादनिरासप्रसंगे निरशिष्यत इत्युक्ते संस्कृते किं सौत्रान्तिकैर्बाह्यवादेपि नैते तस्य प्रमाणत्वमित्यत्राह–अर्थस्तु साकारेत्यादि । ...

एवमुयुक्तात्मेन्द्रियादिजन्यमेवार्थप्रकाशाख्यं फलं न तु तज्जन्यपरोक्षव्यापारजन्यं तच्च गुणात्मकमर्थविषयं ज्ञानान्तरप्रत्यक्षमात्मगतं ज्ञानं ... ...

(तस्मिन्नेव पत्रे–) ज्ञानान्तरोत्पादे तदपि प्रत्यक्षं तत्प्रत्यक्षस्वभावत्वात् ज्ञानान्तरस्य । ज्ञेयप्रकाशस्वरूपो हि विज्ञानेन प्रकाशात्मेति निर्णेष्यते । विनियोक्तीति एतेषु लिङ्गवाक्यप्रकरणस्थानसमाख्यारूपेषु प्रमाणेषु सत्सु एतत्प्रमाणनिमित्ता श्रुतिविनियोजिकाभिप्रेतालिङ्गाद्यथा बर्हिर्देवसदनं दामीति । ...

पत्राङ्क ५४ (१५६)अ—

मतेन श्रुतार्थापत्तिं दूषयित्वा प्राभाकरमतेनापि तां दूषयितुमाह—प्राभाकरास्त्वित्यादि । वाक्यभेदप्रसंगेनाह ... .

(पत्राङ्क ५५ (१५७)आ– यदि नोपेयते श्रुतार्थापत्तिस्तर्हि लिङ्गादिना कथं विनियोजकत्वमित्यत्राह–नियोगगर्भत्वादिति ।... (पत्राङ्क ५५ (१५७)अ–विरुद्धव्याप्तोपलब्धिर्यथेति । भूतस्य जातस्यापि पदार्थस्य विनाशो न ध्रुवभावी अवश्यंभावी अवश्यंभावस्य निषेधस्य विरुद्धोऽनवश्यंभावस्तेन व्याप्तं वस्त्रे रागादौ...(पत्राङ्क ५५ (१५७)अ–आचार्यमते पञ्च ज्ञानानि प्रथममालो-

चनज्ञानमेतदेव बोच्यते तज्जातीयत्वज्ञानं ततः सुखसाधनत्वानुस्मृतिरनन्तरं परामर्शस्तेनानुमीयते सुखसाधनसामर्थ्यं सहकारिणः धर्मादेः... (पत्राङ्क ५६ (१५८)अ- कथं प्रत्यक्षफलमीमांसके भाष्ये संगस्यत इति चोदिते दत्तमुत्तरं...... (पत्राङ्क ५६ (१५८)अ अन्तिमपङ्क्तिः-) प्रत्यक्षं तदोपादानबुद्धिफलत्वं वर्णितं भाष्ये प्रत्यक्षतयेति । तथाहि–जगद्वैचित्र्यानुमितसकलकार्यसाधारणधर्म्माधर्म्मातिरिक्तस्वरूपस्य ॥

[87] **सूचनम्**— अस्ति महाविद्यादशश्लोकी मुद्रिता गायकवाडप्राच्यग्रन्थावल्यां द्वादशतमे पुस्तके १५५ तमे पृष्ठे । भुवनसुन्दरकृतटिप्पणसहितं च विवरणं तस्मिन्नेव पुस्तके १५६ तमे पृष्ठे मुद्रितम् ।

[90] **अन्तः**— संवत् १६७९ वर्षे मार्गशीर्षवदि ४ बुधे लिखितम् । गुर्जरमंडलाधिष्ठितमित्रवल्लीकृतवसतिव्याशागा(?)सुत–उधवेनात्मपठनार्थं काश्यामलेखि ॥

[92] **अन्तः**— स्वस्ति श्रीसंवत् १६५० वर्षे शाके प्रवर्त्तमाने ज्येष्ठवदिसप्तमी सोमे लिखितम् ॥

[95] **अन्तः**— संवत् १६५० वर्षे कार्तिकमासे शुक्लपक्षे पंचमी ५ भृगौ लिखितम् ॥

स्वस्तिश्रीमत्खानदेशे ब्रह्मपुरवरे पातसाह इदीलसाहराज्ये श्रीपूर्णिमापक्षे सुश्रावकैः साहकुंअरजीकेन साहमेघजी-साहकाहजीसहितै[न] साहडुंगरसा० महिराजप्रमुखैः लिखाप्य चिंतामणिसूत्रपुस्तकं श्रीपूर्णिमापक्षोद्द्योतकराणां श्रीविद्याप्रभसूरीणां शिष्याणां श्रीललितप्रभसूरीणां सपरिकराणां प्रदत्तं चिरं जीयात् वाच्यमानं शुभं भूयात् ॥

[99] **अन्तः**— (प्रतिरधोलिखितशब्दैः समाप्यते–) भवानन्दीका कारकविवेचने पंडित हुर शास्त्रीजीनै दीनी सं० १८९९ द्वि० चैत्र वदि १४ । न्यायचन्द्रिकारी पुस्तकरा पत्राणि १५ बालकृष्ण शास्त्रीरा जवाईनै दीनाइ जो० वनजी सं० १८९९ । चैत्र वदि ८ द्वितीयकभौमे ।

[101] **अन्तः**— इति गदाधरभट्टाचार्यविरचितः शक्तिवादः समाप्तः–संपूर्णः ॥

संवत् १९४३ ना वर्षे चैत्रमासे शुक्लपक्षे एकादशमी चन्द्रवासरे ग्रन्थ पुरो करो छे, लिपि कृत्वा क्षत्री बुलाखिदास गणपतरांमः रेहेवासी अमदावाद ताजपुर वैराईमातनी पोलमां रहे छे पण वडोदरामां लख्यो छे पठनार्थम् ।

[104] **आदिः**— अधीत्य रुचिदत्तेन जयदेवाज्जगद्गुरोः ।
चिंतामणौ ग्रन्थमणौ प्रकाशोऽयं प्रकाश्यते ॥ २ ॥

[105] **अन्तः**— संवत् १६५० वर्षे श्रावणवदि सप्तमी गुरौ इदं पुस्तकं लिखितम् ॥
ग्रन्थाग्रं सहस्र ५५५० ॥

[108] **आदिः**— ॥ ॐ ॥ श्रीमत्परमगुरुर्जयति ।
प्रणम्य परमात्मानं जानकीनाथशर्मणा ।
क्रियते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥ १ ॥

अन्तः— इति श्रीभट्टाचार्यचूडामणिकृतायां न्यायसिद्धांतमञ्जर्यां शाब्दपरिच्छेदः संपूर्णः ॥
संवत्सरविक्रमार्कात् गताब्दगण १७३७ शकात् अब्दवृन्द १६०२ चान्द्रीयचैत्र-

मासस्य चतुर्दशी भौमदिने । अणहिल्लपत्तनाभिधाने पूंनिमगच्छीयभट्टारक श्रीमहिमाप्रभसूरिणा स्वहस्तेन पठनाय लिखतैषा न्यायसिद्धान्तमञ्जरी । ग्रन्थाग्रम् १०२५ श्रेयः ॥

[111] **अन्तः**— वह्नि-पांडव-पयोधि-चन्द्र(१७५३)संज्ञानुवत्सरे ।
पौषमास्यसिते पक्षे दशम्यां मन्दवासरे ॥ १ ॥
राजन्ते सुतरां श्रीमन्महिमाप्रभु(भ)सूरयः ।
तच्छिष्यभावरत्नेन तर्कभाषा लिखो(पी)कृता ॥ २ ॥

[112] **आदिः**— ॥ ॐ ॥ श्रीसरस्वत्यै नमः ॥
बालोपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसः श्रुतेन ।
संक्षिप्तयुक्त्यन्वितत‌र्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥ १ ॥

अन्तः— इति श्रीकेशवमिश्रेण विरचिता तर्कभाषा संपूर्णा ।
संवत्सप्तदशसप्तत्रिंशत्तमेऽब्दे (१७३७) श्रीमंडहीबन्दिरे शुभं भूयाल्लेखक-पाठकयोः ।

[114] **अन्तः**— महोपाध्याय १०८ श्रीराजसारजीशिष्यमहोपाध्याय श्री १०७ श्रीज्ञानधर्मजी-शिष्यमुख्यः वाणारसजी राजहंसजीशिष्यमुख्यः पंडितप्रवरदेवचन्दजीशिष्य-पं० मतिरत्नपठनार्थम् ॥ पं० राजलाभपठनार्थम् ॥ श्रीः ॥ चिरं वषतमलपठनार्थः ॥

[115] **आदिः**— ॥ ॐ ॥ श्रीतुलजायै नमः ॥
प्रणम्य जगदाराध्यं जगदानन्ददायिनम् ।
तर्कभाषाविवरणं विदधे माधवः सुधीः ॥१॥

अन्तः— काव्यालङ्कारदक्षो विविधबुधजनस्फूर्जदद्वैतपक्षो
मीमांसाशास्त्रशिष्या(क्षा)प्रवणजनमनो मानयन् माननीयः ।
भूदेवाम्नायपद्मप्रकरविकशनख्यातभानुर्द्विजेन्द्रो
बालज्ञानाय टीकामत[त] महिमवाञ्जागनाथस्तनुजः ॥१॥
गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्ज्जनास्तत्र समादधति सज्जनाः ॥२॥
इति श्रीमदशेषवादीन्द्रद्विपपञ्चाननश्रीप्रमानन्दान्तेवासिमाधवभट्टविरचितं तर्कभाषाविवरणं समाप्तम् ॥

[116] **अन्तः**—इति श्रीमत्त्रिपाठी विष्णुदासतनुजबलभद्रविरचितायां तर्कभाषाप्रकाशिका समाप्ता ॥
(अन्यदीयहस्तेन लिखितमिदम्-)
पं० श्रीकल्याणकुशलगणिभिः मुक्ता श्रीसूर्यपुरकोशे ॥

[117] **आदिः**—॥ ॐ ॥ यस्तर्कभाषामनुभाषते स्म गोवर्द्धनस्तर्ककथासु धीरः ।
तेनानवद्येन सुधांशुगौरी कीर्त्तिर्गुरूणाममृताधिकाऽस्तु ॥१॥
विजयश्रीतनुजन्मा गोवर्द्धन इति श्रुतः ।
तर्कानुभाषां तनुते विविच्य गुरुनिर्मितिम् ॥२॥

श्रीविश्वनाथानुजपद्मनाभानुजो गरीयान् बलभद्रजन्मा ।
तनोति तर्कानधिगम्य सर्वान् श्रीपद्मनाभाद् विदुषो विनोदम् ॥३॥

शिष्यप्रशिष्येऽभिधेयं प्रतिजानीते बालोऽपीति । मयैषा संक्षिप्तयुक्त्यन्वित-तर्कभाषा प्रकाश्यते । तर्काः षोडशपदार्थास्ते भाष्यन्तेऽनयेति तर्कभाषा । गौतम-प्रणीतसूत्ररूपा न्यायविद्या सा विशदीक्रियत इत्यर्थः ।

अन्तः— इति श्रीबलभद्रात्मजगोवर्द्धनविरचितस्तर्कभाषाप्रकाशः संपूर्णः । श्रीपाटणमहानगरे लिखितः पं० रविवर्द्धनगणिभिः ॥

[118] **अन्तः**— इति श्रीकेशवमिश्रेण विरचिता तर्कभाषा समाप्ता । संवत् सेवधि-सेवधि-रस-रसाधिपतिमितेऽब्दे (सं० १६९९) सहसि मासि वलक्षे पक्षे पूर्णिमास्यां तिथौ श्रीखरतरगच्छे स्वच्छे वाचनाचार्य्यवर्य्यधुर्य्यश्रीकल्याणसागरास्तेषां शिष्य-वाचनाचार्यश्रीविद्याविजयगणिवरास्तदन्तेवासिना मुरारिणा लिलिखे प्रतिरियं भावुकं भवतु श्रीसंघस्य श्रीनवानगरे या(जा)मश्रीलाषाविजयिनि राज्ये भ० श्रीजिनवर्द्धमानसूरिविजयिनि राज्ये ॥

[120] **आदिः**— विघ्नान्धकारभास्वन्तं जगद्वक्त्रं कृपानिधिम् ।
नत्वा वागीश्वरीं बोधमुद्रा-पुस्तकधारिणीम् ॥ १ ॥
जालपिद्दिभट्टाचार्यशिष्यो विष्णुः सतां मतः ।
विवरिष्ये निरुक्तोस्तु चिद्दभट्टीयसंस्थिताः ॥२॥

[124] **अन्तः**—इति श्रीमहोपाध्यायश्रीयुतविश्वनाथसिद्धांतपञ्चाननभट्टाचार्यविरचितभाषापरिच्छेदः ॥

लिखितोऽयं पंडितश्री १०७ न्यायकुशलगणि-तच्छिष्यपण्डितश्री १०५ श्रीश्रीकिसनकुशलगणि-तच्छिष्यगणिनयनकुशलेन स्वपठनाय ॥

संवत् १७८४ वर्षे माहवदि २ बुधवासरे ॥ श्रीशीतलजिनप्रसादात् । श्रीमदुदयपुरनगरे ॥

[130] **अन्तः**— संपूर्णमिदं न्यायकन्दलीसूत्रं लिखितं पूज्यश्रीमुनिसुन्दरसूरिशिष्यपुरन्दरपण्डित-प्रकांडपं० लक्ष्मीभद्रगणिशिष्याणुना चारित्रविजयगणिना ॥

[134] **अन्तः**— संवत् १६६२ वर्षे फाल्गुन सुदि ११ शनिवारे लि० देवीदास । श्लोक-संख्या १९५० ॥

[144] **अन्तः**— पूर्णिमापक्षे श्रीमद्गच्छेशश्रीजयप्रभसूरिवरसुगुरुचरणकमलालिना वैनेयिकेन यशा-स्तिलकेनालेखि ॥

[147] **अन्तः**— ग्रं०१८० श्रीः । जसवंतेन लिखितम् ॥

[148] **अन्तः**— ग्रन्थाग्रम् ९०० । मुनि जसतिलकयोग्यः ॥

[150] **अन्तः**— सं० १५०७ वर्षे फाल्गुनासितसप्तम्यां रवौ लिखितम् ॥

[151] आदिः — ॥ ॐ ॥ हेतवे जगतामेव संसारार्णवसेतवे ।
प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः ॥
प्रमितिविषयाः पदार्थाः । ते च द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाऽभावाख्याः सप्तैव ।

अन्तः— निरुक्तमुक्तामय उत्तमद्युतिः सदात्मरत्नेश्वर एष हारः ।
सुवर्णसूत्रग्रथितो मनीषिणां मनोहरः कण्ठमलंकरोतु ॥१॥

यम-नियम-स्वाध्याय-धारणा-समाधिधोरणीमन्थरनयनपाशुपताचार्य-श्रीभावविश्वेश्वरविरचितवाग्विद्याविलासविचित्रवादित्रसार्थपरार्थचमत्कृत्याश्चर्यमयी पारावारन्याय-वैशेषिकमहाशास्त्रसारसमुद्धरणशीलविता सप्तपदार्थीयम् ॥

वर्षे षट्-चन्द्रमिश्रे ऋतु-कु(१६१६)परिमिते फाल्गुने शुद्धपक्षे ।
द्वैतेय्यां सौम्यवारे सकलगुणयुते पौष्णसंछेदचन्द्रे ।
राकापक्षे विशाले मुनिजननिचिते सूरिपुण्यप्रभाख्य-
शिष्यः शास्त्रं प्रधानं निजपठनकृतेऽलीलिखन्न्यायमार्गम् ॥१॥
समाप्तेयं सप्तपदार्थी सूत्रतः ।

एषा लेखक-पाठकयोः विशदन्यायवाक्यफलप्रदा संबोभूयेत । तथा चाध्येतॄणामध्ययनफलं प्रतंतन्यात् ॥

स तु श्रीन्यायपाथोधिश्चिरं जीयादसौ महान् ।
यदीयलहरीसङ्गाज्जडस्त्यजति जाड्यताम् ॥१॥
इति शिवादित्यकृतिरियं वैशेषिकमताऽनुयायिनी । मंगलं भूयात् ॥

[152] आदिः— ॥ ॐ ॥ सर्वज्ञाय नमः ॥ श्रीजयप्रभसूरिगुरुभ्यो नमः ॥
श्रीवर्धमानजिनपोऽस्तु स विघ्नहन्ता सिंहः स्वतः प्रबलवीर्ययुताय यस्मै ।
दत्त्वा निजासनमसौ कुरुतेऽङ्घ्रिसेवां सिंहासनोपरि यतो भगवान् रराज ॥१॥
प्रभावविभवावासं प्रतिभादानदक्षिणम् ।
स्पृशामि शिरसा सौवं गुरुपादरजःकणम् ॥२॥
पूर्वशास्त्रानुसारेण बालानां मन्दमेधसाम् ।
शेमुषीसिद्धये रम्या जिनवर्धनसूरिणा ॥३॥
अज्ञानतिमिरध्वंससप्तसप्तिप्रभानिभा ।
किञ्चित् सप्तपदार्थीया व्याख्या प्रस्तूयते मया ॥४॥ युग्मम् ॥

अतिगहनगम्भीरकणादसूत्रप्रशस्तपादभाष्यादिमहाशास्त्रेभ्योऽल्पमेधसां शिष्याणां पदार्थबोधासंभवात् श्रीशिवादित्याचार्यस्तत्प्रतिबोधायाल्पतरं सुबोधं सप्तपदार्थीप्रकरणं चिकीर्षुरादौ सर्वविघ्नोपशान्तये शिष्टाचारप्रतिपालनाय चेष्टदेवतानमस्कारमाह ।

अन्तः— इति श्रीखरतरगच्छे श्रीजिनराजसूरिपट्टे श्रीजिनवर्धनसूरिविरचिता सप्तपदार्थीटीका समाप्ता ॥ ग्रं० १८४८ ॥ शुभं भवतु ॥

सं० १५२७ वर्षे चैत्रसुदि ७ गुरा श्रीपूर्णिमापक्षे पूज्यराजश्रीजयप्रभसूरिभिः शिष्ययशस्तिलकमुनिसमध्यापनाय सप्तपदार्थीटीका लिलिखे परोपकृतये च ।

[153] **अन्तः—** ॥ इति श्रीजिनवर्धनसूरिविरचिता सप्तपदार्थीटीका ॥
सर्वसंख्या ग्रं० २०४८ अक्षर ११, श्रीपत्तने लिखिता ॥

[155] **आदिः—** ॥ ॐ ॥ वेदान्तविज्ञानसुनिश्चितार्थैर्योगीश्वरैर्ध्येयमजं विशुद्धम् ।
उमानुमाभ्यामधिगम्यमानं वन्दे महेशं सदनुग्रहेशम् ॥१॥
विघ्नेशादीन् नमस्कृत्य माधवाख्यसरस्वती ।
शिवादित्यकृतेष्टीकां करोति मितभाषिणीम् ॥२॥

अन्तः— सौराष्ट्रदेशोऽखिलराष्ट्रवर्यः सदाकरो दक्षिणभूमिनिष्ठः ।
विराजते सह्यगिरीन्द्रसानौ यत्रास्ति गोकर्णमहाचलेशः ॥१॥
तद्देशजन्मा यतिरेकदण्डो सरस्वतीमस्तकमाधवाख्यः ।
सोऽयं शिवादित्यकृतेरकार्षीट्टीकामिमां बालसुखप्रवृत्त्यै ॥२॥
माधवाख्ययतीन्द्रेण गोदातीरनिवासिना ।
कृता सप्तपदार्थ्यास्तु टीकेयं मितभाषिणी ॥३॥
इति मितभाषिणी संपूर्णा ॥ श्रीरस्तु ।
तुरग-क्षमर्तु-चन्द्रे (१६१७) वर्षे मासे च पौषकृष्णदले ।
सोमे पञ्चम्यहनि व्यलेख्येषा चिरं नन्द्यात् ॥ ६ ॥

[156] **अन्तः—** पंडित आणन्दविजयगणिशिष्यगणिहर्षविमलपठनार्थम् ।

[157] **अन्तः—** संवत् १७३५ वर्षे द्वितीयज्येष्ठसुदि ६ बुधे चातुर्वेदीमोढज्ञातीयलिखितं महिता नानासुतवृन्दावनेन लिखितम् । श्रीपाटणमध्ये ॥

[159] **अन्तः—** श्रीजिनसमुद्रसूरिविनेय वा० साधुविजयगणिना प्रतिरियं लेखिता । वाच्यमाना चिरं जीयात् ॥

[163] **अन्तः—** मुनिहंसतिलकयोग्यः ॥

[169] **आदिः—** ॥ ॐ ॥ अर्हं ॥
यत्पादाम्बुजभृङ्गालिच्छलादिव सुरासुराः ।
वितर्कयन्ति सौन्दर्यं तं वन्दे गिरिजाप्रियम् ॥ १ ॥

अन्तः— इति श्रीपरमहंस[परि]व्राजकाचार्यश्रीमद्वद्याश्रमपूज्यपादशिष्याद्वयारण्यमुनिविरचिता तर्कदीपिकायाः संक्षेपव्याख्या समाप्ता ॥
संवत् १५२८ वर्षे श्रावणसुदि ५ शुक्रे लिखितम् । मुनियशस्तिलकपठनार्थम् ॥
वैक्रमेऽब्देऽद्रि-पक्षेषु-भू (१५२८) संख्ये मासि कार्त्तिके ।
ग्रन्थोऽयं शुक्लपञ्चम्यां लिलिखे स मया मुदा ॥१॥
लिखित्वा प्रददे प्रीत्यै भावचन्द्रेण भावतः ।
श्रीतर्कदीपिकाव्याख्या यशस्तिलकसाधवे ॥ २ ॥
नन्दन्तु श्रीगुरवः श्रीजयप्रभसूरयः ।

[170] **आदिः**— ॥ ॐ ॥ श्रीविघ्नविध्वंसकृच्छ्रीमद्गौडीकपार्श्वप्रभुभ्यो नमः ।
नत्वा श्रीविश्वनाथं विरचयति सतां सम्मुदे **न्यायदीपं**
सत्तर्कस्नेहयुक्तं श्रुतिविमुखजनध्वान्तविध्वंसदक्षम् ।
गोपीकान्तो नितान्तं विबुधगणसभाभाजने भासमानं
सत्सिद्धान्ताच्छदीप्ति कुकलितसुविदा कज्जलावर्जितं च ॥

अन्तः— प्राचीनग्रन्थसंदर्भमतानुमतयुक्तिभिः ।
संभूत्ये(? ते) **न्यायदीपे** तु प्रीतिरातन्यतां बुधैः ॥१॥
नैयायिकमणिः कोऽपि **गोपी**कान्तः परान्तकः ।
तदीय**न्यायदीपो**ऽयं परिपूर्णो विराजते ॥२॥
विद्वद्वृन्दविवादवर्धितमना मेधालयो मौलिनी–
लीलालालितनीलकण्ठललितांह्रिद्वन्द्वपङ्केरुहः ।
श्रीमद्**या**मिकवंशरत्नमुदितश्रीवेणिदत्तात्मजो
गोपीकान्त इतीरितः प्रकटितस्त**न्न्यायदीपो**ऽधुना ॥३॥
बालानुजप्रेमनिविष्टचेतसा कृतं मया यत्कुतुकाच्च किञ्चित् ।
इदं त्वसूयाविषयस्य नोचितं सुचेतनैश्चेतसि भावनीयम् ॥४॥
इति श्री**गोपी**कान्तविरचितो **न्यायप्रदीपः** ॥

[177] **अन्तः**— लि० सं० १७६४ वर्षे श्रावण सुदि ६ बुधदिने पं० भाग्यविजयगणि(स्य)
स्वहिताय ज्ञानावबोधाय श्रीसैवाडीमध्ये ॥

[182] **आदिः**— ॥ ॐ ॥
नित्योन्मेषविशेषितं स्थिरतरं वालैर्न यद् ग्रस्यते
रागत्यागमनोहरं नलिनिमन्यक्कारसारोदयम् ।
आज्योन्मुक्तमनावृति प्रतिदिशं निस्तारकं तन्मम
द्योतिश्चक्षुरपूर्वमस्तु भुवनाभोगस्थितिक्लृप्तये ॥ १ ॥
मयात्मस्मृतये किञ्चित् कार्यं खण्डनमण्डनम् ।
इदं वादिभिरादाय वादाय क्रियतां मनः ॥ २ ॥

ग्रन्थारम्भे विघ्नोपशमनाय निर्मितमभिमतदेवतयोर्नमस्कृतिद्वितयं शैक्षान् शिक्षयितुं दर्शयति–अविकल्पेति–य एकः सन् स्थाणुत्व-पुरुषत्वाभ्यां गृह्यते स विकल्पविषयः ।

अन्तः— यदि सकारणकत्वमपि भविष्यति कदाचित्कत्वमपि भविष्यतीति शङ्क्यते तदा कदाचित्काहेतुकतायां तत्संबन्धस्याप्यकादाचित्कत्वं स्यादिति कादाचित्कत्वव्याघातः ॥ प्रत्यक्षरगणनया ग्रन्थाग्रं शतम् २०५० ॥

[183] **आदिः**— ॥ ॐ ॥ श्रीगणेशाय नमः ॥
ब्रह्मानन्दैककल्लोलाच्युतानन्दसदाशिवम् ।
परमानन्दपरंधाम तस्मान्महं नमाम्यहम् ॥ १ ॥

अन्तः— इति श्रीपरमहंसपरिव्राजकाचार्यश्रीनाथपादपूज्यज्ञानसागरविरचितं जगत्कन्दब्रह्मा-
नन्दकल्लोलपीचीकरणं संपूर्णम् ॥

[185] **आदिः**— ॥ श्रीगणेशाय नमः ॥
वासुदेवेन्द्रयोगीन्द्रं मत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां हितार्थाय तत्त्वबोधो विधीयते ॥ १ ॥

अन्तः— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रस्वामिकृतः तत्त्वबोधः संपूर्णः ॥
संवत् १९०९ ना प्रथम भाद्रवासुद १५ रविवारे श्रीमांड[वी]बिंदरमध्ये
लिखी छे । लिखितं मोढज्ञाती भट किल्याणजी तथा देवजी हरजीवनाणीने
लिपिकृतम् ॥ इदं पुस्तकम् ॥ श्रीरस्तु ॥

[188] **आदिः**— ॥ ॐ ॥ श्रीपरमात्मने नमः ॥
यदज्ञानाज्जगज्जातं यद्विज्ञानाद् विलीयते ।
तं नत्वा सच्चिदानन्दं कुर्वेऽध्यात्मप्रदीपकम् ॥१

अन्तः— यन्नाम्नि विजयोत्तरं पदमहो मुक्तिर्जरीजृम्भते
यो गच्छाधिपतिर्गणी च समभूत् तत्पट्टपाथोनिधौ ।
पंन्यासः कमलाभिधः समभवत् तस्माद् गणी केशरः
तद्भ्रात्राऽवरजेन देवमुनिना ग्रन्थोऽयमङ्कीकृतः ॥९॥
इति अवधूतानुभूतिः समाप्ता ॥ अष्टावक्रं च मूलग्रन्थः ॥
संवत् १९६३ रा मीती आसोज सुदी ११. ली० श्रीकृष्ण ॥

[190] **आदिः**— ॥ ॐ ॥
सम्यग्न्यायस्य वक्तारं प्रणिपत्य जिनेश्वरम् ।
न्यायप्रवेशकव्याख्यां स्फुटार्थां रचयाम्यहम् ॥१॥

अन्तः— न्यायप्रवेशकं यद् व्याख्यायावाप्तमिह मया पुण्यम् ।
न्यायाधिगमसुखरसं लभतां भव्यो जनस्तेन ॥१॥
समाप्ता चेयं शिष्यहिता न्यायप्रवेशकटीका । कृतिः सिताम्बराचार्यजिन-
भट्टपादसेवकस्याचार्यहरिभद्रस्य ॥
॥ इति न्यायप्रवेशकटीका समाप्ता । ग्रन्थाग्रम् ५०१ । मङ्गलं भवतात् ॥
चार्वाकोऽध्यक्षमेकं सुगतकणभुजो सानुमानं सशाब्दं
तद्द्वैतं पारमर्षः सहितमुपमया तत्त्रयं चाक्षपादः ।
अर्थापत्त्या प्रभाकृद् वदति च निखिलं मन्यते भाट्ट एतत्
साभावं द्विप्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥१॥
सं० १५२९ वर्षे फाल्गुन शुदि १ शुक्रे श्रीपूर्णिमापक्षीयश्रीजयप्रभसूरीन्द्रैः
शिष्ययशस्तिलकपठनाय लेखितम् ॥

[191] **मू०आदिः**— ॥ ॐ ॥ नमो जिनाय ।
सम्यग्न्यायस्य वक्तारं प्रणिपत्य जिनेश्वरम् ।
न्यायप्रवेशकव्याख्यां स्फुटार्थां रचयाम्यहम् ॥ १॥

रचितामपि सत्प्रज्ञैर्विस्तरेण समासतः ॥
असत्प्रज्ञोऽपि संक्षिप्तरुचिसत्त्वानुकम्पया ॥२॥

पं० आदिः— ॥ ॐ ॥ ऐं नमः ॥
दुर्वारकामकरिकुम्भतटप्रभेदकण्ठीरवं जिनपतिं वरदं प्रणम्य ।
न्यायप्रवेशक इति प्रथिते सुशास्त्रे प्रारभ्यते तनुधियाऽपि हि पञ्जिकेयम् ॥१॥

वृ० अन्तः— समाप्ता चेयं शिष्यहितानामन्यायप्रवेशकटीकाकृतिः ॥ सिताम्बराचार्यजिनभद्र-पादसेवकस्याचार्यहरिभद्रस्येति ॥ ग्रन्थेऽनुष्टुप्छन्दसां श्लोकशतानि पञ्चसप्त-नवत्यधिकान्यङ्कतोपि ॥
इति न्यायप्रवेशकाख्यतर्कग्रन्थवृत्तिः समाप्ता ॥

पं० अन्तः— समाप्ता चेयं न्यायप्रवेशपञ्जिका ॥
न्यायप्रवेशशास्त्रस्य सद्वृत्तेरिह पञ्जिका ।
स्वपरार्थदृब्धा स्पष्टा पार्श्वदेवगणिनाम्ना ॥

[193] **आदिः**— ॥ ॐ ॥ श्रीशासनाधिष्ठाय[काय] नमः ॥ श्रीश्रुतदेवतायै नमः । श्रीइन्द्र-नन्दिसूरिगुरुभ्यो नमः ।
अर्हम् । सुयं मे आउसं० ... ...

अन्तः— विमुच्चइ त्ति बेमि । विमुक्तिरष्टमाध्ययनम् । आचाराङ्गप्रथमश्रुतस्कन्धः । ग्रन्थाग्रम् २५५४ ॥
संवत् १५७३ वर्षे १० मंगलवार । नक्षत्रम् ॥

[195] **अन्तः**— श्रीनागपुरीयतपागच्छे आचार्यश्रीअमरकीर्तिसूरिभिर्ल्लैखितम् । मुनिहासा-लिखितम् ।

[200] **अन्तः**— विमुत्ती समत्ता । आचाराङ्गसूत्रम् ॥ ग्रन्थाग्रम् २६४४ ॥
संवत् १६७४ वर्षे आसू वदि १० दिने पुष्यार्कदिने । श्रीखरतरगच्छे श्रीजिनराजसूरिसंतानीयशिष्यश्रीजयसागरमहोपाध्यायविनेयश्रीरत्नचन्द्रोपाध्याय-शिष्यश्रीभक्तिलाभोपाध्यायशिष्यवाचनाचार्यश्रीजीवकलशगणिवराणां शिष्यपं० नयसुन्दरगणिनाऽलेखि । पं० वृयासेनादिशिष्यप्रशिष्यवाचनार्थम् । श्रीरस्तु । कल्याणं भूयात् । श्रीजिनकुशलसूरिप्रसादेन श्रेयो भूयात् ॥

[202] **अन्तः**— संवत् १५७४ वर्षे चैत्र शु० ११ भौमे । जो० धनालिखितम् । (ग्रं० ८३००)
(अन्यदीयहस्तेन लिखितमिदम्) — साहश्रीवच्छा-सुतसा० सहिसकरणेन स्वस्वपुण्यार्थं पुस्तकभण्डारे कृता, सुतवर्द्धमानपुस्तकपरिपालनार्थम् ॥

[203] **अन्तः**— आचारटीकाकरणे यदाप्तं पुण्यं मया मोक्षगमैकहेतु ।
तेनाप्नुयां शुभराशिमुच्चैराचारमार्गप्रवणोऽस्तु लोकः ॥१॥
शकनृपकालातीतसंवत्सरशतेषु सप्तसु गतेषु ।
अष्टनवतीत्यधिकेषु(७९८) वैशाखशुद्धपञ्चम्याः ॥२॥
सं० १९६२ । मीती असाढ कृष्णपक्ष १३ । ली० अर्इपुरमध्ये ॥

[204] अन्तः— ... ... । दो०सिंहा-भार्याअमरो-पुत्रदो०हरषाकेन श्रीसिद्धांतकोशं कारितं पुत्र दो०... ... ... लादेपुत्रसहसकरण-उदयकरण-विजयकरण-विमलसी-भार्याविमलादे-पुत्रवच्छाप्रमुखपरिवारयुतेन स्वकोशे श्रीआचाराङ्ग-वृत्तिर्लिखापयामास ॥

[205] अन्तः— श्रीबृहत्खरतरगच्छे श्रीजिनसमुद्रसूरिपट्टालंकार-श्रीजिनहंससूरिविरचितायां श्रीआ-चाराङ्गप्रदीपिकायां द्वितीयश्रुतस्कंधः समाप्तः । ग्रन्थाग्रन्थम् १०२८५ ।

संवत् १८८३ रा शाके १७४८ प्रवर्त्तमाने मासोत्तममासे फाल्गुनमासे कृष्णपक्षे द्वितीयायाम् ।

[206] अन्तः— सं० १६०५ वर्षे भाद्रपद वदि ५ शुक्रे । अद्येह श्रीपत्तनमध्ये श्रीश्रीमाल-ज्ञातीया सुगंधीकुटुम्बे श्रे० हांसा-भार्याशुहांसलदे पुत्र-४ श्रे० हरिचंद - श्रे० सीधा - श्रे० मेघा - श्रे० सिंधपुत्रपौत्रसहितैः श्रे० मेघाकेन श्रीपूर्णिमापक्षे प्रधानशाखायां भ० श्री ६ भुवनप्रभसूरि-तत्पट्टे भ० श्री ६-कमलप्रभसूरि-तत्पट्टे भ०श्री ६ पुण्यप्रभसूरीश्वराणामुपदेशेन श्रीआचाराङ्गदीपिका श्रे०मेघाकेन स्वस्वपुण्यार्थं लिखाप्य स्वगुरुभ्यः प्रदत्ता वाच्यमाना चिरं नन्दतु ॥

[208] अन्तः— श्रीबृहत्खरतरगच्छे श्रीजिनसमुद्रसूरिपट्टालङ्कारश्रीजिनहंससूरिविरचितायां श्री-आचाराङ्गप्रदीपिकायां द्वितीयः श्रुतस्कन्धः समाप्तः ।

अन्तः— श्रीवीरशासने क्लेशनाशने जयिनि क्षितौ ।
सुधर्म्मस्वाम्यपत्यानि गणाः सन्ति सहस्रशः ॥१॥
गच्छः खरतरस्तेषु समस्ति स्वस्तिभाजनम् ।
यशोभुवनगुणजुषो गुरवो गतकल्मषाः ॥२॥
श्रीमानुद्द्योतनः सूरिर्वर्द्धमानः जिनेश्वरः ।
जिनचन्द्रोऽभयदेवो नवांगीवृत्तिकारकः ॥३॥
प्रथितानेकसद्ग्रन्थो निर्ग्रंथानां शिरोमणिः ।
दुर्लभो दुर्धियां धीमद्वल्लभो जिनवल्लभः ॥४॥
जिनदत्तो जिनचन्द्रो जिनपतिरासीज्जिनेश्वरश्चैव ।
सजिनप्रबोध-जिनचन्द्रसुगुरु-जिनकुशल-जिनपद्माः ॥५॥
जिनलब्धिर्जिनचन्द्रः संघोदयकृज्जिनोदयगणेशः ।
जिनराजसूरिगणभृत् तत्पट्टालङ्कृतिप्रवणः ॥६॥
तत्पट्टे सिद्धान्तस्वर्णपरीक्षाकषोपलप्रख्याः ।
श्र जिनभद्रयतीन्द्राः श्रीजिनचन्द्राश्च तत्पट्टे ॥७॥
ये द्वैधममलशीलाः प्रियगुणिनो दूरमस्तदुःशीलाः ।
श्रीजिनसमुद्रसूरिप्रवरास्ते तदनु संजज्ञुः ॥८॥
तत्पादपङ्करुहभृङ्गसन्निभास्तत्सेवनासादितशास्त्रसौरभाः ।
तच्छिष्यलेशा गुणिभिः समादृता गणाधिपाः श्रीजिनहंससूरयः ॥९॥
श्रीलूणकर्णराज्ये मंत्रीश्वरकर्मसिंहसंघपती ।
श्रीमद्विक्रमनगरे गुण-मुनि-शर-चन्द्रमित(१५७३)वर्षे ॥१०॥

सद्वृत्तिशाखादिविहारकारिणां महात्मनां निर्मलसूत्रधारिणाम् ।
ज्ञान-क्रियाभ्यासवतां हि तेषां कुलोद्भवैः श्रीजिनहंससूरिभिः ॥११॥
आचारदीपिकेयं विनिर्मिता देवकुलिकया तुल्या ।
अल्पावबोधयतिगणमतिदैवतसंनिवेशकृते ॥१२॥
साहाय्यमत्र चक्रुः श्रीपाठकदेवतिलकनामानः ।
दक्षाः शिष्या वाग्गुरुसुगुरुदयासागरेन्द्राणाम् ॥१३॥
गीतार्थशिरोमणिभिः श्रीपाठकभक्तिलाभमुख्यैः ।
संशोधिता तथापि च यदत्र दुष्टं विशोध्यं तत् ॥१४॥
यावच्चन्द्रादित्यौ यावच्छ्रीवीरशासनं जयति ।
तावन्मद[? य]त्वेषा इत्याशीर्धर्मो भवतु सफलः ॥१५॥
॥ इति प्रशस्तिः ॥ ग्रन्थाग्रम् ९५०० ॥ शुभं भवतु ॥

[211] **आदिः**— ॥ॐ नमः श्रीमदागमानुयोगप्रदेभ्यः श्रीगुरुभ्यः ।

इह हि रागद्वेषमोहाद्यभिभूतेन सर्वेणापि जन्तुना शारीरमानसातिकटुक-दुःखोपनि... ... ...

अन्तः— इति श्रीआचाराङ्गावचूरिः समाप्ता ॥ सं० १५७५ वर्षेऽलेखि ।

[214] **आदिः**— श्रीगुरुभ्यो नमः ॥
प्रणम्य श्रीजिनाधीशं श्रीगुरूणामनुग्रहात् ।
लिख्यते सुखबोधार्थमाचाराङ्गार्थवार्त्तिकम् ॥१॥

अन्तः— इति उपधानश्रुताध्ययनस्य चतुर्थोद्देशकः समाप्तः ॥ तत्समाप्तौ समाप्तमिद-मुपधानश्रुताध्ययनं नवमम् ॥९॥

इति श्रीमद्बृहत्तपागच्छे विहितसदाचारयत्नानां पण्डितशिरोरत्नानां श्रीसाधुरत्नानां शिष्येणोपाध्यायपाशचन्द्रेण कृते श्रीआचाराङ्गसुखावबोधे नवम-मध्ययनं समाप्तम् ॥ इति श्रीमति श्रीआचाराङ्गे प्रथमश्रुतस्कन्धः संपूर्णः ॥

संवत् १५७७ वर्षे श्रावण सुदि ७ बुधे श्रीअणहल्लपुरपत्तने । जोसी पोपा लिखितं ॥१॥

(अन्यदीयहस्तेन विशेषः—) आ परत काका सामजीजीने राजीखुसीथी दीधी छे ॥

[215] **मू० अन्तः**— संवत् १६७२ वर्षे भाद्रवा वदि ६ रवौ । श्रीबीपुरस्थाने लखितम् ॥

बा० अन्तः— इति श्रीमद्बृहत्तपागच्छे विहितसदाचारयत्नानां पण्डितशिरोमणिरत्नानां शिष्ये-णोपाध्यायपाशचन्द्रेण कृते श्रीआचाराङ्गसुखावबोधे नवममध्ययनं समाप्तम् ।
इति श्रीआचाराङ्गप्रथमश्रुतस्कन्धः संपूर्णः ॥ आ० लाखाटबकानी प्रति ।

[220] **अन्तः**— संवत् १७१४ वर्षे श्रीनवानगरे अंचलगच्छे वा० श्रीविवेकशेखरगणिशिष्य-वा० श्रीभावशेखरगणिलिखितं माह शुदि ६ दिने १ साधवी विमला

सिष्यणी साधवी कपूरां सिष्यणी साधवी हेमा सिष्यणी साधवी पद्मलक्ष्मी-
वाचनाय । श्रीशान्तिनाथप्रसादात् वाच्यमाना चिरम् । ग्रन्थाग्रम् २१०००
(२१००) ॥ श्रीहालारदेशे श्रीकल्याणसागरसूरीश्वरविजयराज्ये ।

[224] अथ प्रशस्तिः—

निस्तन्द्रचन्द्रचारुणि चन्द्रकुले चरणचातुरीभाजः ।
विख्याततपेत्याख्या जगति जगच्चन्द्रसूरयोऽभूवन् ॥१॥
तेषां दोषांशमुषां संताने सुकृतसंचयविताने ।
श्रीसोमसुन्दरगुरूत्तमाः क्षमासंगमा अभवन् ॥२॥
तत्पट्टस्फुटकमलाभाले कालेयतिलकसंकाशाः ।
श्रीमुनिसुन्दरगुरवः कामितसंपत्तिसुरतरवः ॥३॥
बाल्येऽपि भारतीप्रतीतिरुदपादि वादिवर्गे यैः ।
श्रीजयचन्द्रमुनीन्द्राः पारीन्द्रास्ते परगजेषु ॥४॥
तत्पट्टविशदस्थाने स्थाने श्रृङ्गारसारतां भेजुः ।
श्रीरत्नशेखरा इति जगति यतः ख्यातिमापुस्ते ॥५॥
तेषामनङ्कपट्टे गुणसंघट्टे प्रभावकषपट्टे ।
प्रासाधिकप्रतिष्ठाः श्रीलक्ष्मीसागराः शिष्टाः ॥६॥
भर्त्सितकलिकालुष्याः शिष्यास्तेषां यथार्थनामानः ।
श्रीसुमतिसाधुगुरवः क्ष्मासुरभीकारसद्यशोगुरवः ॥७॥
तत्पट्टे प्रकटेप्सितपूरणचिन्तामणीयमानानाम् ।
लब्धाधिकमानानां सुहेमविमलाभिधानानाम् ॥८॥
सूरीन्द्रगच्छनायकपदवीप्राप्तप्रभाप्रतिष्ठानाम् ।
शिष्याणुर्गुण-शासनजननी-तिथिसंमिते (१५८३) वर्षे ॥९॥
विबुधजनप्रार्थनया स्वस्य स्मृतये परोपकृतये च ।
सूत्रकृताङ्गस्यैतां हर्षकुलो दीपिकामलिखत् ॥१०॥
क्वाचित् प्रमाणयुक्तीरप्रथयन्नात्र सुगमताहेतोः ।
तत एव नैव विहितो लक्षणसंधिस्तथा क्वापि ॥११॥
सूत्रासंगतमत्रावादि कथञ्चिन्मया यदज्ञतया ।
तत् शोधयन्तु सुधियः कृपया मात्सर्यमुत्सार्य ॥१२॥
ग्रन्थमितिरनुमिताऽत्र च षट् च सहस्राणि षट् शताग्राणि ।
विबुधजनवाच्यमानो ग्रन्थोऽयं जगति जयतु चिरम् ॥१३॥
प्रशस्तिरिति सिद्धपुरे दृग्गोचरीकृता पं० सौभाग्यमाणिक्यगणिना, सं० १५९८ ।

[225] अन्तः— इति श्रीसूत्रकृताख्यद्वितीयाङ्गदीपिकायाः (उपर्युक्ता १३ श्लोकात्मिका) प्रशस्तिः ॥
संवन्निधि–भूत–मुनि–भूमिप्रमिते (१७५९) कार्त्तिकशुदिषष्ठ्यां बृहस्पतौ
श्रीमदागरायां श्रीबृहत्खरतरगच्छे श्रीजिनकुशलसूरिशाखायां श्रीयुतोपाध्याय-
श्रीलक्ष्मीकीर्त्तिगणि–शिष्यश्रीलक्ष्मीवल्लभोपाध्यायगणि–तच्छिष्यश्रीज्ञिवबर्धनगणि–
तच्छिष्यश्रीतिलकप्रियगणि–तच्छिष्येण पण्डिततिलकोदयेनालेखि प्रतिरियम् ।

(पश्चात्कालीनोल्लेखः)—

संवत् १९१५ का अश्वनि मास कृष्णपक्ष प्रतिपदादिने म० श्रीसुखलालजी ॥ सदानन्दजी पास सूयगडाङ्गे दीपिका मुद्रा विस मध्ये २०) मोल लीना ६६०० श्लोक है ॥ ऋषि लच्छीरामके वास्ते लीना है । श्रेयो भवतु ॥ नागोरीलुंकागच्छे ६ मुनि भारमलका है ।

[231] **अन्तः**— (पृष्ठिकोपरि लिखितम्—)

संवत् १८६६ ना वर्षे श्रावण सुदि ५ दिने पोथी लाव्या छीइं । पोथी लक्ष्मीविजे गणीनी छे,आचाराङ्गवृत्ति पानां १६९ ॥

[236] **बा० आदिः**— ॥ॐ॥ श्रीशंखेश्वरपार्श्वनाथाय नमः ॥

प्रणम्य सद्गुरून् भक्त्या बालानां बोधहेतवे ।
किञ्चित् सूत्रकृदङ्गस्य लिख्यते वार्त्तिकं मया ॥१॥

बा० अन्तः— इति श्रीसूयगडाङ्गबालावबोधः द्वितीयअङ्गस्य संपूर्णः ।

संवत् १७७२ वर्षे कार्त्तिक ॱदि ५ गुरुपु ष्ययोगे श्रीवाडेजपुरे । गणिविनीतकुशललिखितम् ।

[238] **मू० अन्तः**— संवत् १७९७ वर्षे वैशाष शुदि ३ भौमे लिखितम् ॥

स्त० अन्तः— संवत् १७९७ वर्षे ज्येष्ठ शुदि पूर्णिमास्यां(यां) वार भौमे संपूर्णम् इति मङ्गलम् ॥

[241] **अन्तः**— ॥ ॐ ॥ संवत् १५१७ वर्षे प्राग्वाटवंशे वामङ्गागोत्रजसंयुक्तपूज्य-श्रीआर्यरक्षितसूरिप्रबोध मं० श्रीखेतल-भार्याखेतलदे-पुत्र मं० जयतल-भार्या-जयतू-पुत्र मं० सामन्त-भा० अमलदे-पुत्र मं० सादा-भा० जसम द्वितीयाभा० वातू-पुत्र मं० कुम्भा-भा० लीबी-पुत्र मं० पद्माभिधानस्तद्भार्याफमकूस्तनन्दना जगदानन्दना मं० पहराज-मं० महिराज-मं० महिपाल-मं० अमीपाल-मं० तेजपालभिधाः पञ्च पुत्रास्तेषां मध्ये प्रथमो मं० [प]हराजस्तस्य भार्या-कोकाईनाम्नि तत्पुत्ररत्नेन श्रीमदञ्चलगच्छाधिपश्रीभावसागरसूरीश्वरशुभोपदेश-प्राप्तपरमाह्लादेन मं० टोकरसुश्रावकेण मणकाईभार्या-सोमजीपुत्रालंकृतेन लघुभ्रातृ मं० वाईवा-भार्यारही-पुत्रमं० मांगा-मं० तापीदासप्रमुखकुटुम्ब-सहितेन ठाणाङ्गसूत्रं लेखयित्वा तेषामेव गुरूणामुपकारिता । साधुजनैर्वाच्यमाना चिरं नन्दतात् ।

[242] **अन्तः**— अणहिल्लपाटकनगरे वसता अच्छुप्तधनपतेर्गणिना ।

जिनदेवाख्येनादौ लिखिता स्थानाङ्गटीकेयम् ॥
प्रत्यक्षरं निरूप्यस्या ग्रन्थमानं विनिश्चितम् ।
अनुष्टुभां सपादानि सहस्राणि चतुर्दश ॥
सर्वाङ्के टीकाग्रन्थसंख्या १४२५० ॥
संवत् १६१४ वर्षे आश्विन वदि ३ गुरौ म० श्रीसादा-सुतश्रीवत्स-लिखितम् ॥ श्रीरस्तु ॥

[243] अन्तः— श्रीसंवत् १६२८ वर्षे शाक १४९३ प्रवर्त्तमाने भाद्र० शुदि ६ ।

[246] अन्तः— संवत् १६८५ वर्षे बाहुल्मासि लिखितम् ॥१॥

(एतदनन्तरमधोनिर्दिष्टवडगच्छपट्टावल्युल्लिखिता—)

नवचउणूवई(९९४)वछरहिं, श्रीउद्द्योतनसूरि ।
वडगच्छ थापन जेण किय, थाप्रि चउरासी सूरि ॥१॥
सर्व्वदेवसूरि पटि जयउ ए, रूप श्रीदेवसूरि ।
सर्व्वदेवसूरि वलि हूआ ए, पाटि जसोभद्दसूरि ॥२॥
नेमिचन्दसूरिंद पटे, गुरु श्रीमुनिचन्दसूरि ।
तसु पटि सुहगुरु वन्दियइ ए, वादी श्रीदेवसूरि ॥३॥
देस-विदेसइँ जीतला ए, चउरासी जिणि वाद ।
कुरुकुल्ला साँनिधि करी ए, पाम्यउ जगि जसवाद ॥४॥
इग्यारह चउहत्तरइ (११७४) ए, सइँहथि जिणि निज सीसा ।
आचारज पद थापीया ए, एक लगनि चउवीस ॥५॥
तसु साखा जगि विस्तरीय, चउवीसइ तिणि माँहि ।
श्रीपद्मप्रभसूरि गुरुतणी ए, साष भणऊँ उछांहि ॥६॥
श्रीपद्मप्रभसूरि पटे, पूरइ भविय जगीस ॥७॥
तसु पट्टिहि गणहररयण, लोढाँवंसि सिंगार ।
सिरिजयसेखरसूरि गुरो, अतिदुःकर तपकार ॥८॥
संवत तेरइकोतरइ (१३७१) ए, पुर नागउर मझारि ।
माल्हइ साहि करावियउ ए, पद ठवणउ विस्तारि ॥९॥
ढाणांगरी परत मन्नारी छे ।

[247] अन्तः— आर्या सभीपठनार्थं लिखापितम् ।

[248] मू० अन्तः— संवत् १९२१ रा वर्षे मिति श्रावणकृष्णपक्षे अमावास्यां तिथौ सोमवासरे ॥ लि० ऋ० अषैराज मुनि ।

स्त० अन्तः— टबासूत्रनी सर्वनी संख्या १४९७३ इदं संख्या जाणवी । श्रीजैसलमेरुनगरे चतुर्मासेन लिपीकृतम् , श्रीवृद्धगु ... ... त्तोल्लौंकागच्छ ... ... पक्षेन लि०

[249] अन्तः—संवत् १५९६ वर्षे आषाढादि आसो शुदि शनौ लखितं अद्येह श्रीपत्तने मेघलिखितम् ॥

[251] अन्तः— संवत् १५७२ वर्षे फागुणे सुदि ६ शुक्ले लखितं म० गोवाललिखितम् ॥

[252] अन्तः— संवत् १६७६ आसो सुद ४ ॥

[253] अन्तः— संवत् १६२९ वर्षे आषाढ शुदि २ शुक्रवारे सारंगपुरनगरे लिषतं पांडे दासः ॥

[257] अन्तः— संवत् १५८० वर्षे फागुण वदि १० दशम्यां शनिवारे मूलनक्षत्रे श्रीसोजती-नगर्यां रायश्रीवीरमदेविजयराज्ये श्रीखरतरगच्छे श्री ४ जिनचन्द्रसूरिविजयराज्ये, तत्शिष्यश्रीरत्नसागरोपाध्याय-तत्शिष्य वा० चारित्रमेरुगणि-तत्शिष्यपं०चारुरत्नेन लिखापितम् ॥

(अन्यदीयहस्तेन लिखितमिदम्)—

संवत् १७१८ जेठवदि १४ दिने श्रीभगवतीसूत्रं श्रीजिनराजसूरीणां ज्ञानवृद्धयर्थं विहारितं श्रीआगरामध्ये ।

पा० श्रीलक्ष्मीदास-पुत्रश्रीरामचन्द्रजी-भ्रातृसाहश्रीसुखदेवजीकेन चिरं लालजीयुतेन वाच्यमाना चिरं नन्दतु प्रतिरियम् । ग्रन्थमानम् १३००० ॥

[259] अन्तः— सं० १६७४ प्रमिते माघसिते पञ्चमीदिने श्रीखरतरगणगगननभोमणिभविकमानस-कुमुदकाननविकाशननिशामणिश्रीअकब्बरपातिसाहिप्रदत्तयुगप्रधानपदधारक-अनेका-चार्योपाध्याय-वाचक-गणिपदकारकश्रीजिनचन्द्रसूरिरा[जा]धिराजपट्टप्रतिष्ठितयु० श्री-जिनसिंहसूरिराज्ये प्रसूरौ पत्तनपरीक्षक्षेमराज-सुतसमर-रतनसी-भार्यालाडकी-मूर्त्तिमज्जातसा० धनजीसुश्रावकेण श्रीभगवतीपञ्चमाङ्गसूत्रपुस्तकमलेखि । श्रीरत्न-निधानोपाध्याय-शिष्यरत्नसुन्दरगणिस[त्क]शंकरेणालेखि ।

(अन्यहस्तेनोल्लिखितमिदम्-)

श्रीविजयदेवसूरि-तत्शिष्य पं० लावण्यविजयः, तत्शिष्य पं० रत्न-विजय ग० लिपिकृतम् ।

[260] अन्तः— संवत् १६३९ वर्षे श्रावणमासे शुक्लपक्षे पूर्णिमायां तिथौ शनिवासरे लिखितम् ।
[261] अन्तः— संवत् १६०८ वर्षे वैशाखवदि ३ भौमे लक्षतं (लिखितम्) ।
[264] अन्तः— (अशुद्धिबहुलेयं प्रशस्तिः—)

श्रीमत्शान्तिजिनेश्वरः सुखकरः प्रौढप्रभावाकरः
    कामं विघ्नहरः सतां मम(? तमस्)स्तोमापहारादरः ।
भूयादतिभरः प्रभूतभयहृत् भातु प्रभो! भूतले
    सव्याम्भोजविभासनप्रभुरयं भास्वद्विभाभासुरः ॥१॥

श्रीमत्श्रीस्तम्भतीर्थाभिधनगरवरं राजते कल्पकल्पा-
    रम्भारामं विमानोत्तमधवलगृहं श्रीसुपर्वप्रतिष्ठम् ।
पुण्यैः प्राप्यं नु(वाप्तु)मस्मिन् जयविजयसुखप्राज्यसर्वार्थसौध-
    स्थानं श्रीशुद्धधर्मादनु च शिवकरं देवदेवाधिवासम् ॥२॥

यस्मिन्नाशामहेशाभकत्व(?) सुमनसः शङ्करा देवताश्च,
    राजन्ते जैनधर्माद् वरविबुधवरा दानवारिप्रवाहाः ।
कामं संप्राप्तकामा जलनिधितनयाश्च कामं कराला-
    लावलो(?)युवत्यः सुरवरसहिताः स्फारशृंगारसाराः ॥३॥

तस्मिन् प्रङ्गे विशुद्धप्रगुणगुणगणः साधुहंसोऽभिधानः
    श्राद्धः सश्रद्ध(?)वित्तः कृतसुकृतमतिः पात्रसंन्यस्तचित्तः ।
नित्यं सत्पुण्यकारा जगति विजयते ओसवंशावतंसः

    तत्पुत्राः प्रेमपात्राः समजनि विमलशील...   ...   ...
    ... ...स्वजन यजनमण्डनं मंक्तिश्रीः (?) ।

त्यागी भोगी विवेकी विनयनययुतः साधुसत्संगरङ्गः(?)
समक्षेत्राया(?) करणसंफलितस्वीयलक्ष्म्या विलासः ।।५।।

सोनाकस्वपते सौभुखधनसहिवस्तदजते (?)
निरतातनाभिद्धोनासाधुः प्र---णेस्तृतीयश्च (?) ।।६।।

यथाक्रमेण भार्याः सुकराणी विशदलसदमृत-
वाणी जीवादेवी दयिता तथाऽमरादेविनाम्नास्ताः ।।७।।

पितृव्यसाववाल्हास्वमारङहाश्राविका सुशीलगुणा ।
एवं बहुविधपरिकरसहितेन सदानमहितेन ।।८।।

सुतसहसधारसंयुतसौवर्णिकमण्डनेन पुण्यवती ।
हासलदेवीति जाया पुण्यार्थं लेखितं विमलम् ।।९।।

शुचिविवाहप्रज्ञप्तीपञ्चमाङ्गपरिस्फुटम् ।
सद्वाच्यं वाच्यमानं तु चिरं जयतु भूतले ।।१०।।

चारित्रश्रीनिवासेऽतुलविमलगुणे श्रीतपापक्षवासे
निस्सीमामदगच्छाभ्युदयपरिलसद्भाग्यसौभाग्यभाजः ।
श्रीलक्ष्मीसागराः श्रीगुरुगुणकलिताः सूरयः सूरितुल्याः ।
सौख्याधीतप्रवीप्रववहववता उसवंशे बभवुः ।।११।।

तत्पट्टे श्रीगुरवः पूज्यश्रीसुमतिसाधुसूरिवराः ।
तत्पट्टपूर्वगिरिवरविभासने नव्यभानुमत्ये ।।१२।।

संप्रति विजयवती श्रीकमलश्रीहेमविमलसूरीणाम् ।
पूजाप्राज्ये राज्ये निर्मलचारित्रसाम्राज्ये ।।१३।।

विज्ञावतंसा विबुधेन्द्रलक्ष्मीभद्रप्रभुश्रीगुरवो विरेजुः ।
तच्छिष्यमुख्याः किल पण्डितश्रीआणंदमाणिक्यगुरूत्तमाश्च ।।१४।।

तत्तदीयविनेयतां श्रीअज्ञासुतसमुद्रबिबुधानाम् ।
वहरायितं प्रमोदादन्येपि च वाचयंतु चिरम् ।।१५।।

नन्देषु षोडशेषु प्रमिते(१५५९)? वर्षे नरेन्द्रविक्रमतः माघमासे कृष्णपक्षे ५ भोमवासरे संवत् १६५९ वर्षे मागसर सुदि ५ भौमे वासरे अणहिल्लपट्टणे श्रीविवाहपन्नत्तीनाम अङ्गः संपूर्णः स्वोपकारायालेखि ।। शुभं भवतु लेखक-पाठकयोः । पस्वाव्योच्चर सूतपंमासारणलकृतम् ? ।।

(पश्चात्कालीनोल्लेखः—)

संवत् १८५१ वर्षे शाके १७१६ प्रवर्त्तमाने कार्त्तिकमासे विशदपक्षे सप्तम्यां कर्मवाटयां पूज्यमहर्षिश्रीहरचन्द्र [चित्कोषे शाह श्री] मिहालचं[द]-जित् बुधसिंघजित्काख्येन श्रद्धालुना भगवतीसूत्रसंपृक्तटीका प्रदत्ता ।। परमन्यानि पुस्तकानि प्रदत्तानि ।

[265] **अन्तः**— संवत् १५७९ वर्षे माघवदि ९ सोमे। अद्येह श्रीअणहिल्लपुरवास्तव्यसश्रीकेण श्रीखरतरगच्छे श्रीजिनभद्रसूरिपट्टे श्रीजिनचन्द्रसूरिपट्टे श्रीजिनसमुद्रसूरि-स्तत्पट्टे श्रीजिनहंससूरीश्वराणां श्रीभगवतीपञ्चमाङ्गवृत्तिर्लेखयित्वा विहारिता ॥

श्रीश्रीमालज्ञातीयआचवाडियागोत्रे मन्त्रिधणपति-पुत्रमंत्री गुणराज-भार्याकन्हाईसुश्राविका-पुत्ररत्नमन्त्रिश्रीराजभुश्रावकेण पुत्ररत्नमन्त्रिलटकण-मन्त्रिसहसकरण-पौत्रमन्त्रिविद्याधर-मन्त्रिलक्ष्मीधरप्रमुखपरिवारसश्रीकेण तदनु श्रीजेसलमेरौ संवत् १६०६ वर्षे श्रीजिनमाणिक्यसूरीश्वैरवाचि किञ्चदशोधि, श्रीसंघाध्यक्षं व्याख्यानावसरे व्याख्यायि च ।

[266] **अन्तः**— श्रीश्रीमालकुलाम्बुजे दिनकरो धन्यो धरामण्डनं
नानाचारविचारचारुचतुरो जीवादितत्त्वार्थवित् ।
सम्यग्दर्शनधारको व्र[त]धरः सर्वार्थिदेवद्रुमो
मन्त्रीशः सुगुणैरलंकृततनुर्देवाभिधानोऽभवत् ॥१॥

तस्याभवद्गुणै रम्या स्वकुलानन्ददायिनी ।
गोमतिनाम्नी दयिता सती श्राद्धीशिरोमणिः ॥२॥
पुत्रस्तदीयो विलसद्विभूतिः सत्पुण्यपीयूषपवित्रमूर्त्तिः ।
तेजूपतिः शीलधरः समस्ति हर्षाभिधो हर्षकरो नराणाम् ॥३॥
इतश्च –

श्रीश्रीमालकुलाम्बुजजन्मदिनपो लोकोपकारी सदा
विख्यातः स्वगुणैर्विशेषधवलैः श्रीदेवराजाङ्गजः ।
श्रीजगडू-जगसिंहपूर्वजमहापुंरत्नसंस्मारकः
श्रद्धावान् हरिचन्द एष सततं जीयान्महीमण्डले ॥४॥

तत्पत्नी जिनराजधर्मनिपुणोभयपक्षशुद्धा सदा
हंसीवोज्ज्वलमानसा शुभतमश्राद्धीगुणैः पूरिता ।
सर्वज्ञोक्तव्रतादिपालनविधौ संतत्परा सन्मुदा
रत्नाई इति नामतो विजयते भूमण्डले साम्प्रतम् ॥५॥

श्रीपूर्णिमापक्षपयोधिचन्द्राः शीलेन संनिर्ज्जितस्थूलभद्राः ।
सूरीश्वराः श्रीभुवनप्रभाख्या जयन्तु नित्यं जगतीतलेऽस्मिन् ॥६॥
लिखाप्य निजपुण्यार्थं भगवतीवृत्तिपुस्तकम् ।
हर्षेण रत्नवत्या च दत्तं स्वगुरवे मुदा ॥७॥
षट्-रस-पञ्च-पृथिवीसंज्ञे [१५६६] वर्षे च श्रावणे मासि ।
प्रतिपद्दिवसे लिखितं पुस्तकमेतच्चिरं जीयात् ॥८॥
॥ इति प्रशस्तिः ॥

[267] **अन्तः**— लिखितं श्रीअणहिल्लपुरपत्तनमध्ये ॥
संवत् १६५८ वर्षे कार्त्तिक वदि १४ शुक्रवारे लिखितम् । तपागच्छे पं०

श्रीलीहविमलगणिलिखापितम् मु० कृष्णा मुनिवर्धमानलिखितम् ॥

(अपरेण तावल्लिखितमिदम्-)

इदं भगवतीसूत्रवृत्तिमहाशास्त्रमणहिल्लपुरपत्तनकुम्भारीयापाटकवास्तव्येन सोनीसाथान्वयजातश्रेष्ठिवर्यनिहालचन्द्रात्मजेन श्रेष्ठिवर्यश्रीलहेरुचन्द्रेण आत्मनः पावलबाई नाम्न्याः स्वधर्मपत्न्याश्च श्रेयो निमित्तं विक्रम संवत् २००१ वर्षे कार्तिकमासे कृष्णपक्षे द्वितीयातिथौ गुरुवासरे मूल्येन गृहित्वा तपागच्छाधिराजश्रीमद्विजयानन्दसूरीशशिष्यप्रवर्त्तकश्रीकान्तिविजयांतेवासिमुनिवर्यश्रीमच्चतुरविजयचरणसरोजचञ्चरीकाय मुनिपुण्यविजयाय स्वाध्यायार्थमुपदीकृतमिति जयतु श्रीसंघभट्टारकः ॥

[269] अन्तः— संवत् १५७६ वर्षे मार्गशीर्ष वदि १३ सोमे ॥ ग्रन्थाग्रं... लिखतम् ॥ सा० ... लिखापिता ॥ ॥

जोसी गोवालीलिखितम् ।

[270] आदिः— ॥ ॐ ॥ श्रीपार्श्वनाथं प्रणम्य ।

नवमशतस्य द्वात्रिंशत्तमोद्देशकस्य टीकानुसारेण वाचनाचार्यश्रीराजसमुद्रगणिभिः क्रियते विवरणम् । तत्र सूत्रे चतुर्णां प्रवेशकानां मध्ये नारकप्रवेशनद्वारस्य विवरणम् ।

[275] स्त०आदिः— ॥ ॐ ॥ श्रीवीतरागाय नमः ॥

श्रीश्रेयः श्रीसेवितांह्रिसकलसुखकरः श्रीजिनः सिंहलक्ष्म्या
स्फूर्जत्सिद्धार्थराजप्रथितकुलवियद्भासनद्वादशात्मा ।
सद्भक्त्या नम्रकम्रत्रिदशवरवधूलोचनानन्दकारी
प्रोच्चैस्तारुण्यपुण्यः स भवतु सततं श्रेयसे त्रैशलेयः ॥१॥

यन्नाममन्त्रस्मरणप्रभावात् समीहितार्थाः सफलं व्रजन्ति ।
भव्यव्रजानेकमधुव्रतानां स वीरसार्वो दिशतु प्रसिद्धिम् ॥२॥

प्रत्यूहव्यूहवार्धिप्रशमननिरतं गौतमस्वामिनं च
तत्त्वातत्त्वार्थसिद्ध्यै निजगुरुचरणाम्भोरुहं भक्तिपूर्वम् ।
यां श्रुत्वा भव्यवर्गो भवति भगवतीं मोक्षमार्गानुसारी
तस्याहं वच्मि टीकां प्रबलजडधियां बोधनार्थं स्वबुद्ध्या ॥३॥

विद्वद्वादिविवादलब्धसुयशःपुष्टस्फुरत्केसरा-
श्चातुर्विध्यसुधर्म्मचारुकथकाः संपादिताङ्गिहिताः ।
प्रोद्दण्डप्रबलप्रतापमदनोद्यद्दन्तिपञ्चाननाः
श्रीसूरीश्वरदेवरत्नगुरव आसन् प्रभूतप्रभाः ॥४॥

वाचकततिमौलिमुकुटा निजबुद्ध्या जितबृहस्पतिस्माराः ।
श्रीराजसुन्दराख्यास्तेषां शिष्याः समाचाराः ॥५॥

तच्चरणयमलकमलोपासनषट्चरणसत्प्रमेदमुदा (? ।
सद्वाचकपद्मसुन्दरगणिनेयं विनिर्मिता टीका ॥६॥

स्त०अन्तः— संवत् १७९३ वर्षे माघमासे कृष्णपक्षे पञ्चमीतिथौ चन्द्रवासरे श्रीभटनेरमध्ये लिपीकृतं भगवतीटबार्थः संपूर्णः ॥
प्रणम्य श्रीमहावीरं गौतमं गणनायकम् ।
श्रुतदेवीप्रसादेन मया हि स्तबुकः कृतः ॥१॥
श्रीपञ्चमाङ्गसूत्रस्य टीकां दृष्ट्वा सुबोधिनीम् ।
श्रीअभयदेवकृतां यथामत्यनुसारतः ॥२॥

श्रीमद्बृहत्तपागच्छनायकसकलभट्टारकश्रेणिभूषणश्री५श्रीभट्टारकश्रीधनरत्नसूरीश्वरपट्टालंकारभ०श्रीअमररत्नसूरीश्वरपट्टो[द्]द्योतकारिभ०श्रीदेवरत्नसूरीश्वरपट्टप्रभाकरभ०जयरत्नसू[री]श्वरपट्टपूर्वाचलसहस्रकिरणोपमभट्टारकश्रीभुवनकीर्तिसूरिपट्टप्रभावकभट्टारकविद्यमानभट्टारकश्रेणिमुकुटायमानचतुर्दशविद्याविनोदरञ्जितानेकभूपालसुकृतगात्रचारित्रपात्रभट्टारकश्री५श्रीरत्नकीर्तिसूरिविजयराज्ये तद्गच्छे भ०श्रीदेवरत्नसूरिसूरीश्वरशिष्योपाध्यायश्रीराजसुन्दरगणिचरणकमलभ्रमरतुल्येनोपाध्यायश्रीपद्मसुन्दरगणिना स्वज्ञानावरणी[य]कर्मक्षयार्थे श्रीपञ्चमाङ्गस्य श्रीभगवतीसूत्रस्य नामधेयस्य स्तबुकविवरणं कृतम्। यत्किञ्चित्सिद्धान्तविरुद्धं प्रकाशितं तज्जातपातकस्य मिथ्यादुष्कृतोऽस्तु । धीमद्भिः संशोधनीयं कृपां कृत्वा, यतः–सन्तः शुद्धाः स्वभावतः परकार्यकृतोद्यमाः ।
अक्खरमत्ताहीणं यं किंचि पढियं अयाणमाणेणं ।
तं खमह मज्झ सव्वं जिणवयणविणंग(णिग्ग)या वाणी ॥१॥
अथ संवत् वेद-ग्रह-सायर-शशि(१४९४) पौषमाससुखकार ।
शुक्लपक्षतिथिपंचमी शुभवेला रविवार ॥१॥

बृहत्खरतरगच्छे श्रीक्षेमशाखायां महोपाध्याय श्री१०५ श्रीश्रीरत्नशेखररजोगणि–तत्शिष्यमुख्यपण्डितप्र०महिमामूर्तिगणिभ्रातृजशिष्य पं० हस्तरत्नभ्रातृ-पं० ऋद्धरत्नभ्रातृ पं० ज्ञानकल्लोलभ्रातृ पं० मुनिकल्लोलादिसहितेन लिपीकृता श्रीभट्नेरमध्ये ॥

[276] अन्तः— समत्त उगणीस आठकी साल सुकल पक्ष सीस काती सुद तीथ पुनं बारस ने सरवार, लषतु कृष्णगढ सहर मधे (अत्राभिधानं केनचिद् प्रभ्रष्टम् ।)

[280] आदिः— ॥ ॐ ॥ श्रीशारदाई(यै) नमः ॥ अथ श्रीभगवतीबीजकं लिख्यते ॥
प्रणम्य परया भक्त्या परमान् परमेष्ठिनः ।
कुर्व्वे हर्षकुलाख्योहं भगवत्यंगबीजकम् ॥१॥

अन्तः— इति श्रीभगवत्याख्यपंचमांगबीजकं समाप्तं, ग्रंथाग्रम् ४९० ॥

॥ संवत् १६९८ वरषे । शाके १५६३ प्रवर्त्तमाने पोषमासे ॥ कृष्णपक्षे दिशिमदिने ॥ श्रीपूर्णिमापक्षे प्रधानशाखायां श्रीढंढेरपाटके भट्टारकश्रीललितप्रभसूरि-तत्पट्टे श्रीपूज्यश्रीश्रीश्रीविनयसूरिविजयराज्ये तत् शिष्यमुनिहेमराजलिखितम् ॥ श्रीअणहल्लपुरपत्तनमध्ये लिखितम् ॥
मुनिवरश्रीकीर्तिरत्नादिवाच्यमानं चिरं नियात(नन्दता)त् ॥श्रीः ॥ कल्याणमस्तु ॥
॥ श्रीश्रीलेखकपाठकयोः ॥ श्रीरस्तु ॥१

[281] **आदिः**— ॥ ॐ ॥ प्रणम्य परया भक्त्या परमान् परमेष्ठिनः ।
कुर्वे हर्षकुलाख्योऽहं भगवत्यङ्गबीजकम् ॥१॥

अन्तः— इति भगवत्याख्यपंचमाङ्गबीजकं समाप्तम् ॥ ग्रं० ४९० ॥ श्रीपण्डित श(शि)रोमणिश्रीतपागच्छे गच्छाधिपतिश्रीहेमविमलसूरिः, तस्य शिष्य-पं० हर्षकुलकृतं बीजकम् ॥ ह० भीमसागर ॥

श्रीनृपविक्रमादित्यसंवत् १६४७ वर्षे शाके १५१२ प्रवर्त्त० श्रावणवदि० १४ भौमे । ग्रं० स्यास्त्र (शास्त्रं) संपूर्ण लषीतं (लिखितम्) । शुभं भवतु ॥

[287] **अन्तः**— संवत् १५८४ वर्षे मार्गशिर वदि १२ दिने बुधवारे श्रीकोरंटकीयगच्छे षा० ... ... ज्ञाताधर्म्मकथाङ्ग लिषापितम् । आचन्द्रार्क्कं नन्द्यात् ॥

[290] **अन्तः**— (मूलादर्शलेखनसमयानन्तरमिदं केनचिद् लिखितम्-)
वरडीया गूजरमल्लजी ज्ञातावृत्तिः एषा ज्ञानवृद्धिहेतवे ज्ञानभक्तिकृते दत्ता पं० नन्दलाल-तत्शिष्यपं० चन्द्रजसाभ्यां श्रीविक्रमपुरे ॥

[291] **वृ० आदिः**— श्रीसरस्वत्यै नमः ॥
मत्वा वीरजिनं शचीशमहितं सज्ज्ञानरत्नप्रदं
मोहोन्मत्तमतङ्गजातिबलवच्छार्दूलसिंहोपमम् ।
अंहोध्वान्तविनाशनग्रहपतिं कर्मारिविध्वंसकं
संसाराब्धिनिमग्नविश्वभविनामालम्बनं निष्क्रियम् ॥१॥
सविद्यागुणदायकां सुमतिदां ध्यात्वा सुरीं भारतीं
श्रीमद्भक्तिविलाससुन्दरमहोपाध्यायशिष्यो मुनिः ।
सिद्धान्तार्थविदां सतामनुचरः कस्तूरचन्द्राभिधः
ज्ञाताधर्मकथाङ्गविवृतिमहं कुर्वेऽर्थशो दीपिकाम् ॥२॥
यद्यपि पूर्वं वृत्तिरस्त्यभयदेवसूरिकृता ।
अनिभिहितार्थसूत्रस्य प्रयासो विधीयतेऽर्थाय ॥३॥

अथेदं ज्ञाताधर्मकथाख्यं षष्ठमङ्गं तस्य पूर्वमभयदेवसूरिकृतवृत्तिरतिगम्भीरैरल्पाक्षरैर्व्याख्याता प्रायः सैवास्ति परं मन्दबुद्धीनामनुग्रहाय तदवशिष्टसूत्रस्य सविस्तरं व्याख्यानमातन्यते—

अन्तः— अथ ग्रन्थकृत्प्रशस्तिः—

पूर्वशासनसुरीदत्तवरैर्नवाङ्गवृत्तिकृद्भिरतिशयज्ञानवद्भिः श्रीमदभयदेवसूरिभिरस्याङ्गस्य प्रदेशतोऽतिगहनपदानां संक्षिप्त[त]रा वृत्तिः कृतास्ति, सापि चास्यामेवान्तर्भूता, अवशिष्टानां पदानां च स्वमत्यनुसारेण सद्गुरूणां प्रसादात् त्वियं दीपिका कृता, तद्विनेयजनानुग्रहाय यत्पुनरावृत्तपदानां भूयोभूयोर्थः कृतस्तन्निरुपयोगिनां महामन्दबुद्धीनामत्यन्तसुखबोधार्थं तेषामिदानीं तथाविधतीव्रतरोपयोगाभावाद् येषां पदानां सकृदर्थः सम्यक् ज्ञातः पुनस्तेषां पदानां व्याख्यावसरे स्मृतिस्तादृशी न भवति बुद्धिहीनत्वात् प्रतिसमयं सर्वेषां हानिरेवेति भगवद्वचनप्रामाण्यात् त्विति ।

गच्छे स्वच्छतरे बृहत्खरतरे प्रोद्यत्प्रतापाधिके
श्रीमच्छ्रीजिनचन्द्रसूरिगुरवो जाता जगद्विश्रुताः ।
श्रीदिल्लीपतिपातसाहयवनो यैर्बोधितो लीलया
दत्ता येन युगप्रधानपदवी हृष्टेन तेषां गुणैः ॥१॥

तेषां च शिष्यः सकलादिचन्द्रो वाचंयमानां धुरि कीर्त्तनीयः ।
तपोविधानादिसुकृत्यपूर्ण आसीत् क्रियावत्सु वरो विनीतः ॥२॥

तच्छिष्यः समयादिसुन्दरमहोपाध्यायमुख्यो गुणी
संवेगात्मकरङ्गरञ्जिततनुर्निःशेषशास्त्रार्थवित् ।
तच्छाखाप्रसृता च नैव विशदा न्यग्रोधवद्विस्तरा
शास्त्रानेकविधायको मुनिवरः ख्यातः पृथिव्यामभूत् ॥३॥

तच्छिष्यो रामचन्द्राह्वः गुणी च धीमतां वरः ।
चारित्राराधकः श्रीमानण(न)गारशिरोमणिः ॥४॥

तत्सद्विनेयो वरपाठकश्च काश्यादिदासः श्रुतसारविद्वान् ।
तच्छिष्यकः ठाकुरसीति नाम्नाऽभूद् वाचकः शास्त्रसुवाचनाकृत् ॥५॥

तच्छिष्यः शीलसंपन्नो वाचकः कीर्त्तिवर्द्धनः ।
विश्वविद्यावतां वर्यः सर्वसिद्धान्तमर्मवित् ॥६॥

तदनु विनयधर्मी वाचनाचार्यमुख्यः
अमरविमलनामा कोविदश्रेणिवन्द्यः ।
सकलमुनिवरीयान् मन्त्रविद्यागरीयान्
गुणजलनिधिभूतोऽभूच्च चारित्रधर्त्ता ॥७॥

वाचको नेमचन्द्राख्यस्तद्विनेयो मुनिर्गुणी ।
कर्त्ता प्रचुरशास्त्राणां हर्त्ता पञ्चशरस्य च ॥८॥

तच्छिष्यो वरवाचको यतिवरो भूमीशमान्योऽनिशं
श्रीमद्भक्तिविलाससंज्ञकभिषक्श्रेष्ठस्तथा दैववान् ।
शिष्यानेकविधायको गुणगणानां स्वामिभूतः किल
विख्यातो भुवि विश्वलोकमहितो वर्वर्त्ति विद्यानिधिः ॥९॥

तच्छिष्यो जयरत्ननामविबुधश्चारित्रधर्मोद्यतः
तन्निर्देशकरो विनेयवचनः कस्तूरचन्द्राभिधः ।
तेनाकारि च दीपिकातिसुगमा षष्ठाङ्गसंबन्धिका
राज्ये श्रीजिनहेमसूरिगणिनां संविद्यमाने सति ॥१०॥

नन्द-नन्द-वसु-भूमि(१८९९)वत्सरे विक्रमार्कनृपवत्सरात् तथा ।
आश्विने च सितपक्षे गुरौ रामचन्द्रजयवासरे शुभे ॥११॥

श्रीमज्जयपुरनगरे प्रारब्धा निजप्रतिभानुसारात् ।
इन्द्रपूर्यां नगर्यां मालवदेशे च सिद्धेयम् ॥१२॥

यावन्मेरुर्धरापीठे यावज्जैनेन्द्रशासनम् ।
वाच्यमाना चिरं तावन्नन्द्यात् जगति दीपिका ॥१३॥

इह हि गमनिकार्थं यन्मया सुहृयोक्तं
किमपि समयहीनं तद्विशोध्यं सुधीभिः ।
न हि भवति विधेया सर्वथास्मिन्नुपेक्षा
दयितु (?) जिनमतानां तायिनां चाज्ञिवर्गे ॥१४॥

परेषां दुर्लक्षा भवति हि [वि]वक्षा स्फुटमिदं
विशेषाद् वृद्धाना[म]तुलवचनज्ञानमहसाम् ।
निराम्नायाधीतिः(ती) पुनरतितरां मादृशजनैः(नः)
त(कु)तः शास्त्रार्थे मे वचनमनयं दुर्लभमिह ? ॥१५॥
ततः सिद्धान्ततत्त्वज्ञैः स्वयमूह्यः प्रयत्न[तः] ।
न पुनरस्मदाख्यात एव ।ह्यो नियोगतः ॥१६॥

[293] **आदिः**— ॥ ॐ ॥
प्रणम्य श्रीमहावीरं स्मृत्वा चैव सरस्वतीम् ।
वन्दे सद्गुरुपादाब्जं स्तवुको किञ्चिदुच्यते ॥१॥
ज्ञाताधर्मकथाङ्गस्य सुखबोधैकहेतवे ।
स्वात्मपरोपकाराय सन्तस्येच्छानुभावतः ॥२॥

अन्तः— इह हि स्तवुके यन्मया किञ्चिन्न्यूनमुक्तं यत्किञ्चित् समयहीनमुक्तं तत्सर्वं सुधीभिः विशोध्य इह श्रुतवतां हास्यास्यदं एषा बालक्रीडेव मया कृता सन्तैः समर्थनीया इति ।

अथ वर्धमानस्वामिपट्टे श्रीसुधर्मास्वामी तदनुक्रमेण श्रीवज्रस्वामी तच्छिष्य-श्रीचन्द्रसूरिरभवत् । तस्माच्चन्द्रकुलोत्पत्तिः । तत्र चन्द्रकुले क्रमागतश्रीचैत्र-गच्छोऽजनि । तस्मिन् चैत्रगच्छे भुवनेन्दुसूरिः तच्छिष्यतत्पट्टे श्रीदेवप्रभसूरीश्वरः येन तपाबिरुदः कृतः । तदनुक्रमेण श्रीवृद्धतपागच्छे संप्रति वर्त्तमानश्रीदेवरत्न-सूरीश्वरपट्टप्रभावकश्रीश्रीश्रीजयरत्नसूरीश्वरविजयमानराज्ये महोपाध्यायश्रीविद्यारत्न-गणिविनयी उपाध्यायश्रीकनकसुन्दरगणिना कृतं श्रीज्ञाताधर्मकथानकस्य स्तवुक-विवरणं किञ्चिन्मात्रं संपूर्णम् ॥
छ ॥ विक्रमात् संवत्सर चन्द्र ... ...॥

[294] **मू०अन्तः**— संवत् १७३३ वर्षे शाके १५९८ प्रवर्त्तमाने ज्येष्ठवदि
स्त०अन्तः— आसुमासे सुक्लदशमीदिने वारशुक्रे ॥

[298] **अन्तः**— लिखितं श्रीवा०जयनिधानेन शिष्य पं० कमलसिंहपठनार्थम् ।

[301] **अन्तः**— संवत् १६६८ वर्षे वैशाखसुदि षष्ठी पुष्यार्कयोगे लिखितम् । श्रीतपागच्छे श्रीविजयसेनसूरिराज्ये पं०देवविजयगणिवाचनार्थम्, अहिमदावादवास्तव्य-ओसवालज्ञातीय-वृद्धशाखाया साह ... पाल भार्याबाई ... मदे पुत्रसाहजेठा-लिखापितम् ।
श्रीदेवविजयविदुषां शिष्यैर्धनविजयगणिमुनि[भिः] ।
श्रीमत्प्रकंदरपुरे चित्कोशे प्रतिरियं मुक्ता ॥१॥

[302] अन्तः— ग्रन्थाग्रम् ८१२॥

श्रीमच्चन्द्रयशोगणिविनेयमाणिक्यचन्द्रगणयोऽमी ।
इदमुदयचन्द्रनाम्ना तच्छिष्याणां कृतेऽलेखि ॥१॥

संवत् १५७५ वर्षे दक्ष(क्षि)णायने हेमन्तऋतौ कार्त्तिकमासे कृष्णपक्षे १३ रवौ लिषापितं वाडीनयरे ॥

[309] अन्तः— इति श्रीउपासकदशाङ्गसूत्रं समाप्तं । ग्रन्थाग्रन्थ ९१२ सूत्रमानम् ।

संवत् १८५६ वर्षे भाद्रपदमासे कृष्णपक्षे लपीकृतं ग्रामे लाटापुलीमधे(ध्ये) पोसालमध्ये वनारसश्री५श्रीनरसिंहजीतत्पदटे रायचन्दजी तत्पटे आचार्यश्री१०८ देवप्रभसूरीजी(सूरि)तत्पटे सि(शि)ष्यगुलाबभाईवीरचन्दपठनार्थं भाई नानजी-लषी(लिखितं) सि(शि)ष्यगुलाबचन्दजी ।

[312] अन्तः— श्रीअन्तगडदशांगशास्त्रं । ग्रन्थाग्रम् ९९९॥

संवत् १५६५ वर्षे आषाढसुदि १ दिने लिषितं तिजारामध्ये अल्लावदीषा-मराज्ये सा०जोगालिषापितं ॥

(अन्यदीयहस्तलिखितम्-)

स्वस्तिश्रीविक्रमसंवत् १६८९ वर्षे । श्रीद्वीपबन्दिरे । श्रीमत्तपागच्छे श्रीज्ञानकोशे श्रीदयाकुशलगणिभिः पुस्तकमिदं प्रदत्तम् ॥

[313] अन्तः— ग्रन्थाग्रम् श्लोकसंख्या ८९० सूत्र० ॥१॥

संवत् १७१९ वर्षे चैत्रवदि १३ दिने गणिश्रीउदयसागर-तत्शिष्यमुनि-वीरमसागरलिषतं(खितम्) ।

[315] अन्तः— ग्रन्थाग्रम् ७९५ ।

-सं० १६२७ आषाढमासे अणखलागडेनेताऽलिखत् (?) ।

[330] अन्तः— ग्रन्थसंख्या १९२ ॥ संवत् १८२७ वर्षे मीतीकार्तिकशुक्ल१०सोमवारे लिपीकृता ॥ श्रीडूंगरिदुर्गे श्रीबहादरसिंघजीराज्ये इदं पुस्तिका लिखित्वा(ता) ॥ शुभं भवतु ॥

[332] अन्तः— ग्रन्थाग्रम् । १२५० ॥ श्री ॥

(हरतालेनाघोलिखितं प्रत्रष्टम्-)

श्रीअञ्चलगच्छे पण्डित पं०श्रीधनसागरगणिय: (?) स(शि)ष्य पं०माणिक्य-सागरमुनिनी प्रसादि प्रति सही ॥

[336] अन्तः— संवत् १६१८ वर्षे वैशाषवदि१४शुक्रे श्रीस्तंभतीर्थमध्ये जोसी शिवजी लिषितम् ।

[337] अन्तः— संवत् १६६६ वर्षे चैत्रवद७ गुरू लखतं पंडया सारणसुत गोपाल लक्षतम् ॥

[342] अन्तः— सकलपण्डितोत्तमप्रवरशिरोमणी पं०श्री१०८श्री-विशेषसागरगणि- तत्शिष्यसकल-पण्डितोत्तमप्रवरशिरोमणिपं०श्री१०७ श्री(? शि)यलसागर-तत्शिष्यपायरजरेणुवत् मुनिव(वि)नीतसागरगणिलिपिकृतम् ।

संवत् १८४९ वर्षे शाके १७१४ प्रवर्त्तमाने मासोत्तममासे आषाढमासे कृष्णपक्षे ४ ती(ति)थौ लिपिकृतम् ॥

[344] **अन्तः** — इति श्रीविपाकश्रुतदशांगं एकारसमं सम्मत्तं । ग्रं० १२१६ ॥
संवत् १५८१ वर्षे फागुणसुदि एकादशी रविवारे लिषितं श्रीमंडपगढमहादुर्गे श्रीतपागच्छनायकभट्टारकप्रभुश्री हेमविमलसूरिविजयराज्ये पूज्याराध्यपं० दानचारित्र-गणि-तत्‌शिष्यपं० सौभाग्यविमलगणि-तत्‌सि(शि)ष्यसौभाग्यचारित्रमुनिपठनार्थम् ॥
लेषकसाहकद्दूआलिषितम् ॥ प्रति राजनागीणीरी छइ ।

[345] **अन्तः**— ग्रन्थाग्रं । १२५० ॥ श्री ॥
संवत् १६१७ वरखे जेष्ठसुदि ११ रवौ लखी(खि)तं बरहानपुरमधे(ध्ये) ।

[347] **अन्तः**— ए ग्रन्थाग्रंथः ९५१ ॥ श्रीः ॥
संवत् १६६५ वर्षे कार्त्तिकवदि १० गुरो लिखितं ऋषिकिसना आत्मार्थि(र्थी) त्रंबावतीनगरे ॥

[349] **पुष्पिका**— स्वस्ति श्रीविक्रमसंवत् १६८९ वर्षे श्रीद्वीपबन्दिरे श्रीमत्तपागच्छाधिराजभ०-श्रीविजयदेवसूरीश्वर-आचार्यप्रभुश्री५श्रीविजयसिंहसूरीश्वरयोर्विजयराज्ये श्रीज्ञान-कोशे पं०श्रीकल्याणकुशलग०शिष्यपं०दयाकुशलगणिभिर्पुस्तकं लक्षमेकं साधिकं वाचनाय प्रदत्तम् । भव्याभि(भव्यै)र्वाच्यमानं सततं चिरं नन्दतात् ॥

[350] **अन्तः**— (अन्यदीय हस्ताक्षरेण लिखितमिदम्-)
संवति १७१८ आषाढमासे शुक्लपक्षे पञ्चम्यां तिथौ श्रीआगरानाम्नि महानगरे वायडगोत्रीयसाह श्रीलक्ष्मीदासपुत्रसाहश्रीसुखदेवेन चिरंलालजीसहितेन पुस्तकमिदं ज्ञानवृद्धयर्थं प्रदत्तम् ॥

[351] **अन्तः**— संवत् १५९९ वर्षे शाके १४६४ प्रवर्त्तमाने कार्त्तिकमासे शुक्लपक्षे ६ षष्ठयां तिथौ शनिवासरे अद्येह श्रीपत्तनवास्तव्यढंढेरकुटुम्बे श्रीश्रीमालज्ञातीय-दोसीधना भार्या अमरादे सुतदोसी लि(ल)क्ष्मीदास-भार्याजीबाईसहितेन श्रीपूर्णि-मापक्षे प्रधानशाखायां श्रीभट्टारकश्रीश्री ४ कमलप्रभसूरि-तत्पट्टे श्रीभट्टारकश्री-६ श्रीपुण्यप्रभसूरीणामुपदेशेन श्रीउवाईउपांगसूत्रं लिषाप्यते । स्वगुरुभ्यः प्रदत्तम् ।

[353] **अन्तः**— ॥ ग्रन्थाग्रं० ११७५ ॥ (पश्चात्कालीनेयं लिपिः-)
प्रेमहंसजी मोतीहंसजी माणेकहंस ॥

[355] **अन्तः**— (हस्तान्तरेण सूचितमिदम्-)
श्रीहीरविजयसूरिशिष्य-पं०कमलविजयग०-शिष्यशिवविजयगणीनी प्रति ॥

[358] **बाला०आदिः**— ॥ ॐ नमो श्रीगुरुभ्यो नमः ॥
प्रणम(म्य) श्रं महावीरं जीवराजं गुरुं तथा ।
औपपातिकसूत्रस्य वार्तिकं किञ्चिदुच्यते ॥१॥

बाला० अन्तः— इति श्रीआचारांगोपांगस्यौपपातिकाख्यस्य वार्त्तिकवृत्तिरूपदुर्गमार्थपद-बालावबोधः समाप्तः ॥
पूज्यमन्त्रं नमस्कृत्य बालानामुपकारकः ।
औपपातिकसूत्रस्य वार्त्तिको विहितो हि यः ॥१॥
इति श्रीमज्जीवर्षिगणिविनेयेन मोल्हकनाम्नौपपातिकसूत्रदुर्गमपदबालाव-बोधः कृतः संवत् १६६२ वर्षे द्वितीयचैत्रमासे कृष्णपक्षे एकादशीचन्द्रे ॥

संवत् १८२२ प०रामानन्दगणि उववाइसूत्र नीवा उजेणनगरमध्ये लिखितं ऋषिश्री५कान्हजीना शिष्य ऋषिचोकापठनार्थम् ।

[359] स्त० आदिः— श्रीपार्श्वनाथ पुरुषादानीनू नमः, नमस्कार हो तिणि कालि चउ आरानइ विषइ । तेण समय तेण प्रस्ताव अवसरनइ विषइ । चंपा एहवइ नामि नगरी, जिहां कर नथी ते, होत्था कहतां हुती, इम कह्यो । ग्रंथाग्रंथ १२००१ श्रीरस्तु ॥ श्रीबीकानेरम० ॥

इति श्रीउववाइउपांगस्य ट्ट(स्त)बुकं समाप्तम् । ए प्रथमोपांग टबउ व(थ)यउ । सूत्रार्थग्रन्थाग्रं० श्लोक ५४०० ॥ संमत(वत्) १९७[०] मीती भाद्रवा भ(व)द ८॥

[360] मू० अन्तः— संवत् १७२२ वर्षे शाके १५८७ प्र० अश्विनि वदि ३ भोमे । श्रीपत्तनमध्ये श्रीपूर्णिमापक्षे प्रधानशाखायां भट्टारकश्रीविनयप्रभसूरिणा लिखितमिति ॥ शिष्यादीनां(दिभिः) वाच्यमानं चिरं नन्द्यात् ॥

स्त० आदिः— प्रणम्य श्रीमहावीरं वक्षे(क्ष्ये) सुगमहेतवे ।
औपपातिकोपांगस्य स्तबकः किंचि(कश्चि)दुच्यते ॥१॥

ग्रन्थाग्रम् ५५२५ । संवत् १७२२ वर्षे शाके पनरसत्यासीआ प्रवर्त्तमाने फागुणमासे सु(शु)क्लपक्षे नवमीतिथौ रविवासरे । श्रीपूनिमगच्छे ॥

[361] स्त० आदिः— वन्दित्वा श्रीजिनं पार्श्वं साधुरत्नं च सद्गुरुम् ।
करोमि राजचन्द्राख्यः आद्योपांगस्य वार्त्तिकम् ॥१॥

स्त० अन्तः— प्रथम उपांगकी पुस्तिका लिषि गोघावीमांहि ।
जेसी थी तेसी लषी वांक हमारो नांहि ॥१॥
इति उववाईउपांगसूत्रसंपूर्णं समाप्तम् ॥

अन्तः— संवत् १८२९ वर्षे भाद्रवमासे कृष्णपक्षे १० तिथौ भौमवासरे त्रतील(तृतीय)प्रहरे संपूर्णं शिवायोगे संपूर्णम् ॥१॥

पण्डितोत्तमप्रवरपण्डितश्री१०८श्री ४ पं०श्रीअजितसागरगणि–तत्सीष्य(तत्शिष्य)पं०श्रीकीर्त्तिसागरगणिः, तत्शिष्यपं०दानसागरग०–शिष्यपंश्रीविबुधसागरगणिः, तत्शिष्यपं०श्रीलाभसागरगणिः, तत्शिष्यपं०दोलतसागरगणिः, तत्शिष्यपं०रामसागरगणिः, तत्शिष्यपं०मानसागरगणिः, तत्शिष्यपं०रूपसागरलिखितं आत्मार्थे गोघावीमध्ये । ग्रन्थाग्रन्थम् ६०० ॥ जादसं(यादशं) पुस्तकं०—

यां लगे मेरू थीर रहे, जयवन्ता ससी भांण ।
त्यां लगे एही ज पुस्तिका, वांचो चतुर सुजांण ॥२॥

[362] मू० अन्तः— श्रीराजनगरे लिपि(पी)कृतं श्रीचिन्तामणिपार्श्वनाथप्रसादात् ।

स्त० आदिः— वन्दित्वा श्रीपार्श्वजिनं पार्श्वचन्द्रं च सद्गुरुम् ।
करोति पायचन्द्राख्य आद्योपांगस्य वार्त्तिकम् ॥
तेणइ काल अवसर्प्पिणी चउथा आरानइ विषइ ॥१॥

स्त० अन्तः— एतलइ श्रीउववाईय उपांगसूत्रनउं अर्थ संपूर्ण । सूत्रवार्तिक मिली सर्व ५००० श्लोक जाणिवा ॥ तैलथिकु पुस्तक विनसइ ॥

संवत् १६८१ वर्षे फाल्गुनवदि ८ रवौ लिखितम् । शुभं भवतु । जेहवुं पुस्तक आदि लषिउं छइ० ।

श्रीनगरमांहि मुख्यनगर श्रीअहमदाबाद ते राजनगर तिहां ग्रन्थ लखाणउ ।

[363] अन्तः— ग्रन्थाग्रं १८५० । संवत् १५६४ लर्षे दक्ष(क्षि)णायने शिशिरऋतौ पौषमासे कृष्णपक्षे पञ्चम्यां तिथौ भृगुवासरे श्रीअणहिल्लपुरपत्तने लिषापितम् ॥

[366] अन्तः— ग्रन्थाग्रम् २१२१ । शुभं भवतु । श्रीमंडोरपासजीप्रसादात् ।

[367] अन्तः— ग्रन्थाग्रम् २१२० । संवत् १५८२ वर्षे मार्गसिरशुदि १ बुधे साहश्रीवच्छासुत-साहसहस्रकिरणेन पुण्यार्थं पुस्तकमिदं गृहीतम् । सुतवर्द्धमानशांतिदासपरि-पालनार्थम् ॥

[368] अन्तः— ग्रन्थाग्रम् २२२० । संवत् १७४५ वर्षे शाके १६१० प्र० अश्विनमासे शुक्लपक्षे सप्तम्यां कर्म्मवाट्यां गुणविजयेन लिखितमिदं पुस्तकम् ।

टबाकारः— श्रीपार्श्वचन्द्रसूरि-पट्टालङ्कारश्रीसमरचन्द्रसूरि-पट्टोय(द्यो)तकारकश्रीराजचन्द्र-सूरिविजयमाने ऋषिश्रीश्रम(व)णस्य शिष्यवाचकमेघराजेन श्रीराजप्रश्नीयसूत्रस्य टबार्थः कृतः । अस्यैव(इयमेव) टीका ग्रन्थान्तरं विलोक्य लिखितमिदं(तेयम्) ॥

[371] मू० अन्तः— इति श्रीराजप्रश्नी[य]सूत्रम् । समाप्तोयं ग्रन्थाग्रम्(ग्रन्थः) २२२० सूत्रम् ।

संवत् १७६२ वर्षे शाके १६२८ प्रवर्त्तमाने प्रथम आसाढशुदि ७ गुरुवासरे लिखितं चेलालब्धिविमलपठनार्थं श्रेयः ।

स्त० अन्तः— श्रीपार्श्वचन्द्रसूरि-पट्टालङ्कारश्रीसमरचन्द्रसूरि-पट्टोद्योतकश्रीराजचन्द्र-सूरिविजयमाने ऋषिश्रीश्रवणस्य शिष्येन वाचकमेघराजेन श्रीराजप्रश्नीयउपांगस्य टबार्थो लिखितः । टबार्थः ३२६८, उभय मिलि ५३९२ । भाद्रपदकृष्णपक्ष ७ भौमवारे टबो संपूर्ण कीधो । श्रीपत्तननगरे दोसीवाडापाटके लिखितं ऋषि धर्मदासेन ।

[372] अन्तः— ग्रं० २२२० ॥ संवत् १६८९ वरिखे कार्त्तिकमासे महिममधे लिखतं ऋषिश्री ५ लाधाजी, तत्‌शिखे(ष्ये)न मुनिसूजालिखितम् ।

[373] अन्तः— संवत् १७६० वर्षे मिती कार्त्तिकशुदि १५ दिने भृगुवासरे श्रीजेसल-मेरमध्ये ।

[374] स्त० अन्तः— इति राजप्रश्नीयस्य टबार्थः संपूर्णः । ग्रन्थाग्रन्थसूत्रार्थ मिली ७००० छे ।

संवत् १८६१ ना वरषे ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ भृगुवासरे श्रीभुजनगरमध्ये त्रवाडी श्रीछगनजीसुत-हरदेवेनेदं सूत्रं राजप्रश्नीयं संपूर्ण लिखितम् ।

[378] अन्तः— संवत् १६७२ वर्षे चैत्रसितात् श्रीअणहिल्लपत्तननगरमध्ये लिखापिता ।

[379] अन्तः— संवत् १६२९ वर्षे कार्त्तिकवदि ५ शुक्रे मृगशिरनक्षत्रे श्रीअंचलगच्छे

श्री ५ धर्ममूर्तिसूरिविजयराज्ये श्रीमेवातमंडले ... बरकोटनगरे श्री...ल[क्ष्मी ?]उपाध्याय-स(शि)ष्यमु० माणिकराजेन लिषितं श्रीसूत्रं जीवाभिगमं स्वज्ञानावरणं.[य]कर्मक्षमापनाय ।

[380] अन्तः—संवत् १६१० वर्षे पोसमासे शुक्लपक्षे पञ्चम्यां तिथौ गुरुवासरे अद्येह श्रीश्रीमालज्ञातीयसुगन्धीकुटुम्बे से० हांसा-भार्यासुश्राविकासिरीआदे-पुत्र ३-धनजी १ कूवरजी२, शिवजी३पुत्रकुटुंबसहितैः से० सीचाकेनउपांगश्रीजीवाभिगमसूत्रं लिषाप्य श्रीपूर्णिमापक्षे प्रधानशाखायां भट्टारकपूज्यश्री ५ भुवनप्रभसूरिः, तत्पट्टे भट्टारकपूज्यश्री५कमलप्रभसूरिः, तत्पट्टे भट्टारकश्री५पुण्यप्रभसूरीणामुपदेशेन लिषाप्य स्वगुरुभ्यः प्रदत्तं वाच्यमानं चिरं जीयात् ।

[382] अन्तः— इति श्रीमलयगिरिविरचिता श्रीजीवाभिगमवृत्तिः समाप्ता । संवत् १९६४ रा मिती फागुणसुदी ६ रवीवारे । ली० व्यास कीस्तुरचन्द । ग्रन्थाग्रम् १९००० ॥

[383] स्त० आदिः— श्रीजिनाय नमः ॥

श्रीवीरं जिनं नत्वा केवलज्ञानभास्करम् ।
जि(जी)वाभिगमसूत्रस्य टबार्थः किंचि(कश्चि)दुच्यते ॥१॥

ऋ० अखैराजमुनि चतुर्मासइं श्रीजैसलमेरनगरे लिपी० ॥

[387] अन्तः— संवत् १६११ वर्षे ज्येष्ठसुदि ७ सोमे अद्येह श्रीपत्तनवास्तव्यः श्रीश्रीमालज्ञातीयसुगन्धीकुटुम्बे सुगन्धी नाथा-सुतश्रेष्ठिहांसा-भार्यासुश्राविका-हांसलदे-पुत्र ४ श्रे० सूरिचन्द्र-से० सीचा-से० मेघा-सि० सिंधुसमस्तकुटुम्बयुतैः से० सीचाकेन श्रीपूर्णिमापक्षे प्रधानशाखायां भ० श्रीभुवनप्रभसूरि-तत्पट्टे भ० श्रीश्रीकमलप्रभसूरि-तत्पट्टे भ० श्री ५ पुण्यप्रभसूरीश्वराणां उपदेशेन श्रीपन्नवणाउपांगसूत्रं लिषाप्य स्वगुरुभ्यः प्रदत्तम् । वाच्यमानं चिरं जीयात् ।

[388] अन्तः— संवत् १५६५ संवत्सरप्रवर्त्तमाने दक्षिणायने शरदृतौ भाद्रपदमासे कृष्णपक्षे चतुर्थ्यां तिथौ रविवासरे श्रीअणहिल्लपुरपत्तने लिखापितम् ॥

श्रीश्रीमालज्ञातीयश्रेष्ठिसहिजा-भार्याअदकूसुतेन श्रेष्ठिहरषाभिधेन प्रज्ञापनोपांगसूत्रं लिषाप्य स्वपुण्यार्थं परोपकाराय च श्रीपूर्णिमापक्षे प्रधानशाखायां श्रीभुवनप्रभसूरीणां प्रदत्तं चिरं नन्द्यात् ।

[391] मू० अन्तः— संवत् १८९४ रा वर्षे मि० चैत्र सुदि २ तिथौ भृगुवासरे ॥

टी० अन्तः— लि० गुसांई शंकर जती श्रीविक्रमपुरमध्ये ।

[392] स्त० रम्भः— प्रणम्य पुण्यं पदपद्मयुग्मं श्रीमन्महावीरजिनेश्वरस्य ।
कुर्वेऽल्पबुद्धेः सुखबोधरम्यं प्रज्ञापनायाः स्तबुकार्थमुच्चैः ॥१॥
मलयगिरिसूरिविरचितवृत्त्यनुसारेण जीवविजयाह्वः ।
लोकानुभाषयाऽहं कुर्वे प्रज्ञापनास्तबुकम् ॥२॥

मन्दधिया वृत्ती(? ति)भ्यः कठिनाभ्योऽर्थस्य ... ।
सुजस(? सुवाच्यं) नैव भवेत् ... ॥३॥

[393] **अन्तः**— नमोऽस्तु वर्द्धमानाय नमः श्यामार्य्यसूरये ।
नमः सत्संप्रदा[या]य नमः सद्गुरवेऽनिशम् ॥१॥
श्रीमद्वाचकवंशमौलितिलकः श्यामार्यनामा प्रभु-
र्जीयात् पूर्वविदां वरः कलियुगे संभाव्य पूर्वच्युतिः(म्) ।
निर्मथ्य श्रुतसागरं भगवता प्रज्ञापनारत्नकं
येनाविष्कृतमल्पमर्थबहुलं बोधाय भव्यागता(? व्यांगिनाम्) ॥२॥
प्रज्ञापनारत्नमिदं महार्थं वृत्त्यापि दुर्बोधमिति(? मतीव) मत्वा ।
तन्द्रावतामल्पधियां सुखाय बोधाय तस्य स्तबुकः कृतोऽयम् ॥३॥
श्रीमत्तपामुख्यगणाधिराजाः सूरीश्व(श्व)राः श्रीविजयादिदेवाः ।
आसंस्ततः सर्वगुणोपपन्ना आचार्यवर्या विजयादिसिंहाः ॥४॥
तेषां पुण्यपदाम्भोजलुठद्रोलम्बसंनिभाः ।
विद्वांसो गजविजया विद्याख्यातिविभूषिता[ः] ॥५॥
तेषां मुख्याः सि(शि)ष्याः गुणविजयाख्याः प्रकृष्टगुणकलिताः ।
विबुधश्रीहितविजया[ः] सुविदितचिन्तामणिप्रथिताः ॥६॥
तत्पदपङ्कजमधुपाः ज्ञेयाः श्रीज्ञानविजयनामान[ः]
तच्चरणाब्जसपर्यानिष्णातो जीवविजयबुधः ॥७॥
तेन मया स्तबुकार्थो विहितः प्रज्ञापनाख्यसूत्रस्य ।
श्रीमद्विक्रमभूपात् कृत-वसु-मुनि-चन्द्रमिति(१७८४) वर्षे ॥८॥
टीकानुसारेण पुरो पद्य... ... ... ।

[395] **बाःआदिः**— श्रीगुरुभ्यो नमः ॥
प्रणम्य श्रीमहावीरं नत्वाऽशेषसुरेश्वरम् ।
प्रज्ञापनाख्यसूत्रस्य वक्ष्येऽहं लोकवार्त्तय(तया) ॥१॥
शान्तिसूरिबृहट्टीकादयो ग्रन्था मनोहराः ।
तथापि स्वपरशिष्याणां विनोदार्थं करोम्यहम् ॥२॥
अन्तः— इति पन्नवणा-सर्वसूत्रसमाप्तम् ॥
संवत् १९२० का मीती पोह(पौष) सुद १० वार सोमवार ॥

[396] **अन्तः**— समर्थिता प्रज्ञापनाटीका ग्रन्थाग्रम् १६००० ।
स्वस्ति श्रीजिनाय । संवत् १६०९ वर्षे चैत्र सुदि ५ दिने अद्येह श्रीपत्तनमध्ये श्रीश्रीमालज्ञातीयसुगन्धीकुटुम्बे श्रे०माथा-भा०नामलदे-सुत श्रे० हांसा-भार्यासुश्राविकाहांसलदे-पुत्र ४ श्रे० हरिचन्द्र १-से०सीचा २-से० मेघा ३-से०सिन्धू ४ पुत्रपौत्रमातृकुटुम्बसहितेन से०सीचा-भार्यासुश्राविका-सिरीयादे-पुत्रधनजी१-कुंवरजी २-शिवराजसहितेन सिरीयादेविनाम्न्या सुपुण्यार्थं श्रीप्रज्ञापनोपांगवृत्तिं लिखाप्य स्वपु(गु)रुश्रीपूर्णिमापक्षे प्रधानशाखायां भट्टारक-पूज्यश्री५भुवनप्रभसूरिः, तत्पट्टे भट्टारकप्रभुपूज्यः श्री ५ कमलप्रभसूरिः, तत्पट्टे

भट्टार[क]पूज्यश्री ५ पुण्यप्रभसूरीश्वराणामुपदेशेन पन्नवणावृत्तिं लिखाप्य श्रे० सीचा–भा०सिरीयादे उभाभ्यां लिखाप्यास्य गुरुन्य(रवे) प्रदत्तं, वाच्यमानं चिरं नन्दतु ।

[405] **अन्तः—** इति श्रीसूर्यप्रज्ञप्तिः समाप्ता । ग्रन्थाग्रम् २२०० ॥

संवत् १६५४ वर्षे माघमासे शुक्लपक्षे १३ तिथौ श्रीविक्रमनगरे । श्रीमद्बृहत्खरतरगच्छे श्रीजिनभद्रसूरिसंताने श्रीकमलसंयममहोपाध्यायानां शिष्य-श्रीमन्मेरुमहोपाध्यायानां शिष्यपं०श्रीमहिमसारगणीनां शिष्यमुख्य पं० श्रीरंग-वर्द्धनगणिवराणां शिष्यशिरोमणिप्रवरगुणमणिपं०श्रीकल्याणसागरगणीनां शिष्येण पं०राणाभिधेन मुनिनाऽलेखि प्रतिरियं वाच्यमाना चिरं नन्दतात् स्वपुण्यहेतवे लिखिता ॥

[407] **अन्तः—** इति चन्दपण्णत्ती सम्मत्ता, ग्रन्थाग्रम् १८५४ ॥

संवत् १५७० वर्षे चैत्रवदि १० बुधे लिखितम् ॥

(अन्यदीयहस्तेन लिखितमिदम्—)

उ० श्रीनन्दिविजयगणिशिष्यपं०श्रीविमलविजयगणिनी प्रति ॥

[409] **अन्तः—** इति जंबूद्दीवपण्णत्ती सम्मत्ता । ग्रन्थाग्रम् ४१५४ ॥

संवत् १७३० वर्षे कार्तिकमासे कृष्णपक्षे चतुर्थ्यां शनिवासरे रोहिणी-नक्षत्रे पूज्यपरमपूज्यप्रवरपण्डितश्रीमल्लुंकागच्छे स्थिवरऋषिश्री ५ झांझ-णजी–शिष्यपूज्यतपस्वी ऋषिश्री ५ पांचाजी–तत्शिष्यलिखितं बल्ल ग्रामपरबतसर-मध्ये ॥ तज्ज्ञैः संशोध्य वाच्यम् । कौरिकपत्र कोटेचा सा० तिलोकसी प्रदत्ता ।

[412] **अन्तः—** इति श्रीमत्तपागणगगनांगणगगनमणि(णी)समान–श्रीविजयदानसूरीश्वर–शिष्य-श्रीहीरविजयसूरिविरचितायां श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तौ ज्योतिष्कवक्तव्यताधिकार-प्रतिबद्धश्चतुर्थोऽधिकारो व्याख्यातः ॥

[414] **स्त० आदि—** श्रीपार्श्वनाथाय नमः । श्रीसरस्वत्यै नमः ।

श्रीसिद्धार्थनराधिप[:] कुलाम्बरो[द्]द्योतनैकतिग्मांशौ(शुः) ।
सर्वसुरासुरभासुरं(? र)शेषरसंघट्टितांह्रिश्च ॥१॥

अन्तः— इति श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रस्य गणिजीवविजय(येन) टबाकृतं संपूर्णम् ।

इति श्रीजंबूद्वीपप्रज्ञप्तिसंपूर्णं सकलभट्टारकपुरन्दर–शिरोमणिदिवाकर-समानभट्टारकश्रीसहस्र १ अष्टअधिकश्री १०८ श्रीविजयदेव[सूरी]श्वरजी, तत् शिष्यश्रीमहामहोपाध्यायसरव(सर्व)वगुणालंकृत्यं(त) उपाध्यायजी श्री १०८ श्रीशिर-सेहरा सकलवाचकशिरोमणिश्री उ०श्रीलावण्यविजयगणीनां शिष्यचरणसेवितसकल-वाचकशिरोमणिश्री १०५ श्रीउपाध्यायजी श्रीरत्नविजयगणीनां तत्शिष्यश्री पं० श्री १०१ श्रीपण्डितोत्तमसकलपण्डितशिरोमणिपं०श्रीखिमाविजयगणीनां, तत्शिष्यसकलपंडितशिरोमणिपंडितश्री ९९ श्रीनेमविजयगणीनां पाया(द)रजोरेणु-समानपण्डितश्रीग्या(ज्ञा)नविजयग०लखितं श्रीयं(श्रेयः) ।

[415] अन्तः— इति श्रीजंबूद्वीपप्रज्ञप्तिसूत्रं समाप्तम् । ग्रन्थाग्रन्थम् ८१८६ श्लोकाः । श्लोकसंख्या १५००० मानम् ।

श्रीमत्तपगच्छेशाः सूरिश्रीविजयदेवनामानः ।
आसंस्तेषां पट्टे सूरिश्रीविजयसिंहाख्याः ॥१॥
तेषां शिष्यप्रवराः कोविदकुलमौलिशेखरसदक्षाः ।
श्रीमज्जयविजयाख्याः बहुश्रुता विश्रुता जगति ॥२॥
तेषां शिष्याः प्रथमाः पण्डितगुणविजयसंज्ञि(ज्ञया) ख्याताः ।
विद्वांसो हिमविजया बुधजनविदेवो(? दिता)ऽद्वितीयास्ते ॥३॥
तेषां विनेयमुख्याः प्रज्ञाः श्रीज्ञानविजयनामानः ।
तत्पदपङ्कजमधुकृत्विनयासु(नेयेषु) जीवविजयगणिः ॥४॥
तेन मया श्रीजंबूद्वीपप्रज्ञप्त्युपांगसूत्रस्य ।
स्तबुकार्थः संक्षेपाद् विनिर्मितः स्वपरबोधाय ॥५॥
संवति गगन-मुनीश्वर-मुनि-शशि(१७७०)वर्षेषु कार्त्तिके मासे ।
सितपक्षे सप्तम्या तिथौ च वाचस्पतौ वारे ॥६॥
सूत्रार्थोयं यद्वयलीको मया संविहितो च यत्र तत् ।
मयि कृपां संविधाय शोधितव्यः स कोविदैः ॥७॥ इति प्रशस्तिः ॥

इति श्रीजंबूद्वीपप्रज्ञप्त्युपुांगसूत्रटबार्थः । संपूर्णमिति । संवत् १७९७ वर्षे वैशाखमासे शुक्लपक्षे १ प्रतिपद(त)तिथौ बुधवारे । भट्टारकजंगमयुगप्रधानश्री५श्रीजिनराजसूरिजी शिष्यवाचकमानविजयगणि-शिष्यवाचकश्रीकमलहर्षगणि-तत्शिष्यश्रद्‌यासागरगणि-तच्छिष्यवा०ज्ञानप्रभगणि-शिष्यदेवविमलसहितेन लिखितम् । श्रीगारबदेसरमध्ये लिखिता प्रतिरियं शुभं भूयाल्लेखक-पाठकयोः ।

[417] अन्तः— बृहत्खरतरगच्छावतंसश्रीजिनहंससूरिशिष्यश्रीपुण्यसागरमहोपाध्यायविरचिता श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तिः समाप्ता ॥

श्रीमच्चन्द्रकुले सुधर्मगणभृत्पट्टानुपूर्वीभवा
श्रीउद्‌योतनसूरयः समभवन् ज्ञानक्रियाशालिनः ।
ध्यानाराधितनागराट्प्रकटितश्रीसूरिमन्त्रस्फुर-
न्माहात्म्या गुरवस्ततो रुरुचिरे श्रीवर्द्धमानाभिधाः ॥१॥
श्रीमद्दुर्लभभूमिवल्लभसभाध्यक्षं पुरे पत्तने ।
वर्षे पुष्करदिग्गजात् ख-[व]सुधा(१०८८)संख्ये सुसंख्यावता ।
जित्वा चैत्यनिवासिनः खरतरेत्याख्यां समासादया-
मासे येन जिनेश्वरः स भवतात् सूरीश्वरः श्रेयसे ॥२॥
संवेगरंगशाला विनिर्ममे यैः कथानकरसाला ।
तेऽभूवन् जिनचन्द्राः सूरिवराः प्रणतनरचन्द्राः ॥३॥

गुरुगमनयभङ्गीसंगरङ्गान्नवाङ्गी-
नवविवृतिविधानव्यक्तविस्फारकीर्त्तिः ।
सुगुरुरभयदेवः स्तंभनाधीशपार्श्व-
प्रकटनपटुरासीच्चक्रवर्त्ती बुधानाम् ॥४॥

चामुंडिकाप्रकटबोधनबद्धकक्षाः
सूत्रोक्तमार्गभणनाच्चरणैकदक्षाः ।
चित्ते वसन्तु जिनवल्लभनामधेयाः
सूरीश्वरा भुवनभासुरभागधेयाः ॥५॥

येषां रैवतकाचले कृततपः श्रीनागदेवाभिध-
श्राद्धाराधितयाऽम्बया किल युगप्रधानत्वमाविःकृतम् ।
श्रीजैनेन्द्रमतप्रकाशनपटुप्रागल्भ्यलक्ष्मीजुष-
स्ते श्रीमज्जिनदत्तसूरिगुरवो यच्छन्तु मे वाञ्छितम् ॥६॥

तत्पदकमलमरालं ददतं फलमतुलमीप्सितविशालम् ।
नरमणिमण्डितभालं स्तवीमि जिनचन्द्रसुरसालम् ॥७॥

भूभृत्सभामध्यम[धा]ध्यगच्छद् वादेषु षट्त्रिंशतियं(कं) जयश्रीः ।
अभूत् स विद्वज्जनवृन्दचक्री ततस्ततःश्रीजिनपतिसूरिः ॥८॥

श्रीमज्जिनेश्वरगुरुं जितवादियोधं
सूरीश्वरं तदनु नौमि जिनप्रबोधम् ।
श्रीजैनचन्द्रसुगुरुं नुतनिर्विशेषं
सद्देशनाकृतचतुर्नृपतिप्रबोधम् ॥९॥

यत्संस्मृतिप्रवणमानसमानवाना-
माविर्भवन्ति भुवि सर्वसुखप्रतानाः ।
प्रत्यूहसंहतिभुजङ्गमवैनतेयं
सूरिं जिनादिकुशलं तमहं भजेयम् ॥१०॥

जिनपद्मसूरिराजं जिनलब्धिगुरुं नतोत्तमसमाजम् ।
जिनचन्द्रं निर्व्याजं जिनोदयं नौमि जिनराजम् ॥११॥

पट्टे तदीये जिनभद्रसूरिः सौभाग्यभाग्यैकनिधिर्दिदीपे ।
सूत्रार्थजाम्बूनदसत्परीक्षाकषोपपन्नप्रविशुद्धबुद्धिः ॥१२॥

निरुपमप्रतिभाप्रतिभासनः स जिनचन्द्रविभुः शुभवासनः ।
तदनु तस्य प्रशस्यगुणोदधिर्जिनसमुद्रगुरुः सुपदं दधिः ॥१३॥

तदीयपट्टाम्बुजराजहंसाः सुरप्रसादाप्तजनप्रशंसाः ।
विचक्षणश्रेणिशिरोवतंसाः कृतोल्लसन्मुक्तिरमाशिरंसाः ॥१४॥

वैधर्मे प्रथमानस्य दीपिकार्थप्रदीपिका ।
ते जिनहंससूरीन्द्राः जीयासुर्गुरवो मम ॥१५॥ युग्मम् ।

तत्पट्टलक्ष्मीतिलकानुकारा बभूवुरद्दामगुणैरुदाराः ।
सूरीश्वरा लब्धनरेन्द्रमानाः श्रीजैनमाणिक्यवराभिधानाः ॥१६॥

तत्पट्टोदयशैलराजशिखरप्रद्योतनद्योतिनो
राजन्ते जिनचन्द्रसूरिगुरवस्ते सांप्रतं भूतले ।
यत्प्रौढप्रगटप्रतापमहिमामुद्वीक्ष्य विस्तारिणीम् ।
प्रोन्मादिप्रतिवादिकौशिककुलं त्रस्तं समस्तं क्षणात् ॥१७॥

संप्राप्य तदाशिषं श्रीजिनहंससूरिशिष्यवरैः ।
श्रीपुण्यसागरमहोपाध्यायैरल्पमतिगम्या ॥१८॥
एषा जंबूद्वीपप्रज्ञप्तेर्वृत्तिरादराद् विदधे ।
श्रीमत्पार्श्वजिनेश्वरनिजगुरुविशदप्रसादवशात् ॥१९॥
श्रीअभयदेवसूरि-श्रीमन्मलयगिरिकृतविविधवृत्तीः ।
सम्यग्विचार्य बुद्धया विलोक्य चान्यानि शास्त्राणि ॥२०॥ त्रिभिः कुलकम् ॥

वाचकाः पद्मराजाख्या अत्र साहाय्यकं विदधुः ।
तथा विशुद्धिमेतस्या युक्तायुक्तविवेचकाः ॥२१॥
आलस्यमपास्य निजं प्रथमादर्शे लिलेख सोल्लासम् ।
वृत्तिमिमां सन्महिमां विशुद्धधीर्ज्ञानतिलकगणिः ॥२२॥
मोहाद् यदत्राभिहितं विरुद्धं सत्संप्रदायस्य वियोगतो वा ।
दयालुचित्तैहृदयालुभिस्तन्मात्सर्यमुत्सार्य विशोधनीयम् ॥२३॥

श्रीमज्जेसलमेरुदुर्गनगरे श्रीभीमभूमीपतौ
राज्यं शासति बाण-वारिधि-रस-क्षोणि(१६४५)मिते वत्सरे ।
पुष्यार्के मधुमासि शुक्लदशमीसद्वासरे भासुरे ।
टीकेयं विहिता सदैव जयतादाचन्द्र-सूर्यं भुवि ॥२४॥

पञ्चदशसहस्राणि द्वे शते पञ्चसप्ततिः ।
प्रायेणास्या ग्रन्थमानं प्रत्यक्षरनिरूपणात् ॥२५॥ ग्रन्थाग्रम् १५२७५ ॥

संवत् १६५२ वर्षे ॥ राउलश्रीभीमविजयराज्ये युगप्रधानश्रीजिनचन्द्रसूरिसूरीश्वरविजयराज्ये आचार्यश्रीजिनसिंहसूरियौवराज्ये श्रीपुण्यसागरमहोपाध्यायानामुपदेशेन श्रीऊकेशवंशे श्रीशङ्खवालगोत्रे सा०कोचरसंताने सा०राजा-तत्पुत्रसा०-खीरंग-तत्पुत्रसा०रतनसी-सा०जइतसी-तत्पुत्रसा०थिरराजसुश्रावकेण स्वपितृश्रेयोर्थं ज्ञानभक्त्यर्थं च श्रीजेसलमेरुसत्कज्ञानकोशे श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तिरेषा लेखिता । सा वाच्यमाना चिरं नन्दतु । शुभं भवतु ॥

[419] अन्तः— इति सकलसुविहितसैद्धान्तिकशिरोरत्नालंकारश्रीपार्श्वचन्द्रसूरि-तच्छिष्यश्रीविजयदेवसूरि-श्रीब्रह्ममुनिविरचितायां श्रीजम्बूद्वीपप्रज्ञप्तिटीकायां ज्योतिश्चक्रादिविचाराधिकारः समाप्तः परिपूर्णः ।

श्रीसाधुरत्नाभिधपंडितेशाः स्वकीर्तिविद्योतितसर्वदेशाः ।
यथास्थितं जैनमतं जनानां प्रकाशयन्तः सुखदा अभूवन् ॥१॥

तदीयपादाम्बुजयुग्ममृङ्गास्त्यक्ताखिलारम्भपरिग्रहौघाः ।
जयन्ति संवेगसुधैकपानाः श्रीपार्श्वचन्द्राभिधसूरयोऽमी ॥२॥

सूत्रं समालोक्य गुरोरर्थं यैः प्रकाशितः श्रीजगदीशपन्थाः ।
यमाश्रिता भव्यजना लभन्ति सुखं सुखानां परमश्रितांतम् ॥३॥
ये वादिनः कर्कशतर्कविस्तिलब्धाः स्वभिन्नानबुधान् विदन्ति ।
विलोक्य विद्यादिगुणैः समेतानेताञ्जतास्तेऽपि भवन्ति सद्यः ॥४॥
एतेऽर्हतां चैत्यमुदाहरन्ति मुक्त्यर्थिभिर्मुक्तिनिमित्तमर्च्यम् ।
पुष्पादिपूजां चरितादिवादैः प्रकाशयन्तो न निषेधयन्ति ॥५॥
गीतार्था जिनशासने बहुतराः सन्त्येव साहित्ययुक्–
षट्तर्कीपरितर्ककर्कशतमप्रज्ञाबलोल्लासिनः ।
किन्त्वेतैः सदृशो न कोपि भुवने दृष्टः श्रुतो वा कृती
विज्ञाश्चेदनृतं वदाम्यहमिदं तत् कथ्यतामेष मे ॥६॥
तेषां गुरूणां गुणसागराणां श्रीपार्श्वचन्द्राभिधसूरिराजाम् ।
शिष्योस्त्ययं ब्रह्ममुनिर्विपश्चिच्चुलुक्यवंशोद्भवराजपुत्रः ॥७॥

इतश्च—
भुवि भूषणं जनपदो जयी गुर्जराभिधोऽनहिल्लपुरपत्तनं जयति नाम्ना परम् ।
स्फुरद्वरजिनालयैर्जिनवरेन्द्रपूजामिलन्महाजनमनो धनप्रमदपूरसंपूरकैः ॥८॥
टीकेयं तत्र कृता ब्रह्मविदा ब्रह्मसाधुनानेन ।
श्रीमज्जम्बूद्वीपप्रज्ञप्तेर्मतिमतामुचिता ॥९॥
यद्यपि जम्बूद्वीपप्रज्ञप्तिर्बहुतया गभीरार्था ।
व्याकर्तुमिह न शक्या विबुधैरपि किं पुनर्मनुजैः ॥१०॥
अर्थस्तथापि कथितो मया यदस्याः सुतुच्छमतिनापि ।
निजगुरुकरुणापूर्वाचार्यग्रन्थप्रभावोऽयम् ॥११॥

श्रीमद्विजयदेवाख्याः सूरयो विजितारयः ।
ये क्षमाराजिता नित्यमक्षमाराजिता भुवि ॥१२॥
धर्मस्नेहधरैरेषा शोधिता यत्नतोति(? पि)तैः ।
न्याय-लक्षण-साहित्यप्रमृतिग्रन्थपारगैः ॥१३॥
जिनवरवचनविरुद्धं किमपि मया यत् प्रमादतो भणितम् ।
संशोध्यं विबुधवरैर्मिथ्या मे भवतु तद् दुरितम् ॥१४॥ त्रिभिर्विशेषकम् ॥
खेदः कोपि न तत्र नः खलजनो निन्दत्ययं यत्कृतिं
हर्षो नाप्यथवा स्वभावसुजनः स्तौति प्रकृत्यैव यत् ।
किन्त्वेतद्गुणभूषणे दृढतरे जातस्य एव स्तुति–
र्निन्दा वा भवतीह या मतिमतामेषैव मोदादिकृत् ॥१५॥

इति श्रीविजयदेवसूरिचरणप्रसादरचिता श्रीजम्बूद्वीपप्रज्ञप्तिटीका समाप्ता ।
संवत् १६०३ वर्षे कार्तिकवदि ३ बुधे लिखितं, म०राम-सुतमेघ-
लिखितम् ॥

[422] अन्तः— वसु-लोचन-रवि(१२२८)वर्षे श्रीमत्श्रीचन्द्रसूरिभिर्दृब्धा ।
आभड-वसाकवसतौ निरयावलिशास्त्रवृत्तिरियम् ॥१॥
मथुरायामुपांगपंचकस्य वृत्तिर्लिखिता ॥
संवत् १६११ वर्षे चैत्रमासे कृष्णपक्षे लिखितम्, ग्रन्थ० ३०१ ॥

[424] अन्तः— लिखितं गणिरामविजयेन निर्जरार्थम् ।
संवत् १६५० वर्षे मार्गशीर्षसितद्वितीया गुरौ श्रीमति वीरमग्रामे ॥

[429] अन्तः— सं० १८०५ वर्षे वैशाषमासे शुक्लपक्षे त्रयोदश्यां भृगुवासरे
पू०ऋषिश्री ५ जेसिंघजी–तत्शिष्यलि०ऋ०फत्ता । वै०लिषमीचन्दवाचनार्थे ॥

[438] आदिः— ॥ नमः श्रीवर्द्धमानाय ।
त्रैलोक्यप्रकटप्रभावशुभगं भूष्णुप्रभं शोभते
ज्योतिर्यस्य स विश्वशस्यमहिमा श्रीवर्द्धमानः प्रभुः ।
सिद्धार्थान्वयवार्द्धिवर्द्धनविधुर्बन्धूकबन्धूल्लस-
त्पादाम्भोजनखद्युतिर्वितरतु श्रेयः सतां वत्सलः ॥१॥
निस्तन्द्रमुनिचन्द्राय समुद्राय शुभाम्भसाम् ।
नमः श्रीवीरभद्राय भद्राध्यासितबुद्धये ॥२॥

अन्तः— तथाहि इति उल्लेखो जितप्रमादमहारिश्चासौ वीरभद्रश्च जितप्रमादमहारि-
वीरभद्रस्तस्येदं तदेवोक्तलक्षणमध्ययनमध्यायेत्यादि शेषं पूर्ववत् ।
अथ गुरुसंप्रदायः–श्रीवीरजिनवरसत्कचतुर्दशसहस्रसाधुमध्यवर्तिश्रीवीरभद्र-
साधुकृतं चतुःशरणाख्यप्रकीर्णकमित्यर्थः । उक्तं च—
चउदसयसहस्साइं पयन्नाणं तु वद्धमाणस्स ।
सेसाण जत्तिया खलु सोस पत्तेयबुद्धा वा ॥
समाप्तं चतुःशरणाध्ययनविवरणम् ॥ ग्रन्थाग्रम् १०८० ॥

[440] अन्तः— परमगुरुभट्टारकश्रीसोमसुन्दरसूरिविरचिता संपूर्णा । श्रेयः सकलभट्टारक-
पुरन्दरभट्टारकश्री१०८श्रीश्रीआनन्दविमलसूरिस्तत्शिष्यश्रीपर्वतऋषिः तत्शिष्यः
पं० माणिक्योदयगणिस्तत्शिष्यपं०श्रीहर्षसोमगणिस्तत्शिष्य-पण्डितचक्रवर्तिचूडा-
मणिपण्डितश्री५ श्रीऋद्धिसोमगणिस्तत्शिष्यपण्डितोत्तमपण्डितश्री५श्रीलब्धिसोमगणि-
स्तत्शिष्यसकलगणिगणावतंशा(सा)यमानगणिश्री५श्रीललितसोमगणिस्तच्छिष्यसकल-
गणिगजेन्द्रगणिश्री५श्रीअमृतसोमगणिशिष्यमुनिवृद्धिसोमेन लिपीकृतं श्रीमदवन्तीपुरे
संवत् १७५८ वर्षे शाके १६२३ प्रवर्तमाने मधुमासे १३ शुक्ल ज्ञवासरे शुभं
भवतु श्रीः स्तात् ।

[443] मू० अन्तः— संवत् १६२६ वर्षे फागुणवदि चतुर्दश्यां शनिवासरे मीयापुरस्थानस्थेन
पं०हेमसिंहमुनिना लिलिखे स्ववाचनाय । शुभमस्तु ॥

[451] स्त० आदिः— ॥ ॐ श्रीवीतरागाय नमः। चउसरणअध्ययनमंगलरूप छें। एटला मार्टे भावमंगलरूप ६ कहवा।

अन्तः— क० मोक्षना सुखनुं ६४ ॥ इति श्रीचउसरण अरथ संपूर्ण-समाप्तम्।

[452] अन्तः— लिखितं पं०शिवचन्दखरतरेण ॥

संवत् १७७३ वर्षे माग[सि]र सुदि २ सोमवासरे।

बा० अन्तः— ए श्रीवीरभद्रप्रणीत-रचित चोसरण प्रकरण संपूरणम् ॥

श्रीगुर्ज्य(र्ज्ज)रदेशे श्रीअहंमदावादनगरे श्रीबृहत्खरतरगच्छे शुश्राव[क]पुण्यप्रभावि-(व)कसाहप्रेमचन्द तस्य भार्यापठनार्थं लिखितमस्ति ॥

[453] मू० अन्तः— अंचलगच्छे मुनि कीकाल(लि)खितं श्रीस्तंभतीर्थे ॥ संवत् १६९७ वर्षे फागण वदि ३ थावरवारे ॥

स्त०अन्तः— इति श्रीचउसरणअध्ययनलवलेस टबार्थं लिख्यु छइ ॥ श्रीअंचलगच्छे मु०श्रीवैराग्यसागरलिखितं थंभायतबिंदिरे।

संवत् १६९७ वर्षे फागुणवदि ८ गुरौ वारे लिखितम्।

स्त०अन्तः— सं० १९३७ ना आसाढमासे शुक्लपक्षे ११ गुरुवारे श्रीराजनगरमध्ये लि०लैया माडवाडि ब्राह्मण पुष्करणा कला गुमानीरांमना पुत्र शिवदांन ॥

(प्रान्तेऽन्यदीयहस्तेन लिखितमेकविंशतिः श्रावकगुणस्थानवर्णनम्।)

[457] अन्तः— संवत् १९४६ ना आसोज सुदि शुक्रवारे जैनशालामध्ये लिपिकृतं बारोट० हरीभाई मालजी पठनार्थं सा० मंगलदास मगनलाल ॥

[464] अन्तः— श्रीमत्श्रीपूर्णिमागच्छवारिधौ हिमरश्मयः।

सूरीश्वरा भवन्ति स्म जयप्रभाभिधा वराः ॥१॥

तत्पट्टोदयशैलमौलिमकुटालङ्कारहीरः स्फुरत्-

कारुण्यामृतसागरः सुखकरः प्रोद्यद्यशोभासुरः।

जीयाद् भव्यजनाम्बुजे दिनकरः पुण्यद्रुमाम्भोधरः

श्रीमत्श्रीभुवनप्रभो गुरुवरः सौभाग्यभाग्याकारः ॥२॥

तेषां गुरूणां कमलाभिधेन शिष्येण पञ्चेषु च बाण-पृथ्वी(१५५५)।

संज्ञे समे भाद्रपदाह्वमासे शुक्ले नवम्यां लिलिखेऽवचूरिः ॥३॥

[472] टीकारम्भः— ॐ छ कायना देश आश्री देस हुंती विरतः सापराद्ध निरापराद्ध आदिथी।

टीकान्तः— सर्वदुर्त पाछुयां कर्मनइं क्षय करीनइं सीतलीभूत थाइ।

[487] मू०अन्तः— संवत् १५९८ माघसुदि ८ दिने श्रीवन्तहर्षखराणि पठनार्थं शुभं भवतु।

[497] बा०आदिः— ततः—

कल्याणवल्लीततिवारिवाहं श्रीसिद्धिद्रङ्गं प्रतिसार्थवाहम्।

सत्केवलालोकदिनेशतुल्यं श्रीवर्द्धमानं प्रयतः प्रणौमि ॥१॥

श्रीमत्तपागच्छसरोमरालश्रीसाधुरत्नाभिधशिष्यलेशः।

प्रकीर्णकस्यास्य करोति वार्त्तारूपं प्रबन्धं किल पार्श्वचन्द्रः ॥२॥

[501] अन्तः— पं०श्रीवानरगणिशिष्य-पं०श्रीआणन्दविजयगणिशिष्य-ग०हर्षविमलस्य प्रतिरियम्।

[512] **अन्तः—** इति तपागच्छनभोमणिकलिकालगौतमावतारभट्टारकपुरन्दरश्री ६ आनन्दविमल-सूरीश्वरचरणसरसीरुहरजश्चंचरीकायमाणपं०श्रीविजयविमलगणिरचितायां गच्छा-चाराभिधप्रकीर्णकटीकायां श्रीगुरुपर्वक्रमवर्णनाधिकारः समाप्तः ॥

संवत् १९०४ प्रवर्त्तमाने आश्विनमासे शुभे कृष्णपक्षे पुन्यस्थिते १४ वारभृगुवासरे ॥

(अन्यदीयहस्तालेखनम्–)

मुनिमहाराजश्रीहर्षविजयजी लुधीआनेके भंडारकी ॥

[520] **अन्तः—** गाथासंयोजनार्थोयं प्रयासः केवलो मम ।
अर्थः सूक्तः स्फुटो ह्येष टीकाकृद्भिश्चिरंतनैः ॥
श्रीसिद्धप्राभृतकं समाप्तमिति ॥

[521] **मू०अन्तः—** सं[वत्]१८८६ वर्षे मिती श्रावणवदी ५ दिने पं०ज्ञानचन्द्रेण लिखि-तमस्ति बृहत्खरतराचार्यगच्छे(च्छे) श्रीजिनचन्द्रसूरिसा(शा)खायाम् ।

[527] **अन्तः—** लिखितं पंडितश्री ६ लक्ष्मीरुचिगणि–शिष्यविमलकुशलगणिना हीरकुशलमुनि-पठनार्थम् ।

[528] **अन्तः—** संवत् १५२८ वर्षे ज्येष्ठवदि त्रयोदश्यां श्रीतपागच्छनायक–भट्टारकप्रभुश्रीश्री-श्रीरत्नशेखरसूरि–तत्पट्टालङ्कारविजयराज्ये श्रीश्रीलक्ष्मीसागरसूरि–शिष्यपंडितमंडली-मौलिमाणिक्यगणि–शिष्याऽनंतकीर्त्तिगणिना लिखितम् ॥

सर्वसहजगणिभणन–गणनकृते ॥श्री॥

[530] **अव०आदिः—** ॐ ॥देविंद०॥शोभनं विहितमनुष्ठानं येषां ते सुविहितास्तेषामुपकारिणीं० ।

अन्तः— इति सुविहितशिरोमणिजिनवल्लभगणिविरचितं पिंडविशुद्धिप्रकर्णा(रणा)वचूर्णिः ।

[531] **दीपिका–आदिः—** ।ॐ नमोः अर्हं ॥

तं नमत श्रीवीरं जिनं यस्माच्चारित्रभूपतिर्जगति ।
बाह्यान्तरवैरिजया(? य)क्षमाधरैः सेव्यतेऽद्यापि ॥१॥
सुविहितविधिसूत्रधारः स जयति जिनवल्लभो गणिर्येन ।
पिंडविशुद्धिप्रकरणमकारि चारित्रनृपभवनम् ॥२॥
तस्मिन् विवरणदीपं दीप्रमधिस्नेहभाजनदाद् यः ।
सोऽपि परोपकृतिरतः सूरिर्जीयाद् यशोदेवः ॥३॥
तद्विवरणप्रदीपान्मया पदार्थाभिलाषिणा तत्र ।
मन्दमतिनेयमात्मप्रबुद्धये दीपिकोद्ध्रियते ॥४॥

तत्र विशुद्धसिद्धान्तसुधासारणिः श्रीजिनवल्लभगणिः संक्षिप्तरुचीनामनुमहार्थं पिंडैषणाध्ययनसारार्थं संगृह्य यतीनामाहारदोषोद्धरणं पिंडविशुद्धिप्रकरणं चिकीर्षुरादावेव कृताऽभीष्टदेवतानमस्कारां शुचिताभिधेयादित्रितयसारां गाथामाह–देविंदविंदवंदियं० ... ...

दी० अन्तः— इति विविधविलसदर्थं सुविशुद्धाहारमहितसाधुजनम् ।
श्रीजिनवल्लभरचितं प्रकरणमेतन्न कस्य मुदे ? ॥१॥

मादृशा इह प्रकरणे महार्थपंक्तौ विवेक्तं बालोऽपि ।
यदृक्त्यंगुलिलग्नस्तं श्रयत गुरुं यशोदेवम् ॥२॥
आसीदिह चन्द्रकुले श्रीप्रभसूरिरागमधुरीणः ।
तत्पदकमलमरालः श्रीमाणिक्यप्रभाचार्यः ॥३॥
तच्छिष्योऽहं जडधीरात्मविदे सूरिरुदयसिंहाख्यः ।
पिंडविशुद्धेर्वृत्तिरुद्ध्रे दीपिकामेनाम् ॥४॥
अनया पिंडविशुद्धेः दीपिकया साधवः करस्थितया ।
तस्यावलोककुशला दोषोत्थतमांस्यपहरन्तु ॥५॥
विक्रमतो वर्षाणां पञ्चनवत्यधिकरविमित(१२९५)शतेषु ।
विहितेयं श्लोकैरिह सूत्रयुता श्यधिकसप्तशती ॥६॥
एषा पिंडविशुद्धिसाधनधियां बोधात्मिका दीपिका
तत्त्वानां विशदप्रभापरिचयं दूरे हरन्ती तमः ।
श्रेयःश्रीकरसंगमेन दधती सत्पात्रशोभां परां
विद्वद्भिः स्वपरप्रकाशनकृते स्नेहेन संपुष्यताम् ॥७॥
मुनिना राजवल्लभेन स्वावलोकनाय पिंडविशुद्धिर्लिखिता । श्रेयोऽत्र ॥

[536] अन्तः— इति श्रीपिंडविशो(शु)ध्यवचूर्णिः ॥
मंडपदुर्गे धारायाम् । पं० तिलकसुन्दरगणिशिष्यतिलककलशगणिना लिखितम् ॥ सं० १५१७ वर्षे ज्येष्ठमासे आदित्यवारे कृष्णपक्षे ६ दिने लि० ॥

[537] अन्तः— यच्चक्रे जिनवल्लभो दृढमतिः पिंडैषणागोचरं
प्रज्ञावर्जितमामवो प्रकृतये प्राज्यार्थमल्पाक्षरम् ।
शास्त्रं पिंडविशुद्धिसंज्ञितमिदं श्रीचन्द्रसूरिः स्फुटं
तद्वृत्तिं सुगमां चकार तनुधीः श्रीदेवतानुग्रहात् ॥१॥
वसु-मुनि-रुद्रै(११७८)र्युक्ते विक्रमवर्षे रवौ समाप्येषा ।
कृष्णैकादश्यां कार्तिकस्य योगे प्रशस्ते च ॥२॥
इति पिंडविशुद्ध्यवचूरिः समाप्ता ॥

[538] आदिः— ॥ ॐ नमः सिद्धम् । श्रीहीरविजयसूरिगुरुभ्यो नमः ॥
श्रीमद्वीरजिनेशं नत्वा श्रीसोमसुन्दरगुरुं च ।
पिंडविशुद्धेर्बालावबोधरूपं तनोम्यर्थम् ॥१॥

बा० अन्तः— इति श्रीजिनवल्लभसूरिविरचितपिंडविशुद्धिप्रकरणस्यार्थो बालावबोधरूपः तपागच्छनायकश्रीसोमसुन्दरसूरि-शिष्यविजयमानभट्टारकप्रभुश्रीरत्नशेखरसूरि-शिष्य-पं० संवेगदेवगणिना अर्थितः पिंडविशुद्धिबालावबोधः समाप्तः । मांडवगढे लिखितम् ॥
संवत् १६४९ वर्षे कार्तिकमासे शुक्लपक्षे दशमीदिने शुक्रवारे । पंडित-श्री६...चन्द्रगणि-शिष्यपंडित...चन्द्रगणिशिष्यगणिदेवचन्द्रलिखितं वाचनार्थम् ।

[542] अन्तः— श्रीसंवत् २०१० वर्षे माघशुक्लदशमी भृगुवासरे समाप्तम् ॥ श्रीमदणहिल्ल-पुरपत्तनवास्तव्यश्रीमालिविप्रज्ञाति-श्रीमल्लक्ष्मीशंकरात्मजगोवर्द्धनदासत्रिवेदिनेदं पुस्तकं लिपीकृतम् ॥

[544] अन्तः— अंगविद्याकी परत आत्मारामजी माहाराजने सेठश्री श्रीदलपतभाही(ई) भराई ।
संवत् १९४१ रा मीती मीगसरवद ८ भा(वा)र सोमवार ॥

[546] आदिः— ॥ ॐ ॥ आरम्भेसु नियत्ता सव्वद्ठाणेसु मुक्कवावारा ।
उच्छिण्णरागदोसा ते देवा देवयाणं पि ॥१॥

अन्तः— मा हवउ तस्स पावं सारावलीपुत्थयं लिहंतस्स ।
लहउ य असो य कित्ती अइरेणं साहुसक्कारो ॥१६॥
इति श्रीसारावलीप्रकीर्णकं समाप्तम् ॥
लिखितं च सौभाग्यसागरगणिना सा० रंगवृद्धिप[ठ]नार्थम् ॥

[550] अन्तः— इयं सुयहीलणुप्पायफलं फपला(?)जाणिऊण अन्ने व ।
जस्सभद्दे णियवयणे दढचित्तो होह पइदियहं ॥९॥
इति श्रीवंगचूलियाए अज्झयणं समात्तम् ॥

स्त० अन्तः— ए श्रुतहेलनानो आयफल सघला फल जांणीनें जसोभद्रवचने जिन-
धर्मने विषे दृढचित्त करे ।
इति श्रीवंगचूलियाअज्झयणं समात्तम् ॥

[557] अन्तः— बृहत्तपापक्षे पूज्यश्रीजयशेखरसूरि-तत्पट्टे भट्टारकश्रीजिनरत्नसूरि-पंडितश्री-
पुण्यकीर्तिगणयः । पंडित श्रीसाधुसुन्दरगणय; पंडितश्रीसोमधर्मगणयः । पंडितश्रीसोम-
शीलगणिनाऽलीलिखत । संवत् १५९० वर्षे ज्येष्ठमासे शुक्लपक्षे २ गुरौ लक्ष्मणपुरे ॥

[558] अन्तः— संवत् १६४९ वर्षे मार्गसिरवदि ९ दिने रविवासरे लिखितं वटपद्रनगरे
श्रीमन्महोपाध्यायश्रीश्री ४ विद्यासागरगणि-तत्पट्टप्रभाकरशिष्य—भुजिष्यपं०श्रीश्री-
५ सहजसागरगणि-शिष्यगणिश्रीप्रकांडगणिश्री ४ ज्ञानसागर-तच्छिष्यगणिजस-
सागरेणालेखि परउपगा(का)राय ॥

[569] स्त०अन्तः— संवत् १७६६ वर्षे शाके १६२८ प्रवर्तमाने श्रावणमासे कृष्णपक्षे
एकादशी ११ शुक्रे इति मङ्गलम् । सूर्यपुरमध्ये लिपीचक्रे ।

[571] अन्तः— ग्रन्थाग्रम् १०७० ॥ श्रीतपागच्छाधीशभट्टारकपुरन्दरश्री४श्रीहीरविजयसूरीश्वर-
सुश(शि)ष्यवाचकचक्रचूडामणिमहोपाध्यायश्रीसुमतिविजयगणि-शिष्यगणिविनय-
विजयलिखितम् ॥

संवत् १६७७ वरखे मागशिरवदि १ बुध(धे) जसालिस्थाने । शुभं भवतु ॥

[572] आदिः— सिवसुहसिरीइ हेउ वन्दिय वीरं सुलद्धसुके(क)यफलं ।
संजममन्दिरहेउ भणामि आराहणारम्भे ॥१॥

अन्तः— अप्पक्खरा महत्था सुभव्वजीवाण अत्थि सिद्धिकरा ।
सासयसिवसुक्खफलं पज्जंतराहणा भणिया ॥२६॥
इति आराधनापताका ॥

[573] आदिः— लिन्नो महासमुद्दो तरियव्वं गोपयं तु हेयाणि ।
समइक्कंतो मेरू परमाणू चिट्ठए इन्हि ॥१॥

अन्तः— एवं खवउ कम्मेणुवग्गहिओ तह परिसहकूलं ।
आइय अलंघणिज्जो झाणसमा(म)त्थो य जिणइ जइ ॥१०९॥
इति कवचद्वारं समाप्तम् ।

[575] आदिः— ॐ ॥ पहिलउं चैत्यवन्दन कीजइ । उसभाइ जिण पणउं । ए गाथा भणी पहिलउं त्रिकाल देव वादउं । अतीत अनागत वर्तमान त्रणि चुवीसी बहुत्तरि तीर्थंकर । हूं समरउं निरन्तर । हवइ अतीतकालि । केवलज्ञान १। निर्वाणी २ । सागर ३ । महायश ४ । विमल ५ । सर्वानुभूति ६ । श्रीधर ७ । दत्त ८ । ... ...

अन्तः— जइ मे हुज्जपमाओ इमस्स देहस्स इमाइ वेलाए ।
आहारमुवहिदेहं चरमे समयम्मि वोसिरियं ॥५॥
हुज्जाइ मम समए उवक्कमो जीवियस्स जइ भज्जं ।
एयं पच्चक्खाणं विउला आराहणाहेउ ॥६॥
देवगुरुधर्म्मतणी नित्यमेव स्मरणा करिवी । जिम जीव रहइ सदैव मांगलिक माला संपजइ ।७।
इति आराधना समाप्ता ॥ ग्रन्थाग्रम् २३५ ॥

[579] आदिः— बीयाओ पुव्वाओ अग्गणीआ इमं सुयसुयारं ।
संसेइमसंमुच्छिमजीवाणं आणिऊणसां(?) ॥१॥

अन्तः— संसत्तयनिज्जुत्ति एसा साहुहिं चेव पढियव्वा ।
अत्थो पुण सड्ढेहि सोयव्वो साहुपासाओ ॥२४॥
इति संसक्तनिर्युक्तिः समाप्ता ।
श्रीरस्तु सर्वसंघस्य तुष्टिपुष्टिरस्तु, लेखकस्य भद्रं भवतु ।

[580] आदिः— ॥ ॐ ॥ अर्हं नमः ॥
तित्थयरे मुणिनाहे मुक्खपहपए सए य सोंडीरे ।
खायगभावे वन्दे कम्मरयरहियजिणवीरे ॥१॥
नमिऊण गणहराई सुयनाणसमत्थपारगाईणं ।
पूयाविहि जह भणिया तह वंदणविहिं भणिस्सामि ॥२॥

अन्तः— वन्दणपयरण एसो समयाओ विहिपवायपुव्वाओ ।
संखेवेणुद्धरिओ रइओ मुणिभद्दबाहुणा ॥५५॥
इति वन्दणपइन्नं समत्तं ॥
थरादनयरे वीरप्रभुप्रसादात् लिपीकृतं मोहनविजया(येन) ॥ श्रीरस्तु ॥

स्त०आदिः— ॥ ॐ ॥ अर्हं नमः ॥
ति(ती)र्थना करनारा, मुनिना नाथ, मोक्षपदना मारगना देखाडनहारा, पराक्रमवन्त, क्षायकभावे विराजमान तिणा प्रते वांदुं कर्मरज करीने रहीत एहवा जीत्या रागद्वेष ते वीर प्रते वांदुं ॥१॥

स्त० अन्तः— वन्दनप्रकरण एह सिद्धान्त विधिप्रवाद नाम पूर्वथकी संक्षेपे करी उद्धर्यो रच्यो मुनि भद्रबाहुई ५५। वन्दनपकर्ण(प्रकरण) भद्रबाहुनो करेलो थिरपुरनयरे वीरप्रभुप्रसादात् लिपिकृतं मोहनविजय ॥

[584] अन्तः— संवत् १६८३ वर्षे पोससुदि १४ जेसलमेरमध्ये पार्श्वः करमचन्द कचरांणी लिषत ॥

[585] अन्तः— संवत् १४९२ वर्षे पोषमासे कृष्णपक्षे १० दशम्यां तिथौ भृगुवासरेऽद्येह श्रीमदणहिल्लपत्तने पातसाहश्रीअहम्मदविजयराज्ये महामहनीयतमखरतरगच्छाधीश्वरभट्टारकश्रीजिनभद्रसूरीणां वाचनाय परोपकृतये च पुस्तकोऽयं पद्माननेमालेखि ॥ २८००० ॥

[586] आदिः— श्रीज्ञातनन्दनं नत्वा स्मृत्वा च श्रुतदेवताम् ।
किंचिन्निशीथसूत्रस्य व्याख्यामाख्यामि हर्षवान् ॥१॥
अथ निशीथमिति कः शब्दार्थः । उच्यते—

[609] अन्तः— संवत् १५६४ वर्षे जे(ज्ये)ष्ठ सुदि १३ सोमे अद्येह पत्तने खरतरगच्छे श्रीजिनचन्द्रसूरीणां धर्म्मराज्ये श्रीबृहत्कल्पचूर्णिः ॥ लेखक मुहत्ता ज्ञाति माईदास लिपिकृतं श्रीनागोरमध्ये शुभं भवतु ॥

[611] अन्तः— ग्रन्थाग्रम् ११०००॥ संवत् १५६३ वर्षे वैशाषशुदि ७ सोमे श्रीअणहिल्लपुरश्रीपत्तने लष्य(लिखि)तम् ।

[612] अन्तः— सो संसारसंततिं छिंदित्ता मोक्खं पाविति ॥
विशेषकल्पचूर्णिः समाप्ता । ग्रन्थाग्रम् ११०००॥
संवत् १४ आषा[ढा]दि ९६ वर्षे पौषमासे वलक्षपक्षे १५ पूर्णमास्यां रवावद्येह श्रीमदणहिल्लपत्तने खरतरगच्छालङ्कारभूतैः स्वाचारपालनचतुरैर्गच्छेशश्रीजिनभद्रसूरिभिर्विशेषकल्पचूर्णेः पुस्तकोऽयं लेखयांचक्रे ॥

[615] अन्तः— संवत् १६६९ वर्षे० आसू सुदि ९ तिथौ आदित्यवारे ॥ बहुमङ्गलसुरबुधगुरुजनवर्गे श्रीमज्जेसलमेरुमहादुर्गस्वर्गे प्रवरतरन्यायोदयविधिधरणीपालनानुकृतश्रीरामे प्रस्फुरत्प्रचुरतरजगत्त्रयीकृताश्रयनिष्पापप्रतापसुरूपसहस्रधामाभिरामे निजरूपशोभावै भवतिरस्कृतकामे सुपूरितानेकविवेकशोकयाचकलोकमनःकामे । श्रीमज्जिन–नाद्यादव कुलामलकमलिनीदलमरालबालश्रीभीमे निस्सीमभूमिरामेशे विजयीनि ।

इतश्च-श्रीखरतरविधिपक्षे श्रीमज्जिनभद्रसूरिपरम्पराशुक्तिकासंपुटमौक्तिकानुकारिश्रीजिनमाणिक्यसूरिपट्टोदयधारकेषु स्ववचनरचनारञ्जिताकबरसाहिप्रदत्तयुगप्रधानपदस्फारकेषु जलधिसकलजलचरजन्तुरक्षाकारकेषु कलिकालकलङ्कावलोकनकलुषीभूतमनस्समस्ता (?) न्तुस्सागरांबरधरणीनिवेशितात्मप्रतापकोट्टपालसाहिसलेमबलिराजेन संतापितं श्रीवीरशासनं निराधारं प्रणष्टसकलसूरिपालनमालोक्य विशिष्टवचनामृतैस्तमाश्वास्याखण्डजैनशासनरक्षकविधायकेषु सवाईयुगप्रधानश्रीजिनचन्द्रसूरितत्पट्टोदयशैलसहस्रधामानुकारिषु श्रीसाहिकृतसूरिपदमहोत्सवविधिषु च[तु]र्दशविद्यावधूवरभोगविधौमभर्तृषु भट्टारकश्रीजिनसिंहसूरिविजयस्सु० ।

श्रीमज्जेसलमेरुवास्तव्यकृतानेकधर्मकर्तव्य भणसालीगोत्रपवित्रताकारकसा०-पूनसी-तत्पुत्रसा० श्रीमल-तद्भार्याचांपलदे-तत्पुत्ररत्नेन धर्म्मस्थानविषयप्रदत्तबहुद्रविणकृतसकलनगरलोकभोजनपूर्वकनालिकेरयुतरजतवितरण-जीवजन्तुरक्षागुणस्मारितकुमारपालगुणसा० थिरराजेन सा० हरिराजपुत्रयुतेन स्वकृतनूतनश्रीज्ञानकोशे व्यवहारचूर्णिः श्रीजिनकुशलसूरिसाषे वा० स्वर्णप्रभ-पं० कमलोदयगणि०-पं० देवसार-पं० गुणराज०-पं० थिरा लिपीकृतम् । शिष्यकरमचन्द उदयसंघसहितसपरिवार । शुभं भवतु । कल्याणमस्तु ॥

॥ संवत् १६७१ वर्षे श्रीमद्युगप्रधानजिनसिंहसूरिराज्ये विजयमाने राउलश्रीकल्याणदासभूभृति भुवं शासति सति श्रीजेसलमेरुदुर्गे श्रीक्षेमशाखायां श्रीमच्छ्रीवाचनाचार्यश्रीप्रमोदमाणिक्यगणि-शिष्यश्रीजयसोममहोपाध्यायशिष्यैः श्रीगुणविनयोपाध्यायैः पण्डितमतिकीर्त्तिकृतसाहाय्यकैरशोधि व्यवहारचूर्णिः भणसालीगोत्ररत्नसाहथिरराजेन साहहरिराज-सा० मेघराजसुतरत्नाभ्यां सहितेन स्वलेखितपुस्तकभांडागारे सुखश्रीयशस्संपदः पदे पदे विलसन्तु श्रीमद्देवगुरुप्रसादात् लेखयितृ-शोधयितृणाम् ॥ श्रीरस्तु ॥

स्वस्ति श्रीशुभकार्यसिद्धिकरणश्रीपार्श्वनाथार्हति
चैत्ये सद्विधिना विवेकिनिकरैः संपूज्यमाने सदा ।
राज्ये राउलश्रीमनामनृपतेः कल्याणदासस्य च
वर्षे विक्रमतस्तु षोडशशते एकोनसप्तती (१६६९) ॥१॥

वृद्धे खरतरगच्छे श्रीमज्जिनभद्रसूरिसंताने ।
जिनमाणिक्ययतीश्वरपट्टालंकारदिनकारे ॥२॥

आप्रद्धाग्यजये प्रबुद्धयवनाधीशप्रदत्ताभये
साक्षात्पञ्चनदीशशासनविधौ संप्राप्तलोकस्मये ।
यावज्जैनसुतीर्थदण्डकरयोः संमोचनाख्यालये
गोरक्षा-जलजीवरक्षण-धनप्राप्तप्रतिष्ठान्वये ॥३॥

साधुध्वंसकदोषदुष्टितमनःश्रीनूरदीरञ्जनाद्
देशाकर्षणसाधुदुःखदलनात् कारुण्यपुण्याशये ।
श्रीश्रीमज्जिनचन्द्रसूरिसुगुरौ यौगप्रधाने चिरं
राज्यं कुर्वति जैनसिंहसुगुरौ सद्यौवराज्ये किल ॥४॥

कोट्टे जेसलमेरौ उपकेशज्ञातिमण्डनं जातः ।
भणसालिकगोत्रीयः आसासाहः सदोत्साहः ॥५॥
तत्पुत्रो खरताख्य. तत्तनयः पुंजराज इति नामा ।
तत्पुत्रो असधवलः तत्सूनुः पुनसीसाहः ॥६॥

तत्कुलदीपप्रतिमः श्रीमल्लः तस्य पुत्रवररत्नम् ।
चांपलदेव्याः कुक्षिस्वर्णाचलकल्पवृक्षोऽस्ति ॥७॥
भुवि जन्तुजातरक्षास्मारितसुकुमारपालभूपालः ।
जिनवर-गुरुपरमाज्ञातिलकितभालो विशालगुणः ॥८॥

धर्मस्थानव्ययितद्रविणः प्रगुणः प्रधानशीलेन ।
जीर्णोद्धारधुरीणः दीनानाथादिदुःखहरः ॥९॥
स्वालये देवगृहे शम्भवाधिपस्थापनामहे सम्यक् ।
प्रत्येकं श्राद्धानां प्रददे यो राजतीं मुद्राम् ॥१०॥
मिष्टान्नभोजनेनानाथान् संतोष्य वर्षनिष्ठासु ।
अष्टाहिकासु घुसृणैः वर्णाद्यैः पूजयांचक्रे ॥११॥
सार्द्धसहस्रचतुष्टयप्रमिताः प्रतिमाश्च सप्तचैत्ये ।
द्रव्यस्तवाधिकारी भावस्तवसंगतः सततम् ॥१२॥
नगरजनराजमान्यो विधिपक्षाराधको विधिज्ञश्च ।
दुष्कालकण्ठहस्तो मृदुवचनो गर्वमदरहितः ॥१३॥
श्रीथाहरुसुनामा अङ्गजहरिराज-मेघराजाभ्याम् ।
युक्तः कनकांभर्त्ता आद्यः सुश्रावको द्रव्यैः ॥१४॥
ज्ञानप्राप्तिनिमित्तं भवे भवे बोधिबीजशुद्धयर्थम् ।
सज्ज्ञानकोशमेनं शुद्धं संलेखयांचक्रे ॥१५॥ —अष्टभिः कुलकम् ॥
चित्कोशलेखनेन पुण्यं यदवापि थाहरूकेण ।
हर्षात् तेन प्राज्ञाः जिनागमं वाचयन्तु सदा ॥१६॥
ग्रं०१०००० पांचसै ॥

[622] **अन्तः**— संवत् शशि-सिद्ध-सागर-कुमुदबांधवमिते(१७८१)अश्वयुक्कृष्णपक्षे एकादशी कर्मवाटयाम्म्(?)॥ श्रीतपागच्छे कुमतान्धकारनभोमणिसकलभट्टारकश्री १०८ श्रीविजयप्रभसूरीश्वर-तत्पट्टे सकलशास्त्रनिपुणसंशयतिमिरभास्करभट्टारक श्री १०८ श्रीविजयरत्नसूरीश्वर-तत्पट्टे सकलक्रियाउद्धारकभट्टारकश्री १०९ श्रीविजयक्षमासूरीश्वरजिद्विजयराज्ये सकलविद्वज्जनशिरोमणिपण्डितश्री५श्रीउदयसागरगणि-तच्छिष्य-सकलजिनागमप्रविणपाठितानेकछात्र-वाचारञ्जितानेकविशारद-सर्वत्रलब्धयशोवादपंडित-श्री५श्रीवीरमसागरगणि-तच्छिष्यभुजिष्यपं०दोलतिसागरगणिना लिखितमिदं सूत्रम् श्रीमद्विक्रमद्विक्रमपुरवरे सिवपुरीवास्तव्यश्राद्धउपाश्रये स्वसुशिष्यणीसदक्षसुश्राविका पुण्यप्रभाविका श्रीसम्यक्त्वमूलद्वादशव्रतधारिका साधुसेवाकारिका सुश्राविका केशीनिमित्तमिति श्रेयोस्तु आचन्द्रार्कं लेखकपाठकवाचकानामिति । शुभं भवतु ॥

[625] **अन्तः**— संवत् १५२४ वर्षे जेष्ठ व०९ रवौ ज्यो०अलवालिखितम् ।
(हरतालप्रयोगेन प्रभ्रष्टाक्षरा अधोलिखितपुष्पिकायाम्-)

॥ संवत् १८४० मिते पोषमासे शुक्लपक्षे ११ तिथौ । श्रीश्रीबीकानेरमध्ये चोपडागोत्री... ... ... पसोकेन । श्रीकल्पसूत्रपुस्तक···ज्ञानभांडागारे मुक्तं स्वश्रेयसे ॥ प्रति ९ ।

[626] **अन्तः**— संवत् १६४८ (वर्षे) वीशाष (मासे) सुकलपक्षे १३ तिथौ गुरुवासरे ॥छ॥ श्रीउपाध्यायरतन··· ··· । भूकामधे लषापत्त ॥

[627] अन्तः— संवत् १७१६ वर्षे मधुमासे असितपक्षे भूतेष्टाकर्म्मवाद्यां गुरुवासरे। श्रीअंचलगच्छे मुनिश्रीमाणिक्यसागर–तत्शिष्यमुनिश्रीन्यानसागर–तत्शिष्यमुनि-नयसागरेण लिखितम् । शेषपुरे स्वपठनार्थमिति ॥ शुभं भवतु ।

[628] अन्तः— इति श्रीपज्जोसवणाकप्पो दसासुयस्कंधस्स अठ्ठम[म]ज्झयणं दशासम्मत्तं ॥ ग्रन्थाग्रं १२१६ ॥ श्रीरस्तु कल्याणमस्तु ॥

संवत् १६१२ वर्षे वैशाखशुदि १३ अणहिल्लपत्तने लक्षितं मुनि-राजतिलकेन ॥श्री॥

श्रीराजगच्छे भ०श्रीपद्माणंदसूरि–तत्पट्टे श्रीनंदिवर्धनसूरि–तत्शिष्यउ० श्रीपुण्यराज–तत्शिष्यउदयराजस्ववाचनाय लिषापितम् ॥ .

[630] अन्तः— (अन्यलेखकेन लिखितमिदम्–)

संवत् १७१३ वर्षे शाके १५६८ प्रवर्त्तमाने पोषसुदि २ द्वितीया-पारिखगोत्रे श्रीजेसलमेरुवास्तव्यश्रीसूर्यमल्लभार्यासुआणदेनाम्न्या पंचमीतपोद्या-पने न्या(ज्ञा)नभक्तिनिमित्तं श्रीकल्पसूत्रपुस्तकं पं०श्रीजिनसागरश्रीप्रदत्तं श्रीस्वपु-ण्याय पं० श्रीजिनसागरगणि–पंन्यासश्रीराजसागरगणिनां विहरापितम् ॥ शुभम् ।

(एतदपि लेखकान्तरेण लिखितम् –)

आ परत श्री पं०पद्मीराजजी महाराजनी छे ॥ पान ९७ छे ।

[637] अन्तः— संवत् १६१६ वर्षे श्रावणवदिकृष्णनवम्यां तिथौ संपूर्णं जाता ॥छ॥ पण्डितश्रीश्रुतसमुद्राह्वाय पार्श्वात् प्राप्तश्रुतसमुद्रार्थतः सुबोधज्ञातसुविचार-पूज्यपण्डितश्रीविचारसागरगणि–तच्छिष्यभुजिष्यविनीतविनयस्वसमयपरसमयसमस्त-शास्त्रावबोधार्थसागरमहोपाध्यायश्रीधर्मसागरगणिविलोकनार्थम् । लेखक-वाचक-योश्च भद्रं भवतु ॥

[640] वृ०अन्तः— म०अचलकेन लिखितम् ॥ छ ॥ श्री ॥

शोधिता चेयं महोपाध्यायश्री ५ श्रीमुनिविमलगणिचरणारविन्दचञ्चरी-केण पं०भावविजयगणिना यथादर्शं श्रेयोर्थम् ॥ श्रीरस्तु ॥

[644] अन्तः— संवत् १९५४ वर्षे फाल्गुनकृष्णे श्री१४चतुर्दश्यां वासरे मृगांके साध्वी-सांकलीश्रीव्या(?) शांतिश्रीअर्थे ज्ञानउद्यापने सा० भाहालचन्द्र-वधूबाईभल्लीकेन सुभपुण्योपार्जनाय लिखापिता लि० पं०ह्रीमतविजयेन श्रीअणहिल्लपट्टणे क्षेत्रपालपाटकवास्तव्ये ॥ श्री ॥

[645] टी०अन्तः— संवत् १७३९ वर्षे फाल्गुनमासे शुक्लपक्षे त्रयोदश्यां गुरुवारे वृद्ध-तपागच्छे पूज्यभट्टारकश्रीतेजोरत्नसूरिस्तत्शिष्यपण्डितश्रीलावण्यरत्नगणि-तच्छिष्य पं० श्रीज्ञानरत्नगणि–तच्छिष्यपं० श्रीजयसुन्दरगणि-तत्शिष्यउपाध्यायश्रीरत्नसुन्दर-तच्छिष्यपं०श्रीविवेकसुन्द[र]गणितच्छिष्यौ पं०सिहिजसुन्दर-तद्गुरुभ्रातापं०-सुखसुन्दरेण स्ववाचनायालेखि खंभातिनगरे ।

[646] अन्तः— संवत् १८६० वर्षे मिति कार्तिक सुदि ६ भृगुवासरे उदयपुरनगरे माहाराणाजी श्रीभीमसिंहजीविजयराज्ये बृहत्खरतरगच्छे श्रीजिनमाणिक्यसूरिशाखायां श्रीजिनरंगसूरिआम्नायके सकलभट्टारकशिरोमणिजंगमयुगप्रधानभट्टारक श्री१०८ श्रीजिनचन्द्रसूरीश्वरात् उपाध्यायश्रीसुगणतिलकजी–तत्शिष्य पं० अमृतधीरजी–तत्शिष्य पं०रायअक्षय–तत्शिष्य पं०वृद्धिविजय लिपिकृतं शिष्य–पं०जयउदय वाचनार्थम् ॥

[651] अन्तः— इति श्रीसमयसुन्दरोपाध्यायविरचिता कल्पलतानाम्नी कल्पसूत्रवृत्तिः संपूर्णतां प्राप्ता, समुदलेखितरां महोपाध्यायश्री५श्रीजयसागरगणि–शिष्यपं०श्रीलावण्यसागरगणि शिष्यभुजिष्यसकलपण्डितपञ्चाननपण्डितश्री५श्रीउदयसागरगणिचरणकमलयुगलचंचरीकायमान–पण्डितश्रीकनकसागरगणि–शिष्यग० लाभसागरेणाद्धृतरं श्रीआल्हणीयावासनगरे संवत् १७५८ वर्षे हिमर्त्तौ पोस वदि १३ भौमे सिद्धियोगे ॥

[654] आदिः— ॐ नमः सिद्धम्, श्रीशंखेश्वरपार्श्वनाथाय नमः ।
महोपाध्यायश्रीविमलहर्षगणिगुरुभ्यो नमः ॥
कल्याणांकुरवृद्धये जलधरं सर्वार्थसंपत्तिकृत्
पादाम्भोजयुगं जगज्जनमनःसंकल्पकल्पद्रुमम् ।
भेजुर्यस्य सुरा जरामृतिहृतं विश्वत्रयीकामधुक्
स श्रीवीरजिनेश्वरो जनयतात् नैःश्रेयसीं संपदम् ॥१॥
प्रणम्य निखिलान् सूरीन् स्वगुरुं सततोदयम् ।
कुर्वे स्वबोधविधये सुगमां कल्पदीपिकाम् ॥२॥
पुरिमचरिमाणकप्पो मंगलं वद्धमाणतित्थंमि ।
इह परिकहिआ जिणगणहराइथेरावलीचरित्तं ॥१॥

अन्तः— इति सामाचारीव्याख्यानं संपूर्णम् ।
संपूर्त्तौ च संपूर्णा श्रीकल्पदीपकेति श्रेयः ॥
गुणगणमणिगेहे श्रीतपागच्छसिन्धौ
कुमततिमिरभेदे जागरूकस्वभावाः ।
विजयिविजयदानाः सूरिसूर्या बभूवु–
स्त्रिभुवनजनपद्मोल्लासनैकस्वभावाः ॥१॥
तत्पट्टोदयसानुमालिशिखरे भास्वत्प्रभाभासुराः
जाताः श्रीगुरुहीरहीरविजया यद्देशनारंजितः ।
आपाथोधितटं जलस्थलवियत्प्राणस्पृशां पालनं
पृथ्व्यां कारितवानकब्बरमहाभूपालचूडामणिः ॥२॥
तत्पट्टाम्बुधिभासनैकशशिनः संजज्ञिरे सूरयः
श्रीमन्तो विजयादिसेनगुरवः प्रौढप्रतिष्ठास्पदम् ।
यैः शाहेः पुरतः कुवादिनिवहान् निर्जित्य दर्पोद्धुरान्
कीर्त्तिस्तम्भ इव व्यधायि गिरिजप्राणेशशैलच्छलात् ॥३॥

श्रीसूरेर्विजयादिसेनसुगुरोर्विश्वत्रयीमोदकृत्
पट्टप्रौढपयोधिवृद्धिविधये संपूर्णशीतांशवः ।
पूर्वाचार्यपरम्पराकुमुदिनीप्रीतिप्रदानोद्यमाः
सूरीशाः सततं जयन्ति सुव(?)निश्शेषसौख्यप्रदाः ॥४॥
तेषां राज्ये विमले श्रीमत्श्रीविजयदेवसूरीणाम् ।
श्रीमद्विजयात् सिंहैः सूरिवरैः सेव्यमानानाम् ॥५॥
त्रिभुवनजनसेव्याः सर्वशास्त्राम्बुराशौ
जलधिशयनदेश्याः श्रीतपागच्छधूर्याः ।
विमलविमलहर्षा रेजिरे वाचकेन्द्राः
सकलगुणगरिष्ठाः प्राप्तभूरिप्रतिष्ठाः ॥६॥
तत्पादाम्भोजभृङ्गो बुधजयविजयः स्वस्य चित्तप्रमोद-
प्राप्त्यर्थं मुग्धबुद्ध्याऽलिखदतिसुगमां दीपिकां कल्पसत्काम् ।
वर्षे सप्तार्णवांगविजयपरिमिते(१६७७) कार्तिकश्वेतषष्ठ्यां
श्रीमत्पार्श्वप्रभावाज्जयतु च सुचिरं वाच्यमानेयमार्यैः ॥७॥
प्रत्यक्षरं गणनया ग्रन्थेऽस्मिन् श्लोकसंख्यया ।
पञ्चत्रिंशच्छती जज्ञे द्वात्रिंशत्कलिता किल ॥८॥
विद्वद्वृन्दशिरोमणिपण्डितवरभावविजयगणिमुख्यैः ।
श्रीकल्पदीपिकेयं समशोधि जिनागमे भक्तैः ॥९॥

श्रीकल्पदीपिका लिखिता च प्रथमादर्शे स्वयं स्वशिष्यवृद्धिविजयगणि-प्रार्थनया ।

अनाभोगात् किञ्चित् किमपि मतिवैकल्पवशतः
किमप्यौत्सुक्येन स्मृतिविरहतो वापि किमपि ।
यदुत्सूत्रं सूत्रे कथमपि मया ख्यातमिह चेत्
क्षमन्तां धीमन्तस्तदसमदयाः पूर्णहृदयाः ॥१॥
नक्षत्राक्षतपूरितं मरकतस्थालं विशालं नभः
पीयूषद्युतिनालिकेरकलितं चन्द्रप्रभाचन्दनम् ।
यावन्मेरुकरे गभस्तिकटके धत्ते धरित्रीवधू-
स्तावन्नन्दतु तीर्थराजविनुतः श्रीसंघभट्टारकः ॥२॥

इति श्रीसंघप्रशस्तिः ॥

एकः सहस्रो द्विशता समेतः श्लिष्टस्तथा षोडशभि(१२१६)र्विदन्तु ।
कल्पस्य संख्या कथिता विशिष्टा विशारदैः पर्युषणाभिधस्य ॥१॥

संवत् १६८६ वर्षे आषा[ढ]सित ८ तिथो लिखितोयं वृद्धादशः स्वत एव वाच्यमानश्चिरं नन्दतात् ।

रत्नस्वर्णगजाश्वधान्यवसनालंकारलक्ष्मा(क्ष्म्या)कुलं
वृद्धिं प्राप्य यदीयजन्मनि ततो यो वर्धमानः स्फुटम् ।

ख्यातो दुर्जयभावशत्रुविजयाद् वीरश्च [विश्व]त्रये
स श्रीतीर्थविभुर्जिनो वितनुतां कल्याणमालामसौ ॥१॥
महोपाध्यायश्री१९श्रीविमलहर्षगणि-तच्छिष्यसकलपण्डितशिरोमणिपण्डित-श्री१९श्रीजयविजयगणि-तच्छिष्यपण्डितसभाशृङ्गारहारसकलविबुधमुखमंडनपण्डित-श्री१९श्रीवृद्धिविजयगणि-तच्छिष्यमुनिरामविजयेनालेखि ।

[656] **अव०अन्तः**— प्राग्वाटज्ञातीयसा०भाराकेन अभिग्रहेण स्वद्रव्येण श्री०

[660] **स्त०आदिः**— श्रीशारदायै नमः ॥
सकलार्थसिद्धिजननी कविजननी प्रणम्य भावेन ।
श्रीहेमविमलसूरिं नत्वा स्मृत्वा च गुरुगदितम् ॥१॥
श्रीकल्पान्तर्वाच्यस्य व्याख्यानं जनभाषया ।
लिपिं कुर्वेहमज्ञानशिष्यानां ज्ञानहेतवे ॥२॥
प्रथम कल्प वाचवानो विधि लषीइं छइं ॥

[662] **स्त०आदिः**— ऐं नमः ॥ श्रीमहिमाप्रभसूरिगुरुभ्यो नमः ॥
नत्वा श्रीपार्श्वनाथं तं महिमाप्रभमुत्तमम् ।
श्रीमान् भावप्रभाचार्यो बालोपकृतिहेतवे ॥१॥
श्रीकल्पान्तरवाच्यस्य शीघ्रबोधविधायिनीम् ।
नातिविस्तरसंक्षेपां लोकभाषां करोम्यहम् ॥२॥ युग्मम् ।

स्त०अन्तः— श्रीपर्युषणाकल्प कहीइ तेहनो ए दशाश्रुतस्कधनउं एह कल्पसूत्र आठमुं अध्ययन समाप्तम् ।

इति श्रीकल्पसूत्रनि संख्या कहीइ १२१६ ग्रन्थाग्रन्थ ए छइ । इति श्रीकल्पसूत्रसंपूर्णम् ।

श्रीपूर्णिमापक्षे भट्टारकश्री५श्रीभावप्रभसूरिविरचितायां श्रीटबाअर्थसंपूर्णमीती(मिति) लषितं भाणरत्नेन ।

मू०अन्तः— इति पज्जोसवणाकप्पो दसासुयस्क(ख)न्धस्स अट्ठम[म]ज्झयणं सम्मत्तं ॥

॥ संवत् १७९२ मिते । शाके १६५७ प्रवर्त्तमाने पौषमासे कृष्णपक्षे द्वितीयातिथौ श्रीसूर्यपुत्रवारे श्रीमति पत्तनपत्तनेऽणहिल्लपूर्वपदे श्रीमति ढंढेरपाटके श्रीपौर्णिमापक्षीयप्रधानशाखीयभ०श्रीमहिमाप्रभसूरि-पट्टपद्मप्रभाकरभ०-श्रीभावप्रभसूरिभिः कृता श्रीकल्पान्तर्वाच्यस्य लोकभाषा मन्दमतीनां सुगमार्थविधायिनी शिष्यभाणरत्नस्य हेतवे । पं०श्रीहेमचन्दजीकथनेनेति ।

इदं श्रीकल्पसूत्रस्य नवमं व्याख्यानं समाप्तम् ॥ अधुना स्वस्य स्वस्य गच्छपरम्परातो ज्ञेयमिति ॥ श्रीः ॥

[663] **स्त० अन्तः**— श्रीविजयदेवसूरींद्रशिष्योपाध्यायनयविजयगणिभिः श्रीकल्पकल्पवृक्षस्तबकार्थं वृत्तितो लिखितः ।

[664] **अन्तः**— इति श्रीकल्पसूत्रबालावबोधः समाप्तः ॥

॥ इदम् पुस्तकम् श्रीमद् विजयानन्दसूरि(री श्वरजी–प्रशिष्यमुनिहंसविजयजीना उपदेशथी लिखापितं ॥ लीखी ल[हि]या गोपीनाथ पालीतणामध्ये । संवत् १९५३ ना भाद्रवासुदि ११ गुरुवारः ।

कर कर कमर कुबडी, कर कर निचा नेण ।
बहुकष्टे पोथी लिखी, सुला रखीयो सेण ॥

[665] **अन्तः**— इति श्रीदशाश्रुतस्कन्धनुं आठमुं अध्ययन श्रीकल्पसूत्रटबान्तर्वाच्यसहितः संपूर्णः । सर्वग्रन्थाग्रं सार्द्धपांचसहस्रो ज्ञेयः । ५००(५५००) संवत् १७६८ वर्षे मार्गशिरसुदि १३ वारभौमे । पं०राजहंसगणिलेषितम् श्रीविदिरपुरे ।

(मूल)— सूत्रग्रन्थाग्रं १२१६ ॥

दशासुयखन्धस्स अट्ठमं अज्झयणं सम्मत्तं । श्रीकल्पसूत्र-टबु संपूर्णः । सूत्र १२१६, मूलटबु २२२४, सूत्रटबुमिलिते ३४३६ । अंतर्वाच्यपृथक् ।

अक्खरमत्ताहीणं जं किंचि पढियं अयाणमाणेण ।
तं खमह मज्झ सव्वं जिणवयणविणिग्गया वाणी ॥१॥

[667] **वृ:आदिः**— सूत्रमर्थं तथा चान्तर्वाच्यमेतत्त्रयं समम् ।
वृत्तावासां समानीतमेतदाधिक्यमन्यतः ॥१॥

तत्र तावत् श्रीकल्पसिद्धान्तस्याधिकारत्रयवाचकेयं गाथा ॥

अन्तः— पज्जोसवणाकप्पो दसासुयक्खंधस्स अट्ठम[म]ज्झयणं सम्मत्तं । ग्रन्थाग्रम् १२१६ ॥

संवत् १७०५ वर्षे कार्त्तिकसुदि ८ तिथौ गुरुवासरे लिखितं भट्टारकश्रीविनयप्रभसूरिणा मुनिकीर्तिरत्नपठनार्थम् ॥ नक्षत्रा० ॥१॥ अनाभोगा० ॥२॥ उर्वी गुर्वी ॥३॥ अर्हन् मू० ॥४॥

अथास्य ग्रन्थस्य संख्यामाह श्लोकाः—

संख्या श्रीकल्पसूत्रस्य शतैर्द्वादशभिर्मिता ।
अनुष्टुभां तदुपरि युक्ता षोडशभिर्ध्रुवम् ॥१॥ सूत्रसंख्या १२१६ ॥

अथ— श्रीकल्पान्तरवाचस्य प्रोक्तं मानमनुष्टुभाम् ।
द्वाविंशतिशतैरेवमेकोनत्रिंशता सह ॥२॥

इतिकल्पान्तर्वाच्यसंख्या २२२९ ॥

अथ— श्रीकल्पस्तबुकार्थेस्मिन् श्लोकमानं बुधैर्मितम् ।
द्वाविंशतिशतैः सम्यक् सप्तसप्ततिसंयुतैः ॥३॥

इति कल्पसूत्रटबार्थः, संख्या २२७७ ॥

अथ— त्रयाणामेवमेतेषां समग्रं मानमीरितम् ।
सहस्रपञ्चकं सप्तशती द्वाविंशतिस्तथा ॥४॥

इति सर्वमिलने ग्रन्थमानम् ५७२२ जाणवुं ॥

वृ० अन्तः— इति श्रीकल्पसूत्रावचूरिः समाप्ता ग्रन्थाग्रं सर्व सूत्रवृत्तिकथाभिस्सह ५७२२ श्रीपत्तनमध्ये लिखितम् ।

[668] स्त०आदिः— प्रणम्य प्रणताशेषवीरं वीरजिनेश्वरम् ।
स्ववाचनकृते कुर्वे कल्पव्याख्यानपद्धतिम् ॥१॥

अन्तः— संवत् १७४२ वर्षे कार्तिकसित १० दिने गणिप्रभुकुशललिखितम् । प्रभुकुश-लगणिनाऽलेखि श्रीभादोसडानगरे सकलपण्डितपरम्परापारे(री)न्द्रपण्डितश्री१९ भोजकुशलग०-शिष्यन्यायकुशलवाचनार्थम् ॥

[669] अन्तः— संवत् १९३६ हस्ताऽक्षरविरामणपंचगौडखुबचन्दलिपीकृतं रत्नपुरीमध्ये ।

[670] स्त०अन्तः— इति श्रीआठमो वषांण संपूर्ण समाप्तम् ॥ पं०श्री५पं०ललितविजयजीगणीना सुसी (शि)ष्यपं०श्रीपं०भाग्यविजयजीगणी, तत्सी(शि)ष्यलपीकृतं ग्रामइडरे कल्पसूत्रं संपूर्ण समाप्तम् ।

संचत् १८७७ ना वर्षे आषाढ सुदी ४ दिनै सुक्रवारे मुनिरंगवीजें स्वआत्मारथें ।

[671] स्त०अन्तः— श्रीतपागच्छे सकलभट्टारकपुरन्दरभट्टारकश्री१००८श्रीश्रीवी(वि)जयप्रभसूरीश्वराणां शिष्यपण्डितश्री१०८श्रीपं०प्रेमविजयगणि तत्शीष्यपं०श्री·पं०विनीतविजयगणि तत्शिष्यपं०श्री५पं०रविविजयगणि तत्शिष्यचरणसेवी पं०उमेदविजयग०लपीकृतं श्रीपल्हाणपूरमध्ये श्रीपल्लीवियापार्श्वनाथप्रसादात् ।

पण्डितश्रीरामविजय-पं०विनीत्यसक्त-पं०नेमविजयगणी-रांमसक्त परत्त-वेचाथि आपी छें । चांण[स]माग्राममध्ये ॥

[672] स्त०आदिः— नत्वा श्रीमन्महावीरं स्म(मृ)त्वा श्रीगौतमं गुरुम् ।
कल्पकल्पलतानाम्नि कल्पटीका प्रकल्प(? तन्य)ते ॥१॥
नूतनानि पुराणानि प्राकृतान्यपि पाठतः ।
संस्कृतानि विधायात्र परोपकृतिहेतवे ॥२॥
नत्वा गुरुं च वाग्देवीं भक्त्या च परमया मुदा ।
श्रीरत्नचन्द्र अर्थाय लिष्यते कल्पवार्त्तिकम् ॥३॥
ए श्रीकल्प वीतरागनो कह्यो ॥ शास्त्र ते श्रीसर्वज्ञनु कह्युं... ...

[673] अन्तः— संवत् १९३१ ना वर्षे साके १७९६ ना प्रवर्त्तमान्ये(ने) अधिकमासमासे शुद्धपक्षे तिथौ १ प्रतिपदा चन्द्रवासरे संपूर्णम् ॥

लिषितं दि(? द)वै श्री५लक्ष्मीदास महदेव गाम बेरा(? बारे)-ग्रामध्ये वास्तव्यं(व्यः) । पठनार्थं । पूज श्री५कानजि-तत्सीष्यरामजि-तत्सिष्य-गोवालजि इदं पुस्तकं पठनार्थम् ॥

[674] मू०अन्तः— पज्जोसवणाकप्पो दसासुयखंधस्स अट्ठमज्झयणं सम्मत्तं । ग्रन्थाग्रन्थ-सूत्रसंख्या १२१६, अर्थसंख्या १५६२, कथासंख्या २९२५, सर्वसंख्या [५७०३] यादृशं० ॥१॥

सं० १८४३ वर्षे मितिवैशाखसुदि १५ दिने लिपिकृतं मेहग्रामे ।
(अन्यहस्ताक्षरेण लिखितमिदम्-)
गुरां प्रतापविजेजीने आ पर्त रु. ६॥=) पुनमचन्द मे दीनी ।

[675] स्त०आदिः— कल्पसूत्रबालावबोधः लिख्यते । गाथा—
प्रणम्य प्रणताशेषं वीरं वीरजिनेश्वरम् ।
स्ववाचनकृते कुर्वे कल्पव्याख्यानपद्धतीम् ॥
अन्तः— सणवाडमध्ये लिषितम् । इति श्रीकल्पसूत्रं संपूर्णम् ।
सकलपण्डितोत्तमपण्डितश्रीलाभकुशलगणि-शिष्यपण्डितरत्नकुशलग०-शिष्यपण्डितश्रीगंभीरकुशलग०-शिष्यपण्डितश्रीहेमकुशलग०–शिष्यपण्डितवल्लभकुशल(लेन) स्वयं वाचनार्थं ॥
संवत् १८७७ वर्षे प्रथमज्येष्ठकृष्ण १० रविवासरे ।

[676] स्त० आदिः— श्रीसर्वज्ञाय नमः ॥
सकलार्थसिद्धिजननीं कविजनजननीं प्रणम्य भावेन ।
श्रीहेमविमलसूरिं नत्वा स्मृत्वा च गुरुगदितम् ॥१॥
श्रीकल्पांतर्वाच्यस्य व्याख्यानं जनभाषया ।
लिपिं कुर्वेऽहमज्ञानशिष्याणां ज्ञानहेतवे ॥२॥
स्त० अन्तः— इति श्रीकल्पसूत्रनुं टबु सूत्रार्थं संपूर्णम् ।
सूत्रार्थग्रन्थसंख्याग्रन्थाग्रम् ६०२९ ॥
संवत् १७५९ वर्षे शाके १६२४ प्रवर्त्त० मागशर सुदि ५ शुक्रे ।
मू० अन्तः— इति श्रीकल्पसूत्र संपूर्णं सूत्रग्रन्थाग्रसंख्या १२१६ ।
संवत् १७५९ वर्षे मागशर सुदि ५ शुक्रे लखितम् ॥

[677] स्त० आदिः— श्रीहेमविमलं वीरं वीरं सवा(वै)रिनाशने(कम्) ।
प्रणम्य वाग्व(वाचं) कल्पस्य टबार्थं रचयाम्यहम् ॥१॥
विलोक्य संदेहविषौषधीवृत्तिं तथापरां टीकाम् ।
सुगमं बालविबोधाय नमिकमि(नमस्)कृत्य गुरुचरणान् ॥२॥
स्त० अन्तः— संवत् १६९२ वर्षे कार्त्तिकवदि ६ गुरौ संपूर्णमिदं शास्त्रम् ।

[679] आदिः— नमः श्रीवर्धमानाय श्रीमते च सुधर्म्मणे ।
सर्वानुयोगवृद्धेभ्यो वाण्यै सर्वविदस्तथा ॥१॥
अज्ञानतिमिरान्धानां ज्ञानाञ्जनशलाकया ।
नेत्रमुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥
सूरिमु[द्]द्योतनं वन्दे वर्धमानं जिनेश्वरम् ।
जिनचन्द्रप्रभुं भक्त्याऽभयदेवमहं स्तुवे ॥३॥
श्रीजिनवल्लभ-जिनदत्तसूरि-जिनचन्द्र-जिनपतिसुरेन्द्राः ।
लक्ष्म्यै जिनेश्वर-जिनप्रबोध-जिनचन्द्रगुरवः स्युः ॥४॥
सूरिर्जिनादिकुशलो जिनप्रभसूरिः
सूरिर्बभूव जिनलब्धिरधीतसूरिः ।
तेजोमयोपि जललोचनपूर्णचन्द्र-
श्चन्द्रोपमानगुण एष जिनादिचन्द्रः ॥५॥

दत्तस्तदीयपदपद्मदिवाधिराजः
प्रासोदयोऽजनि जिनोदयसूरिराजः ।
विभ्राजते गुरुवरो जिनराजसूरि—
र्भाग्याद्भुतः समभवज्जिनभद्रसूरिः ॥६॥
तत्पट्टे जिनचन्द्रास्तदन्वये समुद्रसूरिजिनहंसाः ।
आसीज्जिनमाणिक्या युगवरजिनचन्द्र–जिनसिंहाः ॥७॥
ज्ञानक्रिया–दुष्करसत्तपोभिः प्राप्तप्रतिष्ठा जगतीतले यैः ।
राजन्वती गच्छपरम्परेयं जयन्तु ते श्रीजिनचन्द्र[सूर]यः ॥८॥
अब्धिर्लब्धिकदम्बकस्य तिलको निःशेषसूर्यावले–
रापीडः प्रतिबोधनैपुणवतामग्रेसरो वाग्मिनाम् ।
दृष्टान्तो गुरुभक्तिशालिमनसां मौलिस्ततः श्रीजुषां
सर्वाश्चर्यमयो मयीष्टसमयः श्रीगौतमः स्तान्मुदे ॥९॥

वन्दामि भद्दबाहुं पाईणं चरमसकलसुयनाणिं ।
सुत्तस्स कारगमिसिं दसाण कप्पे य ववहारे ॥१०॥

अन्तः— श्रीजिनदत्तसूरि श्रीजिनकुशलसूरि तदनुक्रमइ युगप्रधाम भट्टारक श्रीजिनचन्द्रसूरितणी आज्ञा प्रवर्त्तई श्रीहर्षसारवाचक-शिष्यश्रीशिवनिधानगणिरचिते श्रीकल्पबालबोधे सप्तव्याख्यानपद्धतिर्विहिता ।

[680] आदिः— प्रणम्य श्रीमहावीरं नत्वा च श्रुतदेवताम् ।
व्याख्यानं कल्पसूत्रस्य लिख्यते लोकभाषया ॥१॥

अन्तः— इति श्रीकल्पसूत्रबाला[व]बोधः सुगमः संपूर्णम्(र्णः) ।
संवत् १८८३ रा फाल्गुणकृष्णप्रतिपत्कर्मवाट्यामिति । श्रीमच्छुद्धदन्तीग्रे प्रतिरेषा लिखिता सकलपंडितशिरोमणि-पंडितमुकुटायमानपं०श्री१०८श्री-पं०श्रीभक्तिविजयजीगणि–तच्छिष्यपं०श्रीमत्रूपविजयजी-तच्छिष्यमुनिचतुरविजय–वाच्यमान्य(नं) चिरं न[न्]द्यात् ॥श्री॥ यादृशं० ॥१॥ शांतिनाथजिनप्रसादात् ।

[681] अन्तः— सकल पंडितोत्तमपंडितश्री ५ पं०श्रीदर्शनविजयगणि-शिष्यपण्डितश्री ५ पं०श्रीकांतिविजयगणि–शिष्यपाय(द)रज्ज(जो)रेणु सदा आज्ञाकारी दासानुदास सदा चरणसेवि-पं०नायकविजयगणिलिखिता परोपकाराय ।
संवत् १७९८ वर्षे प्रथमश्रावणसुदि १ वार गुरौ संपूर्णः ॥

[682] आदिः— वर्णवियइ सबंध श्रीकल्पवाचना वर्ण्णमान । कल्पशब्द अनेकभेदे प्रवर्त्तइ । यथा मणिकल्प । ओषधीकल्प । गुटिकाकल्प । अंजनकल्प ।

[683] आदिः— कल्याणानि समुल्लसन्ति विलसत्युद्दामभाग्यालय–
स्ताः संपन्महिलाविलासबहुलाः स्नेहोज्ज्वला वृण्वते ।
तान्तिः शान्तिमुपैति भीतिततितिः साकं न किं किं भवेद्
यद्वा मङ्गलमुज्ज्वलं सुविपुलं तस्यानुभावाद् भुवि ॥१॥

नमस्कार श्रीशांतिनाथजीने पछें श्रीकल्पसूत्रनी स चायं श्रीकल्पः श्रीसर्वज्ञप्रणीतमेव शास्त्रप्रमाणं चक्षुः(क्र) । सर्वज्ञत्वाभावे शास्त्रस्यापि प्रामाण्यासंभवात् इदं च कल्पाभिधानं महाशास्त्रं श्रीधर्ममहानरेंद्रनिवासमूलराजधानीसमानं विद्यते शास्त्रं तु तदेव लोकानामुपकारकं स्या[द्] यत्र धर्मः । श्रीधर्म्मदेव-श्रीपांडव-श्रीराम-श्रीविक्रमादित्य-श्रीनलनरेंद्रप्रमुखाणां कीर्तिकौमुदी अद्यापि जगन्मध्ये उद्योतं परितस्थं(तं) तनी(नो)ति । तथाहि जिम वृक्षमांहि कल्पद्रुम पुष्पमांहि जातिकुसुम । नरेन्द्रमांहिं रांम । रूवन्तमांहि कांम । देवतामांहि इन्द्र । ज्योतिचक्रमांहिं जिम चन्द । वाजित्रमांहिं भंभा । जिम स्त्रीमांहि रंभा । सतीमांहि सीता । स्मृतिमांहि गीता । साहसीकमांहि विक्रमादित्य । ग्रहणमांहि आदित्य । धनुर्द्धरमांहि अर्जुन । वनमांहि नन्दनवन । रत्नमांहि चिंतामणी । आभरणमांहि चूडामणि । पर्वतमांहि मेरुपर्वत । गजमांहि एरावण । धातुमांहि कांचन । गवामांहि कामधेनु । रसमांहि घृत । जलमांहि अमृत । तथा धर्म्मार्थकामरूपेषु त्रिष्वपि पुरुषार्थेषु श्रीधर्म एव मुख्यः । ते धर्ममांहि जीवदया मुख्य जाणवी ।

[684] बा० आदिः— एह संसारमांहि अनेक पर्व छई । दीपालिकापर्व रजोत्सवपर्व अक्षात्रीज तणु पर्व० ।

[689] अन्तः— इति कल्पान्तर्वाच्यानि समाप्तानि ।

भट्टारकप्रभुश्रीजिनहंससूरिभिः तदुद्धारश्च श्रीमन्निर्मलतपगच्छगगनावभासप्रोद्यत्सहस्रकिरणायमानभट्टारकपुरन्दरश्री ६ हीरविजयसूरि-तत्पट्टविशिष्टविभूषणायमा[न]भट्टारकपुरन्दर श्री६ विजयसेनसूरीश्वरराज्ये पण्डितचक्रचूडामणीयमानपंडितश्रीकुशलवर्धनगणि-शिष्यशिशुना नगर्षिगणिना कृतः, तथा लिखितश्च स्ववाचनकृते ।

[691] अन्तः— सं० १६७५ वर्षे आषाढ शुदि १३ गुरौ श्रीपूर्णिमापक्षे भ० श्रीललितप्रभसूरिविजयराज्ये वाचकगुणजीलिपीकृतं वापीग्रामे ॥

[692] अन्तः— संवत् १६७७ वर्षे आश्विनसित ९ सोमे कर्पटवाणिज्यद्रंगे पंडितश्रीरामविजयगणि-शिष्यपं०श्रीजयविजयगणिनाऽलेखि प्रतिरियम् । गणितेजविजयवाचनार्थम् ।

[693] अन्तः— यथा स विप्रः किल तीव्रकोपात् कुद्वैरशोष्यो बहिरेव चक्रे ।
कोपं न यः पर्वदिनेपि जह्यात् स संघबाह्यो जिनवाक्यमेतत् ॥८॥
इति श्रीकल्पांतर्गतम् ।

शक्रस्तवे१ गर्भसंचारः२ गर्भस्थाभिग्रहः३ श्रीवीरकुटुम्बविचारः४ श्रीवीरपरिवारमोक्षः५ जिनानामंतराणि६ स्थविरावली७ सामाचारी८ कालिकाचार्यकथा९ श्रीकल्पव्याख्यामोक्षस्थानानि ॥

गच्छनायकपरमाराध्यपरमगुरुभट्टारकप्रभुश्रीसोमसुन्दरसूरिपादप्रसादेन श्रीसंघस्य कल्याणं भवतु । शिवमस्तु० ॥१॥—ग्रं० १२०६ ।

[गुर्वावली] —

उर्वी गुर्वी तदनु जलदः सागरः कुम्भजन्मा
व्योमाघाती रविहिमकरौ तौ च यस्यांह्रिपीठे ।
स प्रौढश्रीजिनपरिवृढ[ः] सोमिलस्य प्रशान्ता
स श्रीसंघस्त्रिभुवननतः कस्य न स्यान्नमस्यः ? ॥१॥

नक्षत्राक्षतपूरितं० ॥२॥

श्रीसंघाशीर्वादाः । तत्पट्टे श्रीमहागिरि–सुहस्ती९, तत्पट्टेश्रीसुस्थित–सुप्रतिबद्धौ, तत्पट्टे श्रीइन्द्रदिन्नसूरिः१०, श्रीदिन्नसूरिः११, श्रीसिंहगिरिः१२, श्रीवज्रस्वामी१३, श्रीवज्रसेनः१४, श्रीचन्द्रसूरिः१५, श्रीसामन्तभद्रः१६, श्रीदेवसूरि -- देवसूरिः१७, श्रीप्रद्योतनसूरिः१८, श्रीमानदेवसूरिः१९, श्रीमानतुङ्गसूरिः२०, श्रीवीराचार्यः२१, श्रीजयदेवसूरिः२२, देवानन्दसूरिः२३, श्रीविक्रमसूरिः२४, श्रीनरसिंहसूरिः२५, श्रीसमुद्रसूरिः२६, श्रीमानदेवसूरिः२७, श्रीविबुधप्रभसूरिः२८, श्रीजयानन्दसूरिः२९, श्रीरविप्रभसूरिः३०, श्रीयशोदेवसूरिः३१, श्रीप्रद्युम्नसूरिः३२, श्रीमानदेवसूरिः३३, श्रीविमलचन्द्रसूरिः३४, उद्द्योतनसूरिः३५, श्रीसर्वदेवसूरिः३६, श्रीदेवसूरि ३७, श्रीसर्वदेवसूरिः३८ श्रीयशोभद्रसूरिः३९ श्रीमुनिचन्द्रसूरिः-४०, अजितदेवसूरिः४१, श्रीदेवसूरिः४२, श्रीविजयसिंहसूरिः४३, श्रीसोमप्रभसूरिः४४, श्रीमणिरत्नसूरिः४५, श्रीजगच्चन्द्रसूरिः४६, श्रीदेवेन्द्रसूरिः४७, श्रीविद्यानन्दसूरिः४८, श्रीधर्मघोषसूरिः४९, श्रीसोमप्रभसूरिः५०, श्रीसोमतिलकसूरिः-५१, श्रीदेवसुन्दरसूरयः५२, श्रीसोमसुन्दरसूरयः५३ ।

[अन्यदीयहस्तेन लिखितोऽयं श्लोकः—]

मोहक्षायादनुभवन्नपि नाथ ! मर्त्यो नूनं गुणान् गणयितुं न तव क्षमेत ।
कल्पान्तवान्तपयसः प्रकटोऽपि यस्मान्मीयेत केन जलधेर्ननु रत्नराशिः ॥१॥

[694] **अन्तः—** संवत् १६५० वर्षे आसो मासे शुक्लपक्षे चतुर्दशी(श्यां) लिषितः ॥

[अर्वाचीनलेखनम्]

अंतर्वाच्यं संपूर्णम । पण्डितश्रीचन्द्रविज[य]नी परत ॥ छ ॥

[695] **अन्तः—** इति श्रीकल्पांतर्वाच्यं संपूर्णम् ।

संवत् १६२९ वर्षे आसोज वदि दिने श्रीमच्छ्रीबृहत्खरतरगच्छे गगननभोमणिकल्पश्री ५ जिनदेवसूरिविजयराज्ये श्रीआचार्यश्रीशांतिसागरसूरि-शिष्यश्री-वाचनाचार्यश्रीविमलकीर्त्तिगणि तत्शिष्यवा०श्रीदेवसमुद्रगणि-तत्शिष्यपं०भुवनसिंहगणि-वा०भावसुन्दरगणि–वा०सौभाग्यसुंदरगणि शिष्यसुगुणसागरमुनि-सतीर्थ्य-पं०दयाकुशलेनालिषितं स्वगुरुसांनिध्ये स्वस्वशिष्यशिष्यानुशिष्यादिपठनकृते । भद्रं भूयाल्लेखकस्य श्रीजयतारणिनगरे श्रीभूपतिभूपतौ । श्रीः । चिरंजीवी लाषणस्य कृते प्रतिः ॥ वाच्यमाना चिरं नन्दतु ॥

[696] **अन्तः—** इति श्रीकल्पान्तर्वाच्यानि श्रीजिनहंससूरिराजैः संस्कृत्य लेखितानि । लिखितानि च विद्वत्समाजशिरोरत्नसधर्मपूज्य-पं०सारधर्मगणि–शिष्यकुलसागरगणिभिरात्मकृते । श्रीमत्पत्तन[न]गरे मार्गशीर्षमासे शुक्लपक्षे शुक्रवारे दशमीदिने समाप्तानि ।

[700] **अन्तः**— इति श्रीकल्पसूत्रांतर्वाचि:(? च्य:) समाप्तः ।।

संवत् १६७७ वर्षे अश्विनमासेऽसितपक्षे तृतीयायां बुधे श्रीपूर्णिमापक्षे परमपूज्यभट्टारकश्री५श्रीललितप्रभसूरींद्राणां विजयराज्ये वाचकगुणजी लिपीकृतं-थारवाडाद्रंगे ।।

यदक्षर-पदभ्रष्टं स्वर-व्यञ्जनवर्जितम् ।
तत् सर्वं कृपया देवा क्षमस्व परमेश्वर ! ।।१।।

[701] **अन्तः**— महत्पंचकल्पभाष्यम् । संघदासक्षमाश्रमणविरचितं समाप्तमिति ।।

गाहग्गेणं पंचवीस सत्ताइं चवुहत्तराइं गाथा ।।२५७४।।
सिलोयग्गेणं बत्तीस सताणि दस अट्ठासहियाइं ।।३२१८।।

संवत् १६७२ वर्षे श्रावणवद ११ दिने श्रीमज्जेसलमेरुमहादुर्गे सकलक्षितिपालमण्डलमण्डनराउलश्रीकिल्याणदासजी–कूवरश्रीमनोहरदासजीविजयराज्ये-श्रीखरतरविधिपक्षे सकलजिनशासनरक्षाकरणदक्षसाहिसलेमप्रदत्त–सवाईयुगप्रधानजिनशासनपतिसाहबिरुदद्वयधारकश्रीजिनचन्द्रसूरीश्वर–पट्टालंकारयुगप्रधानभट्टारकश्रीजिनसिंहसूरिषु भणसालीगोत्रीयश्रीमल्लसाह–पुत्रथाहरु-तत्पुत्ररत्नहरिराज–मेघराजजु(यु)तेन स्वकृन्नूतनभाण्डागारे श्रीपञ्चकल्पबृहद्भाष्यं पं० थिराकेन लिपीकृतम् ।

संवत् १७४५ वर्षे काती(र्तिक)सुदि ५ दिने भ० थाहरु-पुत्रमेघराज-तत्पुत्रभोजराजपुत्र्या संखवालथिरराजधर्मपत्न्या श्राविकाकतूनाम्न्या विहारिता प्रतिरियं श्रीजिनचन्द्र[सूरी]श्वराणां ज्ञानभक्त्यै श्रीजेसलमेरमध्ये ।

[702] **अन्तः**— सव्वसुयसमूहमती वामकरगाहियपोत्थया देवी ।
जक्खकुहुंडोसहिया देंतु अविग्घं भणंताणं ।।१।।

संवत् १९१२ वर्षे वैशाख वदि ११ गुरुवारे । लिपीकृतं गुसांईशंकरयतिश्रीविक्रमपुरे वरे रम्ये ।

[703] **अन्तः**— पंचकल्पचूर्णिः समाप्ता ।। ग्रन्थप्रमाणं सहस्रत्रयं शतमेकं पंचविंशत्युत्तरं लिखितं श्रीमदाम्रदेवाचार्यकृते पञ्चकल्पपुस्तकम्, अंकतोऽपि ग्रन्थप्रमाणम् ३१२५ ।।

संवत् १९१२ वर्षे वैशाखशुदि ८ दिने लिखितम् । गुसांईशंकरयतिना श्रीमद्विक्रमपुरे वरे ।

धन्यास्ते येऽपि तारुण्ये त्यक्त्वा साम्राज्यसंपदम् ।
दुर्द्धरं च तपस्तप्त्वा पुनर्नायान्ति संसृतौ ।।

[711] **आदिः**— ।। ॐ नमः श्रीजिनप्रवचनाय ।।

जयति महोदयशाली भास्वान् श्रीवर्द्धमानतीर्थपतिः ।
विशदं चरणपथं सा तपस्थितिर्यैदुदिता तनुते ।।१।।
जयति प्रवचनदीपः प्रतिहतदुरपोहमोहतिमिरौघः ।
चित्रं निरञ्जनोऽयं जगति गुणग्रामवृद्धिकरः ।।२।।
सकलत्रिलोकविस्मयविधायिनिस्सीमधीगुणातिशयान् ।
बहुविधलब्धिसमृद्धान् निखिलानपि गणधरान् नौमि ।।३।।

प्रणमामि विश्रुतं श्रीजिनभद्रगणिक्षमाश्रमणमुख्यम् ।
संक्षिप्तजीतकल्पं महाश्रुताद् यः समुद्दध्रे ॥४॥
श्रीसोमप्रभसूरीन् गुरूत्तमान् स्तौमि विश्रुतातिशयान् ।
सुविहितहिताय विहितः सव्यासो यैरसावेव ॥५॥
श्रीसोमतिलकसूरीन् वन्दे विख्यातवैभवाभ्युदयान् ।
यैरस्य जीतकल्पस्यातेने वृत्तिरतिविशदा ॥६॥
मन्दमतिबोधहेतोरतिगहनमहागमावगाहनया ।
कालानुभाववशतो व्युच्छिन्ना सा तदैव परम् ॥७॥ युग्मम् ॥
जगति जयन्ति गरिष्ठा गुरवः श्रीदेवसुन्दरमुनीन्द्राः ।
संप्रति निष्प्रतिमगुणप्रभाः प्रभावाद्भुता विदिताः ॥८॥
जे(? ये) निजवचनसुधाञ्जनवशेन शिष्यस्य मादृशस्यापि ।
उद्घाटयन्ति लोचनमान्तरमज्ञानतिमिरभृतम् ॥ ९ ॥
तस्याः पुनरालेखे चित्रकलाकौशलेन विकलोपि ।
तैः स्वविनेयकनिष्ठोप्यादिष्टोऽयं ततो यतते ॥१०॥
यद्यपि साहसमेवं कुर्वन् हास्योऽस्मि तदपि किं कुर्वे ।
यन्मामत्र प्रसभं प्रेरयति गुरुप्रसादोऽयम् ॥११॥

अन्तः— एतासां च गाथानां विवरणमपि प्रायस्तद्रूपमेव तत्तद्ग्रन्थगतमत्र लिखितमस्तीत्यवगन्तव्यम् । इदं चैवंविधं जीतकल्पसूत्रं कालानुभावतः प्रायो निराधारपारमेश्वरप्रवचनाधारभूतैः निर्म्मलसंयमकमलाहृदयालङ्कारहारकल्पैः सकलसुविहितव्रातशिरोमणिभिः विश्वविख्यातश्रीतपामहागच्छगगनांगणनभोमणिभिः परमगुरुश्रीसोमप्रभसूरिभिः पवित्रचारित्रैकतानमानसैः मन्दतरमेधाधारणावगमविनेयजनानुग्रहार्थमेव अमुद्रसकलपरमागमसमुद्रं महाप्रयत्नेनावगाह्यामृतकल्पं प्रकटमकारीति ।

इति यतिजीतकल्पवृत्तिर्जगत्प्रतीतश्रीतपागच्छाधिराजसुविहितशिरोमणिभट्टारकप्रभुश्रीदेवसुन्दरसूरि-शिष्यश्रीसाधुरत्नसूरिकृता ।

वर्षे तर्क्क-शराब्धि-चन्द्रगणिते(१४५६) श्रीविक्रमार्काद् गते
गुर्वादेशवशाद् विलोक्य सकलाः कल्पादिशास्त्रावलीः ।
सूरिश्रीयुतदेवसुन्दरगुरोः शिष्याग्रणीरातनो-
देतां श्रीयतिजीकल्पविवृतिं श्रीसाधुरत्नाह्वयः ॥१॥
प्राज्ञैरुद्देशतो वृत्तौ ग्रन्थमानं विनिश्चितम् ।
सहस्राः पञ्च श्लोकानां शतैः सप्तभि(५७००)रन्विताः ॥२॥

[712] **अन्तः**-- जीतकल्पबृहच्चूर्णौ व्याख्या शास्त्रानुसारतः ।
श्रीचन्द्रसूरिभिर्दृब्धा स्वपरोपकृतिहेतवे ॥१॥
मुनि-नयन-तरणि(१२२७)वर्षे श्रीवीरजिनस्य जन्मकल्याणे ।
प्रकृतग्रन्थकृतिरियं निष्पित्तिमवाप रविवारे ॥२॥
संघ-चैत्य-गुरूणां च सर्वार्थप्रविधायिनः ।
यशाभयकुमारस्य वसतौ दृब्धा सुबोधकृता ॥३॥
एकादशशतविंशत्यधिकश्लोकप्रमाणं ग्रं० ११२० ॥

[713] अन्तः— इति नुतिकृतसुकृतः श्रुतरहस्यकल्पजीतकल्पस्य विवरणलवं करिष्ये[ऽ]स्तस्मृति-बीजप्ररोहाय ।

पुनरयं पात्रे सुपरीक्षितगुणे जात्यकाञ्चनवत्तापच्छेदनिकषसहे संविग्नेन गीतार्थेन पुनरन्यस्मिन् येन जीतकल्पदाय[क-ग्राह]कौ द्वावपि कर्म्मनिर्ज्जरया शुद्ध्यतश्चेति ।

इति श्रीतिलकाचार्यविरचिता जीतकल्पवृत्तिः समाप्ता ।

श्रीमांश्चन्द्रप्रभः सूरिर्युगप्राधान्यभागभूत् ।
तदासममलंचक्रुः श्रीधर्म्मघोषसूरयः ॥१॥
तत्पट्टश्रीभुजोऽभूवन् श्रीचक्रेश्वरसूरयः ।
श्रीशिवप्रभसूरिस्तत्पट्टश्रीहारनायकः ॥२॥
तदीयशिष्यलेशोहं सूरिः श्रीतिलकाभिधः ।
अनन्यसमसौरभ्यश्रुताम्भोजमधुव्रतः ॥३॥
इमामीदृग्विधां चूर्णेस्तस्याश्चोपनिबन्धतः ।
गुरूणां संप्रदायाच्च विज्ञायार्थं स्वशक्तितः ॥
अकार्षं जीतकल्पस्य वृत्तिमत्यल्पधीरपि ।
सा विशोध्या श्रुतधरैः सर्व्वैर्मयि कृपापरैः ॥५॥
सहस्रमेकं श्लोकानामधिकं सप्तभिः शतैः ।
प्रत्यक्षरेण संख्याय [मान]मस्य विनिश्चितम् ॥६॥

[717] आदिः— कयपवयणप्पणामो जीअगयं सह्वदाणपच्छित्तं ।
सपरहियधार[ण]दठा जहासुअं किंपि जंपेमि ॥१॥

अन्तः— इय एस जीयकप्पो समासओ सुविहियाणुकंपाए ।
कहिओ देओ अ पुणो पत्ते सुपरिच्छियगुणंमि ॥१३७॥
सिरिदेविंदमुणीसरविणेयसिरिधम्मघोससूरीहिं ।
इय सपरधारणट्ठा रइयं सोहंतु गीयत्था ॥१३८॥

जीतकल्पसूत्रम् ॥

[725] अन्तः— संवत् १८७३ बरषे(वर्षे) असाड(षाढ)मासे क्रस्न(ष्ण)पषे(क्षे) वार ११ सु-(शु)क्रवार पुजजीश्री १०८ श्रीसांमादासजी-तत्सिष्यपुजजीश्री १०८ श्रीगाकमल-जी-तत्सिष्यपूजजीश्री १०८ श्रीकनारामजी-तत्सिष्यलष(लिखि)तं जगराम । साहेपुरामध्ये ।

[726] अन्तः— श्रीपूर्णिमापक्षे प्रधानभट्टारकश्रीजयसिंहसूरि-पट्टालंकारश्रीजयप्रभसूरिणा एषा पुस्तिका लिखिता । संवत् १५२१ वर्षे मार्गशि[र]वदि ४ रविवासरे संपूर्णीकृता ।

[731] वृत्त्यारम्भः— अथ नन्दिः इति कः शब्दार्थः ? उच्यते-'टुनदु समृद्धौ' इति अस्य धातोः 'उदितो नुम्' इति नुमि विहिते नन्दनं नन्दिः, प्रमोदो हर्ष इत्यर्थः । नन्दिहेतुत्वात् ज्ञानपञ्चकाभिधायकं अध्ययनं अपि नन्दिः, नन्दन्ति प्राणिनः अनेन अस्मिन् इति वा नन्दिः ।

वृत्त्यन्तः— एष एव सर्वत्र श्रवणविधिनियमः उद्घट्टितज्ञविनेयानां सकृत् श्रवणत एव अशेषग्रहणदर्शनात् इति कृतं प्रसंगेन तदेतत् श्रुतज्ञानं तदेतत् परोक्षम् इति । अथाग्रे सूत्रपाठः ।

[734] स्त० अन्तः— इति श्रीनंदीसूत्रटबार्थः संपूर्णः ॥
संवत् १७८१ वर्षे चैत्र सुदि १ गुरुवासरइ ।

मू०अन्तः— इति श्रीनंदीसूत्रं संपूर्णः(र्णम्) ।
संवत् १७८१ वर्षे चैत्रशुदि १ गुरुवासरे लिखितं पं०श्री ५ श्रीजयसागरगणिभिः ।

[737] अन्तः— संवत् १६९४ वर्षे पौष शुदि १२ सोमे लषितं राउलकेसव ।
संवत् १६९४ वर्षे पोस(ष)शुदि पूर्णिमायां तिथौ श्रीस्तंभतीर्थवास्तव्य-श्रीश्रीमालीज्ञातीयवृद्धशाखीय-दोसीलहूया-भार्याबाईचंपाई तयोः पुत्राः दोसी-सुमतिदास-दो०कीका-दो०केशव-दो०सुमतिदास-भार्यासोभागदे-तत्पुत्र-दो०-जयकरणेन स्वबन्धुदो०कानजीप्रमुखकुटुम्बयुतेन । चित्कोशवृद्धयर्थं स्वश्रेयसे च ४५ प(पि)स्तालीशआगमसूत्रवृत्तिपुस्तकं लिषापितम् । तन्मध्ये श्रीदशमांग-सूत्रपुस्तकं लिखापितम् । शुभं भवतु नन्दोपुस्तकम् ।

[741] अन्तः— सं० १८९२ वर्षे फागुणसुदि १३ दिने श्रीमेशाणामध्ये लिषितं पं०-सुरेन्द्रविजयग० गां०लालचन्दकुबेरचन्दवाचनार्थम् । श्लोक ३००८(३०८) ।

[746) अन्तः— किं वक्त्रेन्दुसमुद्भवद्युतिभरः किं हृद्यविद्यावधू-
लीलानिर्म्मितसुस्मितं किमु सुमस्तोमक्षमाभूरुहः ।
इत्थं यस्य वितर्क्यते सुकविभिर्व्याख्यानवाग्वैभवः
शुभ्रोऽतीवजयप्रभः स जयतां सूरीश्वरः सर्वदा ॥१॥
संवत् १५२६ वर्षे मार्गशीर्षसुदि १ तिथौ शनिवारे शुभमुहूर्ते व्यलीलिखत् ।

[747] अन्तः— संवत् १५३१ वर्षे ज्येष्ठ सुदि ९ रवौ तपागच्छे गच्छनायक-श्रीलक्ष्मी-सागरसूरि-तत्शिष्यश्रीजिनहंसूरि-तत्शिष्यपं०नेमिकीर्ति[ना] लिखापिता श्रीअण-हिल्लपुरपत्तनवास्तव्यऔदीच्यज्ञातीयव्यासश्रीनाथसुत-लेखककान्हालिखितम्, इल-प्राकारमध्ये लिखितम् ।

[752] अन्तः— संवत् १५८५ वर्षे भाद्रवदमासे श्रीपत्तननगरे वहुरागोत्रे श्रीश्रीमालज्ञातौ व०लाडण-पुत्रव०सिहा-भार्याअमरी-पुत्रव०हरषाकेन भार्या श्रा०राणी-पुत्र-व०कमलसी, व०विमलसी । कमलसी-भार्याश्राविकाकमलादेपुत्रव०सहसकरण-प्रदथकरण-विजयकरण । विमलसी-भार्याविमलादे-पुत्रव०वच्छाप्रमुख-परिवार-युतेन श्रीसिद्धान्तकोशः श्रीआवश्यकबृहद्वृत्ति[:] स्वगृहे पुण्यार्थे भाण्डागारे कारापिता ।

[755] अन्तः— संवत् १५२० वर्षे ज्येष्ठशुदि ८ सोमे वारे आंबालिषितम् मं०केल्हालि० ।
(अन्यदीयहस्तेन लिखितम्-)

ग्रन्थाग्रम् ४६४० । प्राग्वाटज्ञातीयसं०ठाकुरसी-भार्याबेनञक-सुतकेहला-भार्याकर्मादेआत्मश्रेयोर्थम् ।

[760] अन्तः— स्वस्तिसंवत् १४ आषाढादि ९९ कार्तिकबहु... ...
सं० १५१६ वर्षे आषाढ सुदि ५ दिने वा०महिमराजगणीनामुपदेशेन सं०माणिकभार्यया जीवणीश्राविकया लुष्कादमो चि(? लिखापितं) शास्त्रमिदं श्रीमंडपदुर्गे ।

[761] अन्तः— ॐ नमः पंचपरमेष्ठिभ्यः ।
देवः श्रीनाभिसूनुर्जनयतु स शिवान्यंसदेशे यदीये
खेलन्ती कुन्तलाली विलसदलिकुलप्रोज्ज्वला शालते स्म ।
संजाते संयमश्रीपरिणयनविधौ मांगलिको त्रिलोकी-
लक्ष्म्यां दूर्वाङ्कुराणां ततिरिव पतितो ध्वस्तहस्तद्वयाग्रात् ॥१॥
विश्वाहंकारमर्दी समितिकृतरतिश्चक्रचापाङ्कपाणिः
प्रोद्यद्गीर्वाणशाला व्यपहृतविषमाखारिदोदण्डकण्डूः ।
भक्तिप्रागभारनम्रक्षितिपतिपटली मौलिकोटीरकोटी
शाणाकोणाग्रलेखोल्लिखितनखशिखः पातु वीरस्त्रिलोकीम् ॥२॥
नित्यं यत्प्रणिपातसंभ्रमभृतां पादाब्जपीठस्थल-
न्यासोल्लासिकिणावलीव्यतिकराद् भालेषु भव्यात्मनाम् ।
एतेऽनन्तमहोमहोदयपदे योग्या इति प्रीतितः
पुण्यद्धर्या किल वर्द्धितानि तिलकान्यव्याज्जिनौघः स वः ॥३॥
यत्कान्तिप्रसरेण विश्वधवलीकारश्रिया सर्वतः
सद्ध्यानं परिपच्यतेऽधिमनसं शुक्लं तदक्लेशतः ।
येनोत्सर्पति सर्ववाङ्मयगतं ज्ञानं परं तत्क्षणात्
सोऽस्माकं श्रुतदेवता रचयताद् विघ्नोपशान्तिक्रियाम् ॥४॥
आस्तेऽनन्यजना मनस्यनुकलं स्वस्वामिभक्तिस्ततो
वासं यस्य चकार पाणिकमले सा केवलश्रीर्ध्रुवम् ।
नैवं चेद् विलसास तत् कथमियं सर्वत्र तत्र क्षणात्
न्यस्तो यत्र भवेदयं स भगवान् श्रीगौतमो नन्दतात् ॥५॥
गवामीशे यत्र प्रवचनधुरां धर्मधवले
स्फुरद्व्याख्यानादप्रतिहृतसमस्तेतरवृषे ।
समारोप्यात्मीयां त्रिभुवनपतिर्निर्वृतिमगाद्
भवारण्यान्निस्तारयतु स सुधर्म्माभिधगुरुः ॥६॥
तत्त्वार्थैरत्नौघविलोकनार्थं सिद्धान्तसौधान्तरहस्तदीपाः ।
निर्युक्तयो येन कृताः कृतार्थस्तनोतु भद्राणि स भद्रबाहुः ॥७॥
तस्यावश्यकनिर्युक्तिगवो वृहद्वृत्तिभाजनेऽपयः ।
प्रगुणीकरोमि सरसं रसलोलुब्लोकतुष्टिकृते ॥८॥

परं क्व द्वादशांगीभृद् भद्रबाहुगुरोर्गिरः ।
मुग्धधीर्बालिशः क्वाहं पदमात्रेऽप्यशक्तिमान् ॥९॥

तद् यदावश्यकमहं विवरीतुं मतिं व्यधाम् ।
गङ्गां तरीतुमारब्धस्तद् दोष्णैकेन कृष्णवत् ॥१०॥

महाशास्त्रस्य चामुष्य महाकविविनिर्मिते ।
गम्भीरार्थे महत्यौ स्तश्चूर्णिवृत्तिश्च यद्यपि ॥११॥

तथाप्यत्यल्पधीहेतोरल्पधीरप्यहं पुनः ।
रचयिष्याम्यमूं वृत्तिमुत्तमार्थां लघीयसीम् ॥१२॥

ततोऽत्र यदहं कुर्वे तत् सर्वं गुरुभक्तिजम् ।
जानन्तु माऽवजानन्तु सन्तः सुमनसो मयि ॥१३॥

तथाहि— संजातेऽवसरेऽधुना श्रुतसुधाधाराकिरो मद्गिरः
सद्यः पल्लवयन्तु भव्यहृदयारामे प्रबोधद्रुमम् ।
लब्धात्यद्भुतवासनाद्गसुमनोभावं सदालिप्रियं
यस्तैस्तैः फलितः फलैरविरलैः स्वर्गापवर्गादिभिः ॥१४॥

इहायं शास्त्रवेधसां सुमेधसां शास्त्रसंदर्भारम्भसंरम्भविधिः यथा सर्वाण्यपि शास्त्राणि मङ्गलाभिधेयसंबन्धप्रयोजनप्रतिपादनपूर्वाण्येव प्ररूप्यन्ते ।

अन्तः— इति श्रीतिलकाचार्यविरचितायामावश्यकलघुवृत्तौ प्रत्याख्यानाध्ययनं समाप्तम् । अत्र ग्रन्थाग्रम् ६९८ । तत्समाप्तौ समाप्तेयमावश्यकलघुवृत्तिः । ग्रन्थसर्वाग्रम् १२३२५ ।

तीर्थे वीरविभोः सुधर्मगणभृत्संतानलब्धोन्नति-
श्चारित्रोज्ज्वलचन्द्रगच्छजलधिप्रोल्लासशीतद्युतिः ।
साहित्यागम-तर्क-लक्षण-महाविद्यापगासागरः
श्रीचन्द्रप्रभसूरिरद्भुतमतिर्वादीभसिंहोऽभवत् ॥१॥

तत्पट्टलक्ष्मीश्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
यत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥२॥

तत्पट्टोदयशैलशृङ्गमभजत् तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया कोऽप्यत्र भानुर्नवः ।
संप्राप्ताभ्युदयः सदैव तमसा नो जातु विच्छायितः
नैवोच्चण्डरुचिः कदाचिदपि न प्राप्तापरागस्ततः ॥३॥

विलास स्वैरं तत्पट्टप्रासादचन्द्रशालायाम् ।
श्रीमान् शिवप्रभगुरुः संयमकमला[कृता]सक्तिः ॥४॥

श्रीशिवप्रभसूरीणां तेषां शिष्योऽस्मि मन्दधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥५॥

एतां वृत्तिं लघुमविषमां सोऽहमावश्यकीयां
तत्पादाब्जस्मरणमहसा मुग्धधीरप्यकार्षम् ।

तद्यत्किञ्चिद् रभसवशतो दृष्टमस्यामशुद्धं ।
तत् संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥६॥

वृत्तिं रचयता चैतां सुकृतं यन्मयार्जितम् ।
भवे भवेहं तेन स्यां श्रुताराधनतत्परः ॥७॥

शतद्वादशकेब्दानां गते विक्रमभूभुजः ।
संवत्सरे षण्णवतौ(१२९६) वृत्तिरेषा विनिर्ममे ॥८॥

शिष्या नः शस्यचारित्राः सर्वशास्त्राब्धिपारगाः ।
अस्यां साहाय्यकं चक्रुः श्रीपद्मप्रभसूरयः ॥९॥

शिष्योऽस्माकमिमां वृत्तिमखिन्नः शास्त्रतत्त्ववित् ।
अलिखत् प्रथमादर्शे यशस्तिलकपण्डितः ॥१०॥

स सपादत्रिशत्यस्यां श्लोकद्विषट्सहस्रिका ।
प्रत्यक्षरेण संख्याता इति निश्चितवानहम् ॥११॥

यावद् विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
तावदेषा मरालीव खेलतात् कृतिमानसे ॥१२॥

श्रीसंघस्य कल्याणमस्तु शुभं भवतु ।

[763] **आदिः**— ॐ नमः श्रीपञ्चपरमेष्ठिभ्यः ।
श्रीवीरजिनवरेन्द्रं वन्दित्वा चैत्यवन्दनादीनि ।
अल्परुचिसत्त्वहेतोर्विवरिष्ये गमनिकामात्रम् ॥१॥
इह चैत्यवन्दनादीनां विवृतिरारब्धा ।

अन्तः— इति श्रीतिलकाचार्यविरचिता साधुप्रतिक्रमणसूत्रवृत्तिः समाप्ता ।
अधिकं षण्णवत्यात्र शते द्वैतमनुष्टुभाम् ।
प्रत्यक्षरेण संख्याय ग्रन्थमानं विनिश्चितम् ॥१॥

[765] **अन्तः**— एवमित्यादि । एवं प्रतिक्रमणसूत्रभणितप्रकारेणालोच्य निन्दित्वा गर्हित्वा जुगुप्सित्वा त्रिविधेन प्रतिक्रान्तः चतुर्विंशतिजिनानि वन्दे नमस्करोमीत्यर्थः ।
श्रीचन्द्रसूरिगुरुप्रतिक्रमणसूत्रलघुवृत्तिः समर्थयांचक्रे ।
संवत् १५२६श्री......सूरिपट्टे भ० जिनहर्षसूरीणामुपदेशेन सं० साहिजराजेन ।

[767] **आदिः**— ॐ नमः श्रीजिनप्रवचनाय । प्रारभ्यते श्रीआवश्यकानुयो[गो]ऽत्र मंगलादीनि वाच्यानि ।

अन्तः— इति [श्री]मदावश्यकावचूरिः समाप्ता ।
श्रीमत्तपागणनभोङ्गणभास्कराभश्रीदेवसुन्दरयुगोत्तमपादुकानाम् ।
खाऽब्धि-युगेन्दु(१४४०)मितेऽब्देऽवचूर्णिरावश्यकस्य जयिनीयम् ।
शिष्यैर्जिनागमसुधाम्बुधिलीनचित्ते श्रीज्ञानसागरगुरूत्तमनामधेयैः ॥१॥
विदधे बृहद्विवरणात् श्रुतभक्त्या स्व-परहितहेतोः ॥२॥
इति श्रीज्ञानसागरसूरिविरचिता श्रीमदावश्यकावचूर्णिप्रान्ते प्रशस्तिर्लेखनीया ।
संवत् १६१९ वर्षे चैत्रशुदि ७ बुधे ।

[768] अन्तः— इत्याचार्यश्रीहरिभद्रसूरिकृतवृत्त्यनुसारदो(तो) भट्टारकप्रभुश्रीज्ञानसागरसूरिगणधरै-
रियमवचूरि[:] कृता, ततो(द्)परि लिखितास्ति ॥
संवत् १५०६ वर्षे ज्येष्ठशुदि १५ भोमे पुस्तिका लिखापिता चिरं नन्द्यात् ।

[770] आदिः— नमः श्रीवर्द्धमानाय । श्रीमद्गच्छेशश्रीरत्नसिंहसूरिगुरुभ्यो नमः ॥
श्रीआवश्यसूत्रनिर्युक्तिविषयाः प्रायो दुर्गपदार्थाः कथामात्रं निर्युक्त्युदाहृतं च लिख्यते । इह श्रीदेववाचकेपत्यरनामा देवर्द्धिगणिज्ञानपञ्चकरूपं नन्दिग्रन्थ-वक्तुकामो मङ्गलार्थं पूर्वमावलिकां अभिधित्सुः सामान्यतोऽर्हतः स्तुतिमाह ।

अन्तः— इति प्रत्याख्याननिर्युक्तिः समाप्ता ।
रमणीयमनोज्ञपदा सुरसार्थविराजिता त्रिपथगेव ।
वियदिव च विचारिश्रीरावश्यकदीपिका जयति ॥

[771] अन्तः— (अन्यहस्तेन लिखितमिदम्--)
पं० ज्ञानरगणिशिष्य-पं० आणन्दविजयगणि-शिष्यहर्षविमलगणीनी प्रतिः ।

[774] आदिः— श्रेयांसि श्रीमहावीरः स श्रीसंघस्य यच्छतात् ।
यस्याज्ञा कल्पवल्लीव मनोवाञ्छितदायिनी ॥१॥
श्रीवर्द्धमानजिनशासनराज्यनेता विश्वत्रयाद्भुतचरित्रयुगप्रधानः ।
श्रीसोमसुन्दरगुरुर्गुरुचक्रवर्त्ती भूयादमेयमहिमा मम सुप्रसन्नः ॥२॥
तत्पट्टनायकाः श्रीमुनिसुन्दरसूरयो जयन्त्यधुना ।
जयचन्द्रसूरि-जिनकीर्त्तिसूरिपरिवारपरिकरिताः ॥३॥
स्वान्ययोरुपकाराय लिख्यते लेशतो मया ।
षडावश्यकसूत्राणां व्याख्या बालावबोधिनी ॥४॥

पहिलउं सकल मंगलीकनउं मूल, श्रीजिनशासनउं सार, इग्यार अंग चउदपूर्वनउ उद्धार, सदैव शाश्वतउ । श्रीपंचपरमेष्ठि महामन्त्र नउकार नमो अरिहंताणं०—

[775] आदिः— शिवाय श्रीमहावीरः सुरासुरनमस्कृतः ।
चतुर्विधस्य संघस्य भवतात् गौतमान्वितः ॥१॥
प्रवरे खरतरगच्छे श्रीमज्जिनसूरयोऽभवन् ।
तत्पट्टे विजयन्ते श्रीमज्जिनचन्द्रसूरयो गुरवः ॥२॥
षडावश्यकसूत्राणां तेषामादेशतो मया ।
बालावबोधः संक्षेपात् लिख्यते प्रकटार्थवान् ॥३॥

अन्तः— इति श्रावकप्रतिक्रमणबालावबोधः ।

सं० १५७५ वर्षे श्रावणसुदि ४ श्रीखरतरगच्छनायकश्रीजिनराजसूरि-पट्टालङ्कारश्रीजिनभद्रसूरि-पट्टपूर्वाचलचूलिकाश्रृङ्गारदिवाकराणां विजयवतां सुविहित-सूरिशिरोमणीनां श्रीपूज्यश्रीजिनचन्द्रसूरिराजानामादेशेन श्रीमंडपमहादुर्गे श्रीसंघा-भ्यर्थनया वाचनाचार्यरत्नमूर्त्तिगणि-शिष्यवा० मेरुसुन्दरगणिना श्रीषडावश्यक-वार्त्ताबालावबोधः परोपकाराय श्रीतरुणप्रभाचार्यकृतबालावबोधानुसारेण कृतोयम् ।

बहुश्रुतिः[भिः] प्रसत्ति विधाय यदुत्सूत्रं भवति तत् शोधनीयम् । सर्वैरपि वाच्यमानं चिरं नन्दतात् । ग्रन्थाग्रम् १५०० ।

[776] **मू०आदिः**— ऐं नमः । नमो अरिहंताणं, नमो सिद्धाणं० ... ...

बा०आदिः-- एहनुं अर्थ । पहिलुं सकल मङ्गलीकनुं मूल श्रीजिनशासननुं सार अग्यार अङ्ग चउदपूर्वनुं सार... ... ...

बा०अन्तः-- श्रीषडावश्यकबालावबोध संपूर्ण हूउ । ... ...

इति श्रीतपागच्छनायकश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरिपदकमलसंसेवित-शिष्यमहोपाध्याय-श्रीहेमहंसगणिनाऽभ्यर्थनाकृतोयं षडावश्यकबालावबोधः समाप्तः ।

संवत् १६६५ वर्षे मार्गशीर्ष सुदि १४ शनौ लिखितम् ।

[777] **अन्तः**— संवत् १७२८ वर्षे फागुणसुदि २ दिने सोमे श्रीअहमदनगरमध्ये बृहत्तपापक्षे भ० श्री ५ श्रीकल्याणरत्नसूरीणां शिष्यपं०श्री ५ श्रीसुमतिरत्न-तत्शिष्यमहोपाध्याय-श्रीदेवविजयगणीनां गुरुप्रसादात् साध्वीश्री ५ श्रीहीरश्रीशिष्यणीज्ञानश्रीलिखितम्, आत्मपठनार्थम् ।

[778] **अन्तः**— प्रत्याख्यानबालावबोधः ।

चउथउ अधिकार संपूर्ण हुउ श्रीषडावश्यकबालावबोधः संपूर्णः । एह मांहि च्यारि अधिकारः—पहिलइ अधिकारी देववन्दन१, बीजइ गुरुवन्दन२, त्रीजइ पडिकमणुं३, चउथइ पच्चक्खाण४ ।

वर्षे भूमि-नभः-शरावनि(१५०१)मिते शुद्धक्रियासादरः

श्राद्धाभ्यर्थितसोमसुन्दरगुरोरादेशतो निर्मिता ।

तच्छिष्याणुजहेमहंसगणिना सेयं षडावश्यक-

व्याख्या पुष्यतु दक्षतां जिनमते बालावबोधाभिधा ॥१॥

इति श्रीतपागच्छनायकसकलसुविहितपुरन्दरश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरिपदकमलसंसेविना शिष्यश्रीहेमहंसगणिना श्राद्धवराभ्यर्थनया कृतोऽयं षडावश्यकबालावबोध आचन्द्रार्कं नन्द्यात् ।

षडावश्यकबालावबोधः समाप्तमि(प्त इ)ति ।

संवत् १६८१ वर्षे ज्येष्ठमासे शुक्लपक्षे द्विती[या]यां तिथौ शुक्रवासरे श्रीआगमगच्छे पूज्यभट्टारकश्री ४ संयमरत्नसूरीश्वराणां शिष्यपं०श्रीजयरत्न-तत्शिष्यपं०-श्रीदेवरत्न-तच्छिष्यऋषि०वरसिंघलिखितं, श्रीछक्कूपल्लीग्रामे लिषितमिति । ग्रन्थाग्रम् २६४१ ।

[779] **अन्तः**— इति श्रीश्रावकप्रतिक्रमणसूत्रबालावबोधः । षडावश्यकबालावबोधः संपूर्णः समाप्तम् ।

संवत् १७३८ वर्षे कार्तिकवदि ५ दिने भृगुवासरे वाचनाचार्यश्रीराजहर्षजीगणि-तत्शिष्यराजलाभगणिलिखितं श्रीवणाडमध्ये ।

यादृशं० ॥१॥ श्लोकसंख्याग्रन्थाग्रम् १५०२ लिख्यमानं वाच्यमानं चिरं जीयात् ।

[780] **मू०अन्तः**— वर्षे चन्द्र-जनार्दनप्रियतमापुत्रांशुगर्षि-क्षमा(१७५१)

मेये श्रीविजयादिमानगणभृत् प्राज्ये प्रदीपोत्सवे ।

प्राज्ञश्रीसुयशान्वितस्य विजयस्यामुं षडावश्यका-
र्थो योगं कृतवान् जिनादिविजयोऽन्तेवासिमुख्यः सुधीः ॥१॥

सम्यक्त्वशुद्धव्रतधारिकाया रूपाभिधाया प्रचुराग्रहाच्च ।
आर्यां प्रति दर्शननामधेयः शिष्यो लिलेखार्कपुरे मुदिते ॥२॥

इति षडावश्यकबालावबोधः समाप्तः ।

संवत् १८९५ रा मिति आसाढ सुदि ९ आदित्यवारे ।

स्त०अन्तः— हिवें षडावश्यक किसैंस किणें कीधो किणरै वास्तें ते लिष छै । संवत्सरनें विषें चन्द्र १, जनार्दन क० श्रीकृष्ण तेहनी प्रियतमा स्त्री रुषमणी तेहनो पुत्र प्रद्युम्न, बीजू कामदेव तेहनो अंशुक बाण एतले पाँच, ऋषि क० सात, क्षमा क० पृथिवी ते एक १, तत्प्रमाण एटलें संवत् १७५१ वरसें श्रीविजयमा-[न]सूरिनूं राज्य तलें दीवालीने दिवसें पण्डित श्रीयशविजयनो शिष्य ए षडावश्यक तेहनो अर्थना उद्यम प्रतें कर्यो, जिनविजय नामा अंतेवासी वृद्ध शिष्यें ॥१॥ शुद्ध सम्यक्त्व व्रतधारिका श्राविका रूपां एहवें नामें तेहनां घणे घणे कहेवेथी ।

इति श्रीषडावश्यक नांमें पडिकमणो बाला[व]बोध संपूर्ण थयो ॥

अन्यदीयहस्तेन लिखितमिदम्–)

॥ साध्वी श्रीसिणगारसिरीजीपठनार्थं पनीबाईउपदेशात् श्रीसंघेन लिखापितं श्रीबीकानेरमध्ये ।

[783] **सूचनम्**— आद्यन्तसंदर्भार्थं द्रष्टव्यम् नं० 44 ।

[784] **अन्तः**— इति श्रीख(ष)डावश्यकबालावबोधः समाप्तः ।

इन्द्र–इन्दु–कलामिते(१६६४)संवत्सरे पोषमासे राकातिथ्यां र[वौ] वासरेऽलेखि श्रीमद्राजनगरे लिखितमिदं पुस्तकम् ग्रं०९०० ।

[787] **अन्तः**— संवति १८७० वर्षे आषाढादिचैत्रवदि ९ तिथौ गुरुवासरे श्रीईडरगढे लि० गणिकुशलविजय(येन) स्ववाचनाय परार्थं च श्रीमत्तपागच्छाधिराजभ० श्रीविजयजिनेन्द्रसूरिराज्ये कल्याणमस्तु सर्वेषां सज्जनानां लेषक–पाठकयो-राचन्द्रार्कं चिरं जीयात् ।

अज्ञानाच्च मतिभ्रंशाद् यत् कूटं लिखितं मया ।
मिथ्या मे दुष्कृतं तस्य मनो-वाक्काय-शुद्धितः ॥१॥

यावज्जिनवरसमयो यावद्रविहिमकरौ सुरगिरिश्च ।
ग्रन्थस्तावन्नन्दतु विबुधवरैर्वाच्यमानोयम् ॥२॥ इति ॥

[788] **अन्तः**—पं०श्री१०८श्रीहस्तिविजयजी तत्सी(शि)ष्यवाचनार्थम् ।

संवत् १८४९ फागणविदि ३० अम्मावास्यादिने ग्रामवियुत्पुरे चोमासुं रह्या हता तारे लिष्यो ।

[789] **स्त०अन्तः**— अरिहंत तेह ज माहरे देव तरणतारण छें अनें जावजीव सुसाधु ते चारित्रिया माहरें गुरु अनें जिमनो प्रकास्यो जीवदया मूल धर्म इसिउं सम्यक्त्व में लीधुं ते प्रहिउं निश्चलमनें करि ।

इति संथारापोरसीसूत्रं संपूर्णम्। इति श्रीपडिकमणु षडावश्यकं समासम् ॥ पठनार्थं वीरं जीयात् ग्रन्थाग्रन्थ १४०० छें। लक्षावितं बाई जासुपठनार्थं वा पर्मा-(परमा)र्थम् ।

[798] अन्तः— इति यतिप्रतिक्रमणसूत्रं समाप्तमिति ॥

श्रीपूज्यदेवरत्नसूरि–तत्स(शि)क्षश्रीपण्डितसुमतिरत्नगणी-तत्स०(शी०)-श्रीऋ०राजसुं[द]र–तत्० लब्धिसुन्दरपठनार्थं लक्षी(लिखि)तम् ।

[800] अन्तः— संवत् १५६६ वर्षे कार्तिकवदि ४ दिने बुधवारे श्रीपूर्णिमा[प]क्षे प्र०श्री५ श्रीभुवनप्रभसूरि–तत्शिष्यानुशिष्यैः(ष्येण) मुनिराजसुन्दरेण लेखितः ।

[802] अन्तः— समाप्ता चेयं शास्त्रानुसारिणी पक्षप्रतिक्रमणवृत्तिरिति ॥

चन्द्रकुलाम्बरशशिनो भव्याम्बुजबोधनैकदिनपतयः ।
गुणगणरत्नसमुद्रा आसन् श्रीवीरगणिमिश्राः ॥१॥

शुद्धध्यानजलापनीतकलिलाः सज्ज्ञानदीपालयाः
निःसंगव्रतभारधारणरतास्तीव्रे तपस्युद्यताः ।
ग्रीष्मेष्वातपवेदनां गुरुतरां जेतुं सदोपस्थिताः
हेमन्तेषु च शार्वरं हिमभरं सोढुं सदा निश्चलाः ॥२॥

श्रीचन्द्रसूरिनामा तेषां शिष्यो बभूव गुणराशिः ।
आनन्दितभव्यजनः शंसितसंशुद्धसिद्धान्तः ॥३॥

कलिकालदुर्लभानां गुणरत्नानां निधानमनवद्यम् ।
समयावदातबुद्धिस्तथा परो देवचन्द्रगणिः ॥४॥

श्रीचन्द्रनाम्नः सूरेः पादपङ्कजसेविना ।
दृब्धेयं प्रस्तुता वृत्ति· श्रीयशोदेवसूरिणा ॥·॥

गम्भीरमेतदर्थं न दोहने शक्तिरस्ति मम दक्षा ।
नापीह संप्रदायः सम्यग् बहवश्च पाठगमाः ॥६॥

शास्त्रानुसारात् सुखबोधपाठैरात्मीयशक्त्या विवृतं तथापि ।
यच्चेह किंचिद् वितथं निबद्धं तत्रास्तु मिथ्या मम दुःकृतं हि ॥७॥

अणहिल्लपाटकनगरे सौवर्णिकनेमिचन्द्रसत्कायाम् ।
वरपौषधशालायां राज्ये जयसिंहभूपस्य ॥८॥

विशारदैः सूरिवरैर्विहारिभिर्विशोधिता यत्नपरायणैरियम् ।
तथापि यन्न्यू[न]मुताऽधिकं पदं तच्छोधनीयं कुशलैः कृपापरैः ॥९॥

शुभाशयवशाच्चेह यन्मया सुकृतं कृतम् ।
तेन भूयान्ममाभ्यासः सर्वदैव जिनागमे ॥१०॥

एकादशशतैरधिकैरसो(शी)त्या विक्रमाद् गतैः (सं०११८७) ।
द्वे सहस्रे शतैरधिके सप्तभिर्ग्रन्थमानः ॥ ११॥

ग्रन्थाग्रम् २७०० ।

पज्जुसणे चउमासे पक्खियपव्वट्ठमीसु नायव्वा ।
ताओ तिहिओ जासिं उदयओ सूरो न अन्नाओ ॥१॥
दशाश्रुतस्कन्धभाष्ये ।

संवत् १४८३ वर्षे सिन्धुमण्डलवास्तव्यसा० थेरू-पुत्रस० सोमाकेन सा० अभयचन्द्र-रामचन्द्रप्रमुखपुत्र-पौत्रादियुतेन श्रीखरतरगच्छे श्रीजिनराजसूरि-पट्टे श्रीजिनभद्रसूरिसुगुरूणामुपदेशेन श्रीपाक्षिकवृत्तिर्लिखापिता वाच्यमाना चिरं नन्द्यात् । भद्रमस्तु श्रीसंघस्य ।

आगमिकश्रीअमरसिंहसूरिभिरलेख्यत ।

[804] अव०आदिः— श्रीगुरुभ्यो नमः ॥
शुभयोगेऽन्योऽशुभयोगान्तरं क्रान्तस्य शुभेऽथैव प्रतिकूलं०—
अव०अन्तः— इति जिनप्रभसूरिकृतवृत्तेरवचूरिरियम् । संवत् १६७० वर्षे काती(र्तिक)मासे शुक्लपक्षे चतुर्थीदिने पण्डितप्रहगणनभोमणिपण्डितश्रीउदयरुचिगणि-शिष्य-मुनिधर्मरुचिनाऽलेखि विक्रमपु[रे] । ग्रन्थाग्रम् ४५१ ।

[807] स्त०आदिः— ऐं नत्वा पार्श्वनाथस्य पादपद्ममभीष्टदम् ।
यतिप्रतिक्रमणसूत्रस्यार्थः कश्चिद् वितन्यते ॥१॥
प्राकृतं बालबोधं यत् तल्लोके हृदयसमम् ।
अल्पबुद्धिप्रबोधाय पूर्वग्रन्थानुसारतः ॥२॥
स्त०अन्तः— इति श्रीयतिप्रतिक्रमणसूत्रटबार्थः संपूर्णम्(र्णः) । संवति १९०९ रा मिती कार्त्तिकशुक्ल १४ चतुर्दस्यां(श्यां) तिथौ ली(लि)पीकृतोयं नागोरनगरे ।
मू०अन्तः— इति श्रीयतिप्रतिक्रमणसूत्रं संपूर्णम् । संव्वति १९०९ रा मिति काति(र्तिक)· सुद १४ ॥

[811] अन्तः— इति यतिप्रतिक्रमणसूत्रं संपूर्णम् ।
संवत् ओगणीसना मागसीर सुदि ६ लिखितं दुबे वजेराम । अनोपसरीनी प्रत छे ॥श्री॥

[817] अन्तः— दासानुदासा इव सर्वदेवा यदीयपादाब्जतले लुठन्ति ।
मरुस्थलीकल्पतरुः स जीयात् युगप्रधानो जिनदत्तसूरिः ॥
भणसाली विज्जा-भार्याभीमीसुश्राविकापठनार्थम् ।

[826] अन्तः— इति श्रीतपा० । श्राद्धप्रतिक्रमणसूत्रवृत्तौ शेषाधिकारः पञ्चमः । ग्रन्थाग्रम् ४११, समाप्ता चेयमर्थदीपिकानाम्नी श्रावकप्रतिक्रमणसूत्रटीका । सर्वग्रंथाग्रम् ६६४४ ॥

संवत् मुनि-रस-तिथि(१५६७)संख्ये वर्षे पोषमासे प्रतिपदातिथौ आदित्यवासरे प्रति० वृत्तिर्लिलिखे । ११८३ वर्षे श्रीविजयसिंहसूरि-श्रीजिनदेवसूरिकृते चूर्णिभाष्ये अपि ॥

[827] आदिः— प्रणिधाय श्रीवीरं स्वल्परुचीनां कृते समासेन ।
विवरणमिदं करिष्ये गृहिप्रतिक्रमणसूत्रस्य ॥१॥
अन्तः— प्रतिक्रमणविवरणं समाप्तम् ॥

इति श्रीतिलकाचार्यविरचिता श्लोकशतद्वयप्रमाणा श्रावकप्रतिक्रमणसूत्र-लघुवृत्तिः समाप्ता ॥ संवत् १५[०]६ वर्षे ॥

[830] अन्तः— संवत् १५०१ वर्षे वैशाखप्रथम १ प्रतिपदादिने श्रीनंदुरवारिपुरे लिखितम् ॥ श्रीनंदुरवारिपुरे औदिच्यज्ञातीयपं०वाकमाणिसुतधनेस्वर(श्वरेण) लेखकआनंदाशः(?) श्राद्धप्रतिक्रमणसूत्रं लिखितम् । श्रीसोमसुन्दरसूरीणां चिरं चिरकालं भवति ॥

[832] अन्तः— संवत् १८३३ वर्षे द्वितीयभाद्रवावदि ११ रवौ श्रीबृहल्लुंकागच्छेशश्रीपूज्य श्रीश्री ६ श्रीजयराजजी–तत्शिष्यऋ०जिनदसेन लिपं(पी)कृतम् । ग्रामपालीनयर-मध्ये श्रीजीसाहिब चोमासो कीधो, तदा ग्रन्थ लिख्यौ छै । वंदारुवृत्ति-ग्रन्थः संपूर्णः श्रयः ॥

[836] अन्तः— संवत् १५ आषाढादि ७९ वर्षे श्रावणसुदि ५ भौमवासरे स्वातिनक्षत्रे श्रीमत्श्रीखरतरगच्छे श्रीजिनहर्षसूरि–पट्टालङ्कारश्रीजिनचन्द्रसूरिविजयराज्ये श्रीजिनकीर्त्तिउपाध्यायानां शिष्यश्रीहर्षकुंजरोपाध्यायवा०ज्ञानकुंजरगणिनां शिष्य-पं०नयसमुद्रगणिनां शिष्येन गुणलाभेन लिखितम् ॥

[839] अन्तः— संवत् १७३० वर्षे चैत्रवदि ७ शुक्रे जीर्णदुर्गे लिखिता । उ० श्रीनय-विजयगणिभिः । पं० उदयविजयनइं आपि छें ।

[849] मू०अन्तः— इति श्रीश्रावकप्रतिक्रमणसूत्रं समाप्तम् ।
संवत् १६८४ वर्षे द्वितीयश्रावणवदिद्वितीयादिने ।
(अन्यदीयहस्तेन लिखितम्–) पंडितफतेचन्दरा पाना छै ॥
(हरतालप्रयोगेऽपि पुष्पिकाक्षराणि निम्नप्रकारेण वाच्यन्ते–)

वाचनाचार्यवर्य्यधुर्य्यश्री ५ श्रीसमयप्रमोदगणिवराणां शिष्येण पं०लब्धि-शेखरगणिना पं०ज्ञानविमलयुतेन प्रतिक्रमणसूत्रं लिपीकृतम् । श्रीडिडुआणा-वास्तव्यसुश्राविका पुन्यप्रभाविका मखचूलावाचनार्थं वाच्यमानो चिरं नन्दतु श्रीदेवगुरुप्रसादात् श्रीरस्तु बुधवारे ॥

[850] अन्तः— अहमदावादी लाषा पटलनी पोलि लेखितम्, वीसावालज्ञातीयमहं–श्रीथावर-सुतरविदासविप्रः । सं० १५९६ आषाढवदि १४ भौमे ।

स्त०अन्तः— इति श्रीषडावश्यकसूत्रअक्षरार्थः संपूर्णः । ग्रन्थाग्रम् ६५६ श्लोकः । उसवालज्ञातीयसाहाजावडलेषावितधर्मपुण्यअर्थे ।

[851] अन्तः— पं०श्रीजीवराजगणि–श्रीआणन्दकुशल–शिष्यपंडितश्रीरत्नकुशलगणि शिष्य-दानकुशल–मु०राजकुशललिखितम् । उ०वरजाग[णि]पठ[नार्थम्] ।

[852] स्त० अन्तः— सं० १६७९ वर्षे चैत्रमासि अजूआलि पक्षवाडि पडिवाइ तिथि ३ । शुक्रवारि चेला पचाइण लिषीउ ।

(पश्चात्कालीनलिपिः—) चेलातेजापठनार्थम् ।

[854] अन्तः— सं० १५४८ वर्षे माघवदि १३ शुक्रवारे सुषालयपुरे श्रीबृहत्तपापक्षे प्रभुभट्टारककलिकालश्रीगौतमावतारषट्त्रिंशत्सूरि[? गुण]विराजमानगच्छाधीशश्री-पूज्यश्री ५ जिनरत्नसूरिगुरु–तत्पट्टे श्रीजिनसाधुसूरि-तत्शिष्येणालेखि । श्रीश्रीमाली-

ज्ञातीयसंघवीसहिजा-भार्याश्राविकामाउ तत्सुता सुश्राविका धर्मकर्मरता पुण्यप्रभाविका शीलालङ्कारधारिणी श्राविका रजूपठनार्थम् ।

[855] **अन्तः**— इति श्रीश्राद्धप्रतिक्रमणसूत्रं संपूर्णम् ।
संवत् १८०२ वर्षे आषाढवदि ११ वार आदित्य **औरंगाबादनगरे** । सा० **माणकचन्द नाथालषावितम्** ।

[857] **स्त० अन्तः**— ए षडावश्यकटबो अर्थ गांधी **मनजीनि** उपदेशइं करीनि **साह ताराचन्दे** कर्यो छे ॥ ग्रन्थाग्रम् २३००० छै ।

सं० १७९४ वर्षे पोषमासे कृष्णपक्षे चतुर्थी गुरौ रात्रौ संपूर्णमगमत् ।

[859] **सूचनम्** –पुष्पिका नं० ८५७ वद् वेदितव्या ।

[863] **अन्तः**— ऊकेशवंशोस्ति सुमेरुतुल्यः सुपर्वमालाप्रतिभासमानः ।
अनल्पकल्पद्रुमकल्पपुंभिः श्रितोप्यहो ! चित्रमपारिजातः ॥१॥
बुरडानाम शाखायां श्रावकोऽत्र महर्द्धिकः ।
धीमसिंह इति नाम्ना संजातो धार्मिकाग्रणीः ॥२॥
तस्यांगजः श्रीगुरुदेवशक्ति[सत्]शुक्ति[षु] मौक्तिकमण्डलाभः ।
श्रीधर्मकार्येषु कृतावधानो वैशिष्ट्यनिष्ठो हरिपालसाधुः ॥३॥
शीलादिगुणसंयुक्ता तस्याऽभूत् सहचारिणी ।
चेतीति नामतोऽगण्यपुण्यनैपुण्यमालिनी ॥४॥
तयोर्नन्दनोऽशेषलोकेषु मान्यः सदाभीष्टधर्मो जयत्याशराजः ।
यकः शिश्रिये पादमूले गुरूणां महाभावतो द्वादशापि व्रतानि ॥५॥
राजहंसीव तस्यास्ति पक्षद्विनयनिर्मला ।
रूपलावण्यसंपन्नाल्हाणदेव्रीति गेहिनी ॥६॥
तयोः पुत्रा प्रवर्त्तन्ते सप्तैते कुलमण्डनाः ।
पाल्हाकः प्रथमस्तत्र जींदाकश्च द्वितीयकः ॥७॥
देल्हाकस्तृतीयो जातो ऊंटाकश्च [च]तुर्थकः ।
पञ्चमो मण्डलीकाख्यः षष्ठो मालाह्वयस्तथा ॥८॥
महिपतिः सप्तमोऽपि रतेः पतिरिवाङ्गवान् ।
देल्हाकस्य च पुत्रोस्ति कीटहाख्यो गुणोज्ज्वलः ॥९॥
अनेन परिवारेण भूषितो जिनशासने ।
कुरुते धर्मकार्येषु यथाशक्ति समुद्यमम् ॥१०॥
तथाहि— श्रीजिनराजसूरीणां समीपे ग्राहितो व्रतम् ।
सुतो जींदाभिधो येन बालभावे प्रमोदतः ॥११॥
लक्षग्रन्थेन संयुक्तं यः पूर्वं कल्पपुस्तकम् ।
लेखयामास सद्वर्णं चित्रकृच्चित्रमण्डितम् ॥१२॥

पुत्रादिसुपरिच्छदेन सहितो विक्रीय सारं धनं
श्रीमत्श्रीजिनभद्रसूरिसुगुरोः शिष्टैर्महाविस्तरात् ।
चन्द्राष्टाम्बुधि-शर्वरीपति(१४८१)मिते वर्षे महेवापुरे
चक्रे क्षुल्लकपाठकादिपदवीसंस्थापनाया महम् ॥१३॥

इतश्च —

वीरशासनमहाजलधिप्रवृद्धिचञ्चत्स्फुरच्छशिकरप्रकरोपमानः ।
मायन्मतान्तरकरिव्रजपञ्चचक्रः श्रीमांश्चिरं विजय[ते] भुवि चन्द्रगच्छः ॥१४॥

तस्मिन्नभूत् श्रीजिनदत्तसूरि[ः] योगीन्द्रचक्री सुगुणैकधाम ।
तद्वंशपंकेरुहषण्डचन्द्रकान्तिर्गुरुः श्रीजिनचन्द्रसूरिः ॥१५॥

षट्त्रिंशद्वादजेता जिनपतिरभवत् सूरिरुरीकृतोरु-
श्रीमत्षट्स्थानकादिप्रकरणविवृतिप्राप्तपुण्योपकारः ।
सिद्धान्ताम्भोजहंसो यतिव्रतिमुकुटो भाग्यलक्ष्मीनिवासो
भ्राम्यन्मिथ्यान्धकारे रविकरसमीरैर्गच्छरीतेर्विधाता ॥१६॥

मतङ्गजगतिर्जातो जिनेश्वरमुनीश्वरः ।
संयमारामसंवृद्धिमाद्रीयजलदोपमः ॥१७॥
जिनप्रबोधसूरीन्द्रचन्द्रो विश्वावबोधकृत् ।
जिनचन्द्राभिधः सूरिश्चन्द्रगच्छावतंसकः ॥१८॥

आत्यः श्रीजिनकुशलः सूरिः सुरीसमद्युतिः ।
संघस्याभिमतकृतौ छेकिलः कोकिलध्वनिः ॥१९॥

तदास्पदे श्रीजिनपद्मसूरिः पद्माकरः पद्मसमानपादः ।
तदन्वये श्रीनवलक्षशाखाविभूषणः श्रीजिनलब्धिसूरिः ॥२०॥

संजातो जिनचन्द्रः कन्दोभीष्टार्थसिद्धिवल्लीनाम् ।
तत्पट्टेऽप्युदयकरो जिनोदयाख्यो गुरुर्जयति ॥२१॥

भाग्यलक्ष्मीसमाश्लिष्टाः सोमवत् सौम्यमूर्तयः ।
कलाकेलिगृहं जज्ञुर्जिनराजयतीश्वराः ॥२२॥

पादप्रचारेण पवित्रयन्तः शशाङ्कवद् भूमितलं समस्तम् ।
विकासयन्तो जनकैरवाणि जयन्ति ते श्रीजिनभद्रपूज्याः ॥२३॥

मिथ्यातमच्छन्नदृशां जनानां कर्तुं प्रकाशं तपनायतेऽदः ।
ज्ञानं भवेल्लेखितमक्षरायाधीतं श्रुतं पाठितमत्र रुच्याः ॥२४॥ इति ।

तेषामुपदेशाद्दाशाकः सुपरिवारसंयुक्तः ।
लेखयति स्म विशेषावश्यकविवृत्तिं स्वपुण्यार्थम् ॥२५॥

यदलेखि पत्तनपुरे श्रीमदणहिल्लनामके प्रवरे ।
तद् वाच्यमानमनिशं विबुधगणैर्नन्दतात् सुचिरम् ॥२६॥

इति श्रीविशेषावश्यकवृत्तिप्रशस्तिः ॥

संवत् १४८०(५)वर्षे शुभं भवतु ॥

[865] अन्तः— संवत् १८३५ वर्षे आश्विन्यशुक्ले तृतीया बुधवासरे इदं पुस्तकं लिपीचक्रे।
लिखापिता च श्रीमद्गम्भीरविजयजी स्वात्मार्थे वा परोपकारार्थे । लिपिकृतं
राजविमलगणिना झाडोतीदेसे(शे) वास्तव्यं(व्येन) मुरशदाबादमहिमापुरमध्ये ।

[868] आदिः— जा गमाणो वासमाणो विहरइ ॥
तत्रादिश्य क्षणं धर्म्मं देवोद्द्योते जगद्गुरुः ।
लाभाभावान्मध्यमायां महसेनवनेऽगमत् ॥१॥

अपापायां महापुर्यां यज्ञार्थी सोमिलो द्विजः ।
तदाहृतास्तदा जग्मुः एकादश महाद्विजाः ॥२॥

इति गणधरकथा ॥

पटेल प्रेमजी वाच श्रीः नाथः चेदम् । श्रीपुस्तकम् ।

[870] अन्तः— श्रीभ॰श्रीभावप्रभसूरिणा यथामति वृत्त्यादीनि विलोक्य सुगमो व्यधायि
मन्दमतीनां हेतवे ॥

[872] अन्तः— संवत् १७५१ वर्षे आसूसुदि ५ तिथौ श्रीनमस्कारबालावबोधार्थं सुगमीकृत्य
लिखितः ।

महोपाध्यायश्रीपुण्यकलस(श)गणि–शिष्योपाध्यायश्रीजयरंगगणि–शिष्येन
वा॰चारित्रचन्द्रगणिना बुधैः शोध्यः ॥

[873] अन्तः— इति अष्टभंगी । इति श्रीनवकारबालाविबोधसंपूर्णम् ।
संवत् १७६४ वर्षे लिखितं भ॰श्रीकल्याणचन्द्रसूरिणा श्रीसत्यपुरे चतु-
र्मासिकस्थितेन ॥

[887] अन्तः— इति प्रत्याख्यानभाष्यम् ॥
सकलपण्डितश्री ५ पं॰तिलकविजयग॰-शिष्यपं॰भाणविजयलिखितम् ।

[890] अन्तः— संवत् १९१७ ना वैशागव॰ २ अमदावादनगरे लषावितं सेठाणिहरकुंवर-
बाइपठनार्थं साध्वो झवेरसरीजी स्वात्मार्थे लषीतं पटलनागरदास ॥

[900] अन्तः— संवत् १५२५ वर्षे भाद्रवाशुदि १ गि(गु) रौ श्रीअ॰पत्तन(अणहिल्लपुरपत्तन)-
वास्तव्यनागरज्ञाती । त्र॰(त्रवाडो) नाथलक्षत(लिखितम्) ।

[903] अन्तः— पण्डितश्रीशान्तिविमलगणिशिष्यमुनिदेवविमलेनाऽलेखि ॥ मृगशिरमासि...
बालावबोधश्च सुखाय तस्य स्तात् संततं देवमुनेः प्रसिद्धः ।
योऽलीलिखद् विक्रमराजपुर्यां सुमार्गशीर्षप्रतिवासरं यत् ॥१॥

[906] अन्तः— संवत् १७७१ कार्त्तिकसुदि १३ चन्द्रे लषो(लिखि)तं लासमध्ये ॥ पण्डित-
श्री १०८श्रीश्रीरत्नविजयगणि–तत्शिष्यपं॰ श्रीरविविजयगणि–तत्‌शिष्यग॰चतुर-
विजयलषो(लिखि)तमस्ति चेलाकरमचन्द ॥श्री॥

[907] **अन्तः**— संवत् १७४८ वर्षे कार्त्तिकशुदि ३ दिने। उपाध्यायश्री ५ श्रीराजरत्नगणि-तत्शिष्यः सदाआज्ञाकारीपं० हेमरत्नगणिलिखितं बुधवासरे झोटाणाशुभस्थाने श्रीपार्श्वनाथप्रसादात् ॥ साध्वीश्रीगुणश्रीवाचनार्थं लपि(लिपी)कृतम् ॥

[909] **स्त० अन्तः**— विद्वजु(ज्ज)नशिरोरत्नश्रीविनयाद् विमलाभिधः।
तत्पदाम्भोजभृङ्गात् श्रीधरविमलः कविः ॥१॥
तदीयपदसंसेविनयादिविमलः कविः।
टबार्थो विशदीचक्रे लघुवृत्त्यनुसारतः ॥२॥
श्लोकानां सार्द्धत्रिशतिर्जाता सूत्रार्थसंख्यया।
एतद्वाचन(क)सर्वो[ऽपि नित्यं] लोकः सुखीभवतु ॥३॥

[913] **स्त० अन्तः**— इति भाष्यत्रयसूत्रार्थसंपूर्णं समाप्तम्।
संवत् १९११ ना कार्त्तिकसुदी बीज दीवस लखो रह्या राजनग्रमध्ये लषोतं दुवे व्रजेरांम वनमालीदासपुत्रेण पठनार्थं गुरणीजी श्री सूर्यस्वरीजि(श्रीजी) तत्श्री(शिष्या - चन्द्रस्वरीश्रीजी—तत्शीष्य झवेरस्वरी(श्री)जीपठनार्थं चिरं जीयात्।

[915] **अन्तः**— संवत् १९११ वरषि मासोत्तममासे फागणमासे उज्ज्वलपष्ये(क्षे) तिथौ १० मी रविवासरे। पं०श्रीमानविजयगणी। तत्र सी(त्शि)ष्यलालविजयलषितं गाम भोयात्राना वासी। सेसपू(पु)रे ग्रं० ११००।

स्त०अन्तः— संवत् १९११ वरषे मासोत्तममासे च उत्तमदिवसे च उत्तममासफागुणमासे उज्ज्वलपक्षमध्ये च उत्तमतिथौ शुभतिथिश्रीजमध्यान(ह्न)समयविजयमोहतैय(मुहूर्ते) पं०मानविजयजी—पं०श्रीदरसणविजयना सी(शिष्य) तत्र सेवकलालविजय-लषीतंग रहवासी गाम भोइयात्राना सेसपुरमध्ये लषी छे इति ॥ श्रीसंखेश्वरप्रसाद—श्रीऋषभस्वामीप्रासाद—श्रीजीवतस्वामीपसाय। ग्रन्थाग्रन्थ ११ से (११००) लषावीतं गरणीजी जीवसरीजी सा०नवलसरीजी।

[916] **अन्तः**— संवत् १९१४ ना माहावदी ५ पांचम वार बुधे लखी रह्या राजनग्रमध्ये। लषीतंग हीमतसंघ रामसंघपुत्रेण पठनार्थं गुरणीजी श्रीचन्दनश्रीजी तत्श्री(शि)ष्यजवेरश्रीजी-पठनार्थं चिरं जीयात्।

संवत् १९१४ ना माहावदी ५ ने वार बुधे आ ग्रन्थ संपूर्णः। लेखक हीमतसंघ रामसंघ राजनगरे ॥

[920] **अन्तः**— स्वस्तिश्रीनृपविक्रमार्कसंवति २००४ वर्षे आश्विनकृष्णपक्षे दशम्यां तिथौ सौम्य-वासरे संविग्नशाखीयाद्याचार्य—पांचालदेशोद्धारक—तपोगच्छाधिराज—श्रीमद्विजयानन्दसूरिपुरन्दरान्तेवासि——श्रीलक्ष्मीविजयमहाराजविनेयाणु—निखिलदेशविहारि—अनेकतीर्थोद्धारक—शान्तमूर्ति—श्रीहंसविजयमुनीशान्तिषत्परमगुरुभक्त—शास्त्रलेखन-संशोधनादिपरायण-अनुयोगाचार्य-पंन्यासश्रीसंपद्विजयजिच्चरणसरसीरुहभृङ्गायमाण-शिष्यरत्नश्रीरमणीकविजयमुनिवरोपदिष्टया राजनगरापराभिध—अमदावादनगर-वास्तव्यया खरीदीआउपाधिधारिश्रेष्ठिवरश्रीयुतचुनीलालात्मज—श्रेष्ठिश्रीजीवाभाई-धर्मपत्न्या लीलाभिधया ज्ञानपञ्चमीतपउद्यापनार्थं स्वज्ञानावरणीयकर्मनिर्जरार्थं च

तपोगच्छीयाचार्यपादश्रीधर्मघोषसूरिविनिर्मितसंक्षिप्तसंघाचाराभिधवृत्त्या समलंकृतं सूरिपुरन्दरललामश्रीमद्देवेन्द्रसूरिचरणसंमुचितं चैत्यवंदनभाष्यमिदमलेखि ॥

उपदीकृतं चेदं संविग्नशाखीयाद्याचार्यश्रीमद्विजयानन्दसूरि-शिष्यरत्न-प्रवर्त्तकश्रीकान्तिविजयविनेयाणु-ज्ञानभंडारव्यवस्थापन-शास्त्रसंशोधन-लेखनादि-प्रवणमुनिश्रीचतुरविजयचरणाब्जचञ्चरीकाय लघुशिष्यमुनिपुण्यविजयाय ॥

लिखितं चेदमणहिल्लपुरपत्तनान्तर्गत-वागोलपाटकनिवासिना लेखकवरेण (लहिया)भोजकज्ञातीयेन ठाकोरपूनमचन्दसुपुत्रेण चीमनलालेनेति भद्रम् । वर्धतां श्रीश्रमणवीरवर्धमानविभोः प्रवचनम् । भद्रं भवत्वेतद्ग्रन्थलिखनलेखन-वाचना-ध्ययनाध्यापनश्रवणश्रावणतत्पराणां महानुभावानां भव्यसत्त्वानामिति ॥

सूर्याचन्द्रमसौ यावद् भ्रमतो जगतीतले ।
विद्वद्भिर्वाच्यमानोऽसौ तावन्नन्दतु पुस्तकम् ॥१॥

[930] अन्तः— सा०भाइचन्द सामजीनी पुत्री बाइ सांकलीयें प्रतिलाभिता ॥।

[938] अन्तः— संवत् १९४० ना वर्षे मासोत्तममासे शुभकारिउत्तममासे पौस(ष)मासे शुक्लपक्षे तिथिदशमोदिने शनिश्चरवारे लेखकानां नग्र(गर)विजापुरमध्ये लइया(लहिआ)हरिलाल मालजी ज्ञातिर्हिंदू भर्मभाटः(ब्रह्मभट्टः)॥

[945] सूचनम्—　　(एतत्प्रशस्त्यर्थं द्रष्टव्यं नं० 802)

[950] अन्तः— संवत् १५५३ वर्षे चैत्रसुदि ८ रविवासरे श्रीमति पत्तने श्रीपूर्णिमापक्षे श्रीभुवनप्रभसूरीणां पदपंकजपट्पदेन शिष्येण मुनिना कमलसंयमेन मु०वीर-कलशसांनिध्यादिदं लिलिखे ॥

(अन्यदीयहस्तेन लिपीकृतमिदम्)

[पल्लयगिरि सिरी १ । उवला २ । पिवोलया ३ । पुरि ४ । सपद ५ । जहगाहिआ ६ । कुद्दव ७ । जल ८ । वत्थाणि ९ ॥ स०॥]

[951] अन्तः— संवत् १५५५ वर्षे मार्गेसो[र्ष]वदि चतुर्थीरविवारे श्रीरूपपुरे श्रीपूर्णिमा-पक्षे श्रीभुवनप्रभसूरीणां पदपकजषट्पदां शिष्येन मुनिरत्नमेर(रु)लिषितम् ॥

[953] आदिः— ऐन्द्रवृन्दं प्रणम्य तं पार्श्वं शंखेश्वराख्यमभिनम्य(ख्यं च)।
पाक्षिकसूत्रटबार्थं कुर्व्वे प्राकृतभाषया ॥१॥

अन्तः— इति पाक्षिकक्षामणाटबार्थो लिखितः ॥

श्रीज्ञानविमलसूरिप्रसादमासाद्य वार्त्तिकम् ।
लिखितं बुद्ध(ध)दीपसाय(ग)रशिशुना सुखसागराह्वेन ॥१॥
यावच्चरमसमुद्रो यावन्नक्षत्रमण्डितो मेरुः ।
यावच्च पुष्पदन्तौ तावदिदं पुस्तकं जयतु ॥२॥
सद्भिः संशोध्यमानं वाच्यमानं मुनिव्रजैः ।
तत्पुण्यगण्यपीयूषरसपूर्णः स्तात् सुहृग्लोकः ॥३॥

ग्रन्थाग्रमानमुदितं पंच सहस्रं च सार्द्धसप्तयुतम् ।
गुण–मुनि–मुनि–विधुवर्षे (१७७३)माघमासेऽष्टमीपक्षे ॥४॥
श्रीसुरतिबिंदरीयशाखापुरसैदपुराभिधानेस्मिन् ।
श्रीविमलशान्तिकृतः प्रसादात् सदा भद्रम् ॥५॥
इति श्रीपाक्षिकसूत्रक्षामणासंपूर्णः ॥

संवत् १९१७ वर्षे श्रावणसुदी १२ सनी(शनि)वासरे संपूर्णम् ॥
पठनार्थं साधवी खणगारसरीजी ॥

[966] **अन्तः—** संवत् १६८२ वर्षे श्रीमदञ्चलगणाधिराजयुगप्रधानभट्टारकश्री ५ श्रीकल्याणसागरसूरीश्वरैः श्रीउत्तराध्ययनसूत्रं सर्वप्राज्ञशिरस्कोटिरपण्डितश्रीविशालकीर्त्तिगणये प्रदत्तम्। श्रीभीन्नमालनगरवास्तव्यसं० सूरा–भार्याकस्तूराइनाम्न्या लिखापितम् ॥

[967] **अन्तः—** संवत् १५६८ वर्षे वैशाखमासे शुक्लपक्षे पञ्चम्यां तिथौ गुरुवासरे पुष्यनक्षत्रे अद्येह श्रीपत्तनमध्ये श्रीश्रीमालवंशे ढंढेरकुटुम्बे दोसीपूनमसी–भार्याप्रथमाकुंअरी–द्वितीयारूडी एतच्छास्त्रं कुंअरिश्राविकायाः स्वपुण्यार्थं परोपकाराय च लिखाप्य श्रीपूर्णिमापक्षे प्रधानशाखायां श्रीजयप्रभसूरि- पट्टोदयगिरिदिनकराणां पूज्यश्रीपरमगुरुभट्टारकप्रभुश्रीभुवनप्रभसूरीणां प्रदत्तम् । चिरं जीयात् पुस्तककोशे पुस्तकमिदम् ॥

[968] **अन्तः—** संवत् १५०५ वर्षे मार्गशुदि २ गुरौ श्रीउपकेशवंशे सोनीजसराज–भार्याश्रा० अमरीनाम्न्या पं० ज्ञानमूर्तिगणीनां श्रीउत्तराध्ययनसूत्रं लिखाप्य प्रदत्तम् ॥

[969] **अन्तः—** (अन्यहस्ताक्षरेण विशेषः–)
मु० धीमचन्दजीनं राजी थइने यापो छे । पं० ज्ञानविजयगणिः ।

[970] **अन्तः—** संवत् १६७६ वर्षे भाद्रपदमासे सितपक्ष्ये(क्षे) द्वितीयाकुजदिने वाणारीसश्री६[विद्यासुन्दर–तच्छिष्य वाणारीसश्री ६ तेजसुंदर–तच्छिष्यवाणारीसश्रीसुन्दर–तच्छिष्यऋषिधनसुन्दरेण इदं पुस्तकं वाच्यमा]नं कृतवान् श्रीगुडीप्रसादात् ग्रन्थाग्रम् २३५५ परिपूर्णम, श्रीसंखेश्वरापार्श्वनाथप्रसादात् श्रीडांगराग्रामे ।

[976] **अन्तः—** संवत् १५२९ वर्षे मार्गशिरशुदि ६ शुक्रे । चित्कोशे चिन्ताकारिभं० जयमन्दिरगणिना उपक्रमेण म० राजाकेन लिखिता श्रीउत्तराध्ययनचूर्णिः ॥
श्रीसीमंधरस्वामिने नमः ।
अस्ति स्वस्तिकरश्रीगूर्जरधरणीसुलोचनाकारम् ।
अणहिल्लपाटकं पुरमपरप्रवरश्रृङ्गारम् ॥१॥
सौधश्रेणीमनोहरे प्रतिपदं प्रासादशोभावरे
श्रीमान् श्रीअणहिल्लपाटकपुरे पुण्यैकरत्नाकरे ।
श्रीश्रीमालविशालवंशतिलकः प्रौढप्रतिष्ठास्पदं
जातः श्रीमदनः सहर्षवदनः साधुः सदा नन्दनः ॥२॥
तदङ्गजो विश्रुतनामधेयस्त्रैलोक्यलोकाद्भुतभागधेयः ।
बभूव भूवल्लभरूपधेयः श्रीदेवसिंहः स्वकुलैकसिंहः ॥३॥

तत्सुतः सकलविश्वविश्रुतः संघभक्ति-गुरुभक्तिसंयुतः ।
धीरिमादिकगुणैरलंकृतः शोभते सरवणाभिधस्ततः ॥४॥

तस्य शीलगुणनिर्मलगात्रं सत्कलत्रयुगलं गुणपात्रम् ।
आदिमा शुभति तत्र हि टीबूः स्त्रीषु रत्नमपरा खलु लक्ष्मीः ॥५॥

असूत सूनुद्वयमद्वयश्रीनिकेतनं सा समये तदाद्या ।
आद्यः सदाचारपरः सदाख्यो हेमाभिधो हेमसमो द्वितीयः ॥६॥

दीनेषु दानं स्वजनेषु मानं पात्रेषु वित्तं सुकृतेषु चित्तम् ।
तदा तदाद्यस्तु सदा ददानः सदाभिधः कं न चमत्करोति ॥७॥

शत्रुंजयाद्रौ गिरिनारशृंगे रंगेण यात्रां किल यश्चकार ।
परोपकारैकपरायणश्रीः श्रीमान् सदाह्वानसुधीः सुधीरः ॥८॥

कल्याणकत्रयविहारविशालभद्र-
प्रासादपुण्यसफलीक्रियमाणवित्तः ।
श्रीपातसाहमहिमूदसभासु मान्यः
सोयं सदाभिधसुधीः समभूद् वदान्यः ॥९॥

यस्या भङ्गुरभाग्यभङ्गिसुभगस्या दत्तबब्बेरके-
त्याख्यां श्रीमद्... ... ...

(पश्चाद्भागो नष्टः ।)

[980] **अन्तः**— संवत् १९२९ रा मिती असाढसुदि ५ वार बृसपत(बृहस्पति)वार नें **व्यास मंगूमल्लेन** लिपीकृतं श्री**विक्रमपुर**मध्ये लिखितम् ।

[982] **सूचनम्**— (आद्यान्तभागः पूर्वटीकावद् वेदितव्यः ।)

[984] **अन्तः**— संवत् १६१६ वर्षे श्री**फत्तेषानडेरा**मध्ये श्री**फत्तेषानदोदाई**राज्ये श्री**बृहत्-खरतरगच्छे** श्री**जिनभद्रसूरि**संताने तत्पट्टे श्री**जिनचन्द्रसूरि**-तत्पट्टे श्री**जिनसमुद्रसूरि**-तत्पट्टे प्रतिष्ठितश्री**जिनहंससूरी**श्वराणां तत्पट्टे श्री**जिनमाणिक्यसूरि**विजयराज्ये विद्यमानगुरुतत्पट्टपूर्वाचलसहस्रकरावतारविजयमानगुरुश्री**जिनचन्द्रसूरि**विजयराज्ये विशुद्धमासे आसाढसुदिद्व(द्वि)तीयादिने बुधवारे वाचनाचार्यवर्यवरिष्टगुणगरिष्टश्री**लक्ष्मीप्रभगणि**वराणां सतीर्थ्यशिष्यमुख्यप्रवरपण्डितो**त्तमराजशेखरगणि**पं०**कुमारसुन्दरगणि**ना लिपीकृता स्ववाचनार्थं पं० **रत्नसागर**-पं० **शक्तिहर्षः** चिरं **थडसिंह**युतैर्लिपीकृता प्रति[:] श्री**उत्तराध्ययन**वृत्तिर्लिखिता पं०**कुमारसुन्दरगणि**ना स्वपठनार्थम् । श्रीसु(शु)भं भवतु लेषकपाठकयोः । प्रति[:] चिरं नंद्या(नन्द्या)त् आचन्द्रार्क यावत् । श्रीसुखशांतिर्भवतु ॥

श्री**जीरापु(प)ल्लिपार्श्वनाथ**नी रक्षा शास्त्रधारकाणां वाचकानां लेखकानां कल्या[ण]मस्तु निरन्तरं सुखं शांतिश्रीः ।

॥ ॐ ॥ श्रीमद्विक्रमसंवत्सरातीतसंवत् १६६७ वर्षे ज्येष्ठवदिसप्तम्यां तिथौ शनिवारे **घल्लूस्थाने** पातिसाहसुरताण**जलालदीनअकबर**महाराज्ये श्री**बृहत्**-

खरतरगच्छे श्रीजिनभद्रसूरिसंताने वा० भानुप्रभगणि–तच्छिष्यमुख्यवा० सोमधीर-
गणि–वा० महिमलाभगणि–पं० कुशलसिंहगणि–पं० चन्द्रवर्धनगणि–तच्छिष्यमुख्य–
वा० मेघनन्दनगणि–वा० दयानन्दनगणि–वा० जयविजयगणि–तच्छिष्यमुख्यवरिष्ठगुण-
गरिष्ठश्रीरत्नाकरोपाध्यायानामन्तिषत्पं० दानरंगगणि-पं० हेमसिंहमुनि–तत्सती–
र्थे(र्थ्ये)न पं० नयसिंहेन स्वेन स्वेन टं० ८० पक्केन जगृहे पं० कुसलसोमपार्श्वात्।

[985] वृ०आदिः— उत्तराध्ययनस्येमां बालानां सुखहेतवे ।
वृत्तिं विनयहंसस्तु करोति रुचिरां लघुम् ॥१॥

[987] अन्तः— (हरतालप्रयोगेन लिपिकारस्याभिधानादि प्रभ्रष्टम्, पश्चादयमुल्लेखः)
पाटणमध्ये लिषितम् । संवत् १७६८ ना मागशिरसुदि ११ माडितीनई-
चैत्रवदि ११ संपूर्ण करी रवौ वारे भटेवाप्रसादेन पुनः उदयो भवति ।

[991] आदिः— इति श्रीउत्तराध्ययनावचूरिः समाप्ता । ग्रन्थाग्रम् ५२०० ।
संवत् १५१४ वर्षे चैत्र सुदि... ... श्रीलाटापल्ल्या वृद्धतपागच्छ-
नायकभट्टा० श्रीरत्नसिंहसूरीशशिष्योदयमण्डनेन लिखिता भव्यानां श्रेयसे भवतु ॥

[992] सूचनम्— (आदिभागस्तु नं० 985 वद् ज्ञातव्यः ।)

[993] अव०अन्तः— इति षट्त्रिंशत्श्रीउत्तराध्ययनाक्षरार्थलवलेशः संपूर्णः ॥३६॥
इति श्रीउत्तराध्ययनबालावबोधः संपूर्णः ॥
संवत् १६२६ वर्षे अस्वनि(आश्विन)वदि(१०)दसमीभूमवासरे लिषितं संपूर्णम् ।
लेखक–वं(वा)चकयोश्चिरं जीयात् ॥

[996] अन्तः— इति श्रीउत्तराध्ययनावचूर्णिः पूज्यश्रीज्ञानसुन्दरसूरिकृता समाप्ता ॥
संवत् १४८० वर्षे मार्गशीर्षमासे कृष्णपक्षे पञ्चम्यां सोमवासरे श्रीडुंगरपुरे
लिखिता लींबाकेन ॥

[998] मू०अन्तः— श्रीउत्तराध्ययनसूत्रं समाप्तमिति ॥
संवत् १७१४ वर्षे जे(ज्ये)ष्ठवदि १३ शुक्रवासरे श्रीपत्तनमध्ये लिखितं
वाच्यमानं चिरं निंद(नन्द)तु ॥

स्त०अन्तः— इति श्रीउत्तराध्ययनार्थः समाप्तः ॥
श्रीपूर्णिमापक्षे प्रधानशाखायां भट्टारकश्रीविनयप्रभसूरिणा लिखितं मुनि-
श्रीकीर्तिरत्नादिशिष्यवाचनार्थम् ।

[1000] आदिः— प्रणम्य श्रीमहावीरं नम्राखण्डलमण्डलम् ।
आरभ्यन्ते कथा[ः] कर्तुमुत्तराध्ययनस्थिताः ॥१॥

उत्तराध्ययनबृहद्वृत्तिगताः कथा[ः] प्राकृताः कथा सर्वा अपि संस्कृताः
कृतास्तपागच्छे भट्टारकचक्रवर्तिश्री६विजयसेनसूरि-आचार्यश्री६विजयदेवसूरिराज्ये
संवत् १६७५ वर्षे पींपाडिग्रामे पण्डितप्रकाण्डपं० श्रीविमलसागरगणि-शिष्य-
पं० पद्मसागरगणिना गणिप्रवरप्रेमसागरवाक्येन ।

कथा[:] कृताः पण्डितपद्मसागरैः स्वशिष्यवाक्यप्रणयेन संस्कृताः ।
पीपाडिपुर्यां श्रीपार्श्वनायकप्रसादतः सत्कुशलाय सन्त्विमाः ॥१॥

शोधयन्तु सज्जनाः ।

स्वस्त्यस्तु सज्जनेभ्यो येषां हृदयानि दर्पणनिभानि ।
दुर्वचनभस्मसंगादधिकतरं निर्म्मलानि स्युः ॥२॥

इति श्रीउत्तराध्ययनकथा[:] समाप्ताः । ग्रन्थाग्रन्थम् श्लोक ४५०० ॥
संवत् १७४८ वर्षे मार्गशिरवदिअष्टमीचन्द्रदिने रोप्पडनगरमध्ये लिषतं नेमऋषिः ॥ श्री ॥

[1001] स्त०अन्तः— भव्यानां सुवासनोत्पादिताऽमन्दानन्दे संतोषिताशेषविपश्चिद्वृन्दे श्रीधर्ममन्दिरोपाध्यायैरुद्धृते जीवाजीवविभक्तिनामकं षट्‌त्रिंशत्तममध्ययनं समाप्तं तत्समाप्तौ च समाप्तोयं ग्रन्थः ।

श्रीशान्तिवादिभारत्याऽनुग्रहो मकरन्द[क]ः ।
उत्तराध्यनांभोजसंबन्धी गृह्यतां बुधैः ॥१॥

[1009] अन्तः— संवत् १९१९ ना वर्षे चैत्रशुदि ६ दिने बुधवासरे लषितं, ग्रन्थाग्रन्थम् ४००१ परिमाणम् ॥ लपीचक्रे भट्टारकः श्री ५ मुनिराजगौतमसाग[र]जी ॥ इदं पुस्तकं लिषावितम् । इदं(अयं) ग्रन्थः संपूर्णम्(र्णः) ॥

[1010] स्त०अन्तः— श्रीपासचन्दसूरीश्वरवि[र]चितटबार्थः संपूर्णः ॥

[1011] अन्त— संवत् १९०७ ना वर्षे आसाढमासे शुक्लपक्षे पञ्चम्यां तिथौ अर्कवारे श्रीजेसलमेरनगरे लिपिकृतं ऋषिअपैराज मुनि एनलइं श्रीउत्तराध्ययननउ टबउ तथा बालावबोध ऊपर लिप्यौ ते ग्रन्थाग्रन्थ षोडशसहस्र उपरि ५०० पंचोत्तरिंऽक्षर श्लोकसंपूर्ण एतस्य भावविजयी कथानक तत्संख्या क्रियते न, ग्रन्थाग्रन्थसहस्रः श्लोकसंख्या अत्र पुस्तिकारक्षणमाहात्म्यम् ।

[1012] अन्तः— संवत् १९२९ मिति आसोजवद ६ । श्री ॥ इति चूलिकाः ॥ इति श्रीमदुत्तराध्ययनस्तबकः समाप्तः ॥ संवत् १९२६ मितिआसोज वद २ ॥श्री॥

[1013] स्त०अन्तः— इति श्रीउत्तराध्ययनकथाटबार्थः संपूर्णः ग्रं० १०४०० श्लोकेषि । श्रीउदयरत्नोपाध्यायैः स्वज्ञानवृद्धये ॥

[1017] अन्तः— एवं श्रीदशवैकालिकनामा महाश्रुतस्कन्धः ।
लिखितः श्रीगुरुलक्ष्मीसागरसूरीशशिष्याणाम् ॥१॥

मुख्यत्वाद् विबुधेषु नाऽऽद्भुततनुभा निश्शेषविद्याकलाः
धार(रि त्वात् प्रवरप्रभावविभवागारं यथार्थं सदा ।
येषां नाम पवित्रमन्त्रसमतां[– –]त्सुसौधप्रदं
तेषां श्रीमदिन्द्रसोमविबुधानां सावशिष्याणुना ॥२॥
अथ गद्यतोऽपि लिख्यते ।

इति श्रीदशवैकालिकश्रुतस्कन्धः लिखितः श्रीलक्ष्मीसागरसूरि-शिष्यपं०-इन्द्रसोमगणीनां शिष्येण ।

[1018] **अन्तः**— संवत् १७६८ वर्षे मागशरसुदि ५ दिने श्रीरायधनपुरे वास्तव्यश्रीचैत्रगच्छे देवशाखायां आचार्यश्रीरत्नदेवसूरि-तत्पट्टे भ०सौभाग्यदेवसूरि-तत्शिष्यपं०-रामजी-तत्शिष्यपं०वस्ताजी-तत्शिष्यवेलजीपठनार्थम् ।

[1021] **अन्तः**— श्रीविद्यारत्नगणिपरिभोग्यम् ।

[1022] **अन्तः**— इति श्रीदशवैकालिकसूत्रं संपूर्णम् । संवत् १८४१ वर्षे प्र० चैत्रसुदि १५ सोमवासरे पूज्यपरमपूज्यऋषि श्री१०८ श्रीजोरसिंघजीतः ऋषि उरजालिपीकृतम् । वै० गोइन्दवाचनार्थे ॥

[1023] **अन्तः**— इति दशवैकालिकं संपूर्णम् ॥

नित्यानन्तलक्ष्मीस्फुटमतः श्रीपार्श्वनाथः प्रभु-
स्तत्पट्टे शुभदत्तनामगणभृद् बाभांबभूवादिमः ।
तस्मात् श्रीहरिदत्तको गणधरो यो जायते स्मावनौ
तत्पट्टांबुजिनीसहस्रकरतां श्रीकेशिनामाऽभवत् ॥१॥

तत्पट्टे प्रवरः स्वयंप्रभगुरुः सूरिर्विरेजे ततः
श्रीरत्नप्रभनाम सूरिरशुभत् श्रीयक्षदेवस्ततः ।
ततः श्रीगुरुकक्कसूरिरभवत् श्रीदेवगुप्तो गुरु-
स्तत्पट्टे प्रकटप्रतापमहिमा श्रीसिद्धसूरीश्वरः ॥२॥

तच्छिष्यमाणिक्य म(अ)गण्यधामा श्रीपाठकः श्रीधनसारनामा ।
तन्मुख्यशिष्यः सुगुणैः समृद्धः श्रीकीर्त्तिकल्लोल इति प्रसिद्धः ॥३॥

तदन्तिके भाति च हीरलक्ष्मी प्रवर्त्तिनी राजति पद्मलक्ष्मीः ।
तच्छिष्यिणी संयमलच्छि(क्ष्मी)रेखा संशोभतेऽशेषजनेषु रेखा ॥४॥

तया यतिन्या कमलाच्च लक्ष्मीसंयुक्तया सुन्दरभक्तिभाजा ।
संलेखिताः श्रीदशवैकालिकस्यादर्शा मुदाष्टादशसंख्यकाश्च ॥५॥

रत्नसमुद्रगणिनां श्रीमत्श्रीवाचनाचार्यमहितानाम् ।
प्राप्योपदेशवचनं सदनं सकलस्य च रसस्य ॥६॥

एवं सज्जनसमुदयप्रवाच्यमाना अमी महाप्रतयः ।
सुचिरं जयन्तु मुनि-कर-बाण-महीसंख्यके वर्षे ॥
सं० १५२७ वर्षे ॥

[1034] **आदिः**— सिद्धिगइमुवगयाणं कम्मविसुद्धाण सव्वसिद्धाणं ।
नमिऊणं दशकालीयनिर्युक्ति कित्तइस्सामि ॥१॥
इह श्रीभद्रबाहुः श्रीदशवैकालिकनिर्युक्त्यादौ मंगलमाह ।

अन्तः— समाप्तं श्रीदशवैकालिकार्थः ॥ टीकेयं याकिनीमहत्तरासूनोराचार्यहरिभद्रस्य ।

दशवैकालिकटीकां विधाय यत्पुण्यमर्जितं तेन ।
मात्सर्यदुःखविरहाद् गुणानुरागी भवतु लोकः ॥१॥

टीकाग्रन्थाग्रम्–

शतानि पञ्चपञ्चाशत् पंचाशदधिकानि च ।
प्रत्यक्षरं निरीक्ष्यात्र श्लोकमानं विनिश्चितम् ॥१॥
श्रीमाणिक्यशेखरसूरींद्रकृतटीका ॥

[1035] आदिः–– ॐ नमः सर्वज्ञाय ॥ नमः पंचपरमेष्ठिभ्यः ॥
अर्हन्तः प्रथयन्तु मङ्गलममी शृङ्गारयन्तः सदा
पादाम्भोजरजःकणैः क्षितिवधूं काश्मीरलेशैरिव ।
तत्त्वार्थैकविदां सुवर्णरचनामाकर्ण्य येषां मुखात्
तत्तद्भावनया रसेन लभते कल्याणकोटिं जनः ॥१॥

देवः केवलसंपदे भवतु वः श्रीनाभिराजाङ्गभू-
र्जित्वा येऽत्र जगत्त्रयीविजयिनं श्रीकामराजेश्वरम् ।
आदत्ता तपवारणत्रयमिदं केनाप्यवार्यं ततः
तत्पूर्तेरपि मूर्ध्नि सर्वविदितं निर्मीयतेऽद्यापि तत् ॥२॥

यज्जन्मस्नात्रकालेमलजलपटलेष्वासमन्तात् पतत्सु
स्वर्णाद्रिर्यो जनस्योज्ज्वलकलशमुखान्निर्गतेष्वन्तरास्थः ।
भेजे भ्राजिष्णुरभ्रामलकगृहगतो दीपवद् दीप्यमानः
स स्वामी वीरनामा किसलयतुतमामङ्गिनां मङ्गलानि ॥३॥

अङ्गानां क्रमतः स्थितिं गुरुतया विज्ञाय चिच्चक्षुषा
वृद्धायां श्रुतसंपदानुसमयं यान्त्याः प्रभोराज्ञया ।
यावद् दुःप्रसभाभिधं गुरुमता हस्तावलंबं ददौ
यः कृत्वा दशकालिकं मुनिपतिः शय्यंभवः सोऽवतात् ॥४॥

शय्यंभवस्य श्रुतरत्नसिंधोः सर्वस्वभूतं दशकालिकं यत् ।
उद्घाट्य बह्वर्थसुवर्णकोशं तद्भव्यसुग्राह्यमहं करोमि ॥५॥

इति श्रीतिलकचार्यविरचितायां दशवैकालिकटीकायामुत्तरचूलिकाख्यटीका समाप्ता । इह श्लोकसहस्राणां सप्तकं सर्वसंख्यया प्रत्यक्षरेण ॥

(अन्यदीयहस्तेनाधिकम्–)

संवत् १५९० वर्षे वैशाखमासे शुक्लपक्षे पञ्चम्यां तिथौ शुक्रवासरे-अद्येह श्रीपत्तनमध्ये श्रीश्रीमालज्ञातीयढंढेरकुटुम्बे दोसी हरिचन्द्र–भार्यासुश्राविका-रत्नाई–पुत्रदोसी सूरा–दो॰श्रीवछ–दो॰रत्नापुत्र–पौत्रसहितैः श्रीदशवैकालिकवृत्तिः श्रीपूर्णिमापक्षे प्रधानशाखायां भट्टारकश्री६कमलप्रभसूरिपट्टे भ॰ श्री६पुण्यप्रभसूरीश्वराणामुपदेशेन श्रीदशवैकालिकवृत्तिर्लिखाप्य स्वगुरुभ्यः प्रदत्ता वाच्यमानं चिरं नन्दतु भद्रं भवतु श्रीश्रमणसंघस्य ॥

[1036] मू०आदिः— श्रीसर्वज्ञाय नमः ॥ धम्मो मङ्गलमुक(क्कि)दठं०

वृ०आदिः— धर्म्मं उत्कृष्टं मंगलम् । किंलक्षणो धर्म्मः । अहिंसाजीवदयासंयमाः पंचेंद्रिय-
निग्रहः ० ।

अन्तः— इति श्रीदशवैकालिकं सूत्रं वृत्तिसहितं संपूर्णम् ॥
श्रीनीम्नराख्यनगरे विधिपक्षनाथश्रीभावसागरमुनीश्वरसुप्रसादात् ।
स धीमतां महा(हि)मरत्नसुपाठकानां शषोद(शिष्योऽयं) विनयहंसयतिः करोति ॥१॥
संवत्सरे युगल-सप्त-तिथिप्रमाणे(१५७२) वृर्त्ति विलोक्य महतीमिति शिष्यकार्थम् ।
वृर्त्ति च चित्रसहितां दशकालिकस्य सा पण्डितैः विजयते किल वाच्यमाना ॥ २ ॥
॥ ग्रं० २५०० ॥ (पश्चात्कालीनेयं लिपिः)
प्रतिरियं राजपुरवास्तव्यश्रीसङ्घेन भांडागारे कृता भट्टारकराजेन्द्रसूरेरुपदेशात्
सं० १९४१ वैशाख वद १० ॥

[1037] वृ०आदिः— श्रीवीतरागाय नमः ॥
स्तंभनाधीशमानम्य गणिः समयसुन्दरः ।
दशवैकालिके सूत्रे शब्दार्थं लिखति स्फुटम् ॥१॥

वृ०अन्तः— विमुच्यते । विविधं अनेकैः प्रकारैः । अपुनर्ग्रहणपरमस्वस्थापादनलक्षणै-
र्मुच्यते विमुच्यते ब्रवीमीति पूर्ववत् ॥१६॥ इति चूलिकाद्वयं व्याख्यातम् ।
अथ प्रशस्तिमाह—

अन्तः— हरिभद्रकृता टीका वर्त्तते विषमा परम् ।
मया तु शीघ्रबोधाय शिष्यार्थं सुगमा कृता ॥१॥
चान्द्रकुले श्रीखरतरगच्छे जिनचन्द्रसूरिनामानः ।
जाता युगप्रधानास्तच्छिष्यः सकलचन्द्रगणिः ॥२॥
तच्छिष्यसमयसुन्दरगणिना स्तंभतीर्थे ... ... ।
दशवैकालिकटीका शशि-निधि-शृंगार(१६९१)मितवर्षे ॥३॥
अर्थस्यानवबोधेन मतिमान्द्यान्मतिभ्रमात् ।
जिनाज्ञाविपरीतं ... ... ॥४॥
इति श्रीदशवैकालिकटीका समाप्ता ॥
संवत् १७४८ मंघसिर(मृगशीर्ष)मासे कृष्णपक्षे सोमवारे तिथा अष्टम्यां
लाहोरनगरमध्ये उतराधगछे लिषाप्तं[प्य] पूज्यदेवीदासऋष–तत्सिष्य–पूजहरिवंस-
ऋष–तस्य शिष्यपूजं गोद्रऋष–तस्य शिष्यलिषितं मनसा ऋष आत्माअर्थे ॥

[1039] अन्तः— समाप्ता दशवैकालिकटीका ॥
मणगं पडुच्च सिज्जंभवेण निज्जूहिया दसज्झयणा ।
वेयालियाय ठविया तम्हा वेयालियं नाम ॥१॥
महत्तरया जा(या)किन्या धर्मपुत्रेण चिन्तिता ।
आचार्यहरिभद्रेण टीकेयं शिष्यबोधिनी ॥१॥

दशवैकालिकटीकां विधाय यत् पुण्यमर्जितं तेन ।
मात्सर्यदुःखविरहाद् गुणानुरागी भवतु लोकः ॥२॥
दशकालिकानुयोगात् सूत्र-व्याख्या पृथक्कृता ।
हरिभद्राचार्यकृतान्मोहाद् भक्त्याऽथवा मया ॥३॥
श्रीमद्बोधकशिष्येण श्रीमत्सुमतिसूरिणा ।
विद्वद्भिस्तत्र नो द्वेषो मयि कार्यो मनागपि ॥४॥
यस्माद् व्याख्याक्रमः प्रोक्तः सूरिणा भद्रबाहुना ।
आवश्यकस्य निर्युक्तौ व्याख्याक्रमविपश्चिता ॥५॥
सूत्रार्थः प्रथमो ज्ञेयो निर्युक्त्या मिश्रितस्ततः ।
सर्वैर्व्याख्याक्रमैर्युक्तो भणितव्यस्तृतीयकः ॥६॥
प्रमादकार्यविक्षेपचेतसां तदयं मया ।
क्रियाया अवबोधार्थं साधूनां तु पृथक्कृतः ॥७॥
लब्ध्वा मानुष्यकं जन्म ज्ञात्वा सर्वविदां मतम् ।
प्रमादमोहसंमूढा वैफल्यं ये नयन्ति हि ॥८॥
जन्म-मृत्यु-जरा-व्याधि-रोग-शोकाद्युपद्रुते ।
संसारसागरे रौद्रे ते भ्रमन्ति विडम्बिताः ॥९॥
ये पुनर्ज्ञान-सम्यक्त्वचारित्रविहितादराः ।
भवाम्बुधिं समुल्लङ्घ्य ते यान्ति पदमव्ययम् ॥१०॥
ग्रन्थाग्रम् २६०० ॥ कल्याणमस्तु ॥

[1040] **अन्तः**— (पुस्तकलेखनानन्तरं लिखितमिदम्-)
संवत् १६९४ वर्षे श्रावणशुदि ९ गुरुदिने श्रीसागरचन्द्रसूरिशाखायां श्रीवा० जयनिधान-तच्छिष्यपंडितोत्तमश्री ३ लब्धिसिंघजी-तच्छिष्यपं० उदयसिन्धुरस्य श्रीनानाविधरसिकश्रीसाधारणपुरवास्तव्यमंत्रिश्रीचतुरसाकेन श्रीज्ञानावरणीकर्मक्षयार्थं परि(प्र)तिरियं प्रदत्ताऽस्ति स्वपुन्यार्थम् ।

[1043] **अन्तः**— इति द्वितीया चूलिका समाप्ता ॥
सं० १५२९ चैत्रवद १३ शुक्रे यशस्तिलकमुनिनैषाऽवचूर्णिः कृता ॥

[1045] **अव०अन्तः**— इति दशवैकालिकाऽवचूरिः समाप्ता ॥
इति विविक्तचर्यानाम द्वितीयाचूलाऽवचूरिः समाप्ता ॥
संवत् १६७२ वर्षे ज्येष्ठवदितृतीया शनिवासरे लिषतं मया स्वात्मार्थे पठनार्थे राधीशुभस्थाने । कल्याणमस्तु सर्वजगतः शुभं भवतु लेखक-पाठकयोः ।

[1046] **मू०अन्तः**— इति श्रीदशवैकालिकसूत्रं समाप्तम् ।
संवत १६१६ वर्षे चैत्रमासे कृष्णपक्षे दशमि(मी)दिने शुक्रवासरे सेणोरापाडे लिषतं पांडे दासुः ॥
अव०अन्तः— इति श्रीदशवैकालिकाऽवचूर्णिरक्षरार्थगमनिका समाप्ता ॥

[1047] मू०अन्तः — इअ दसवेआलिअसुअक्खन्धो सम्मत्तो । ग्रन्थाग्रं श्लोकतः शत ७०० । संवत् १४८५ वर्षे प्रथमभाद्रपदशुदिषष्ठ्यामलेखि ।

अवअन्तः— इति श्रीदशवैकालिकावचूरिः समाप्ता ।
संवत् १४८५ लेखकविश्वनाथेन लिखितेति भद्रम् ॥

[1048] अन्तः— इति समाप्तौ ब्रवीमीति ॥ पूर्ववत् ॥ १६ ॥ इत्युत्तरचूलिकाटीका श्रीतिलकाचार्यरचिता काचिदक्षरगमनिकामात्रालेखि ॥

अधुना निर्युक्तिकारः श्रीमान् भद्रबाहुस्वामी दशवैकालिकश्रुतस्कन्धमहाशास्त्रकारिणः श्रीशय्यंभवसूरेर्गुणसंस्तवमेवमाविर्भावयामास । शय्यंभवाभिधानं युगप्रधानं गणधरं अनुत्तरज्ञान–दर्शनादिः गुणगणं धारयतीति गणधरस्तं जिनप्रतिमादर्शनेन हेतुभूतेन प्रतिबुद्धं मनकपितरं मनकाख्यापत्यजनकं दशवैकालिकमहाश्रुतस्कन्धस्य निर्यूहकं पूर्वगतोद्धृतार्थरचनकर्त्तारं वन्दे स्तौमीति गाथार्थः ॥१॥

अमुमेवार्थमाह निर्युक्तिकृत्—मनकाख्यमपत्यमाश्रित्य शय्यंभवेनाचार्येण पूर्वगतात् श्रुतादुद्धृत्य विरचितानि दशाध्ययनानि द्रुमपुष्पिकादीनि विकालवेलायामन्त्यचतुर्घटिकासमये स्थापितान्येकत्र कृतानि यतः तस्माद् दशवैकालिकं नाम व्युत्पत्तिः ॥२॥

षड्भिर्मासैरधीतं अध्ययनमिदं दशवैकालिकाख्यं श्रुतस्कन्धेप्यधीयमानत्वादध्ययनं व्यपदिश्यते आर्यमनकेन तस्य षड्मासा एव प्रव्रज्याकालः । अथ कालगतः समाधिना ॥३॥

आनन्दाश्रुपातमकार्षुः । अहो ! आराधितमनेनेति शय्यंभवाः स्थविराः श्रुतपर्यायवृद्धाः प्रवचनगुरवः । पूजार्थबहुवचनम् । यशोभद्रस्य शय्यंभवशिष्यस्य गुर्वश्रुपातदर्शनेन किमेतदाश्चर्यमिति विस्मितपृच्छा । भगवन् ! किमेतदकृतपूर्वमित्येवंभूता । कथना च भगवतः संसारस्नेह ईदृशः । सुतो ममायमित्येवंरूपा । चशब्दादनुताश्च यशोभद्रादीनामहो ! गुराविव गुरुपुत्रे वर्त्तितव्यमिति । न तत् कृतमस्माभिरित्येवंभूतः । गुरुराह–प्रतिबन्धपरिहारार्थं न मया कथितम् । नात्रभवतां दोषः । पुनः संघः प्रत्याह–अल्पायुषं मनकक्षुल्लकमवेत्य मयेदं शास्त्रं पूर्वेभ्यः समुद्धृतं तदिदानीं गोप्यतामवस्थाप्यतां चेति । संघः कथयतु ततो विचारेण संघे विचारणापूर्वं संघः कथयति स्म । का । ह्रासदोषात् प्रभूतसत्त्वानाम् । इदमेवोपकारकमतस्तिष्ठत्वेतत् । ततः सूरयः श्रुतोपयोगेन ज्ञात्वा स्माहुः–अङ्गोपाङ्गानि श्रुतानि दुःषमानुभावात् क्रमशस्त्रुटिष्यन्ति । इदमेव वैकालिकं जीतकल्पश्च दुःप्रसहाचार्यं यावद् यास्यतः । एतावतैव पठितेन श्रुतेन स युगप्रधानः श्रुतधरो भविष्यति ततोऽस्मादेव कारणाद् युष्मद्वचनाच्च शिष्यप्रशिष्यैः पठ्यमानमिदमस्तु मङ्गलाय भूयात् श्रीसंघाय ॥४॥

इति श्रीदशवैकालिकावचूरिः ॥

संवत् १५९६ पौषमासे कृष्णपक्षे पंचमीदिने पूर्णिमापक्षे प्रधानशाखायां श्रीपुण्यप्रभसूरीणां शिष्यभीमाकेनालेखि ॥

[1049] **अन्तः**— श्रीस्तंभतीर्थे ओसवालज्ञातीयवृद्धशाखायां सोनीसहारण-भार्या-श्राविकाअधकू-सुतसोनीमहिपति-भार्याश्रा० गुरी-सुतासोमाई श्रीदशवैकालिकाव-चूरिर्लिखापिता । प्र० चन्द्रलक्ष्मीनामुपदेशेन ॥

[1050] **अन्तः**— श्रीदशवैकालिकावचूरिः समाप्ता ॥

पत्तनवासिश्रीश्रीमालीसं० पांचा-भार्यापाल्हणदे-सुतसं० धरजाकेन भा० सलही-पुत्रहाथादिकुटुम्बयुतेन परमगुरुगच्छनायकश्रीरत्नशेखरसूरीणा-मुपदेशेन लक्षग्रन्थं लेखयता ।

सं० १५११ वर्षे श्रीदशवैका(लिका)वचूरिर्लेखिता समाप्ता ॥

[1051] **बा०आदिः**— नमो जिनाय ॥

नत्वा श्रीवर्द्धमानाय प्रशमामृतशालिने ।
दशवैकालिकं सूत्रं श्रीशय्यंभवसूरिभिः ॥१॥
साध्वाचारविचाराढ्यं यत् कृतं पुण्यकामया ।
बालावबोधमधुना कामं तस्य तनोम्यहम् ॥२॥ युग्मम् ॥

अन्तः— इति श्रीखरतरगच्छीयश्रीजिनराजसूरि-विजनि(विनेय)श्रीराजहंसोपाध्याय-विज्ञेय(न) विरचिते श्रीदशवैकालिकबालावबोधे दशवैकालिकनिर्युक्तिप्ररूपितं मूलोत्पत्तिरूपकथासंबन्धयुक्तं संपूर्णम् ।

यादृशं० ॥१॥ वा० जयलक्ष्मीगणिलि० रतनलक्ष्मीपठनार्थम् ॥१॥

[1052] **स्त० अन्तः**— विक्रमात् समयात् संवत् १६६७ वर्षे मार्गशीर्षमासे कृष्णपक्षे सप्तम्यां तिथौ रविवासरे पुष्यनक्षत्रे स्वभुजार्जितभट्टारकश्रीपार्श्वचन्द्रसूरिस्तित्पट्टे श्रीसमरचन्द्रसूरिस्तत्पट्टोद्योतकारकश्रीराजचन्द्रसूरिणा श्रीदशविकालिकस्य वार्त्तिकः कृतोयं संशोधनीयोयं कृपां विधायाधीय धीधनैः । जिनाज्ञाविरुद्धं यद् लिखितं तन्मे मिथ्यादुःकृतं भूयात् इति टबार्थः संपूर्णः । कल्याणं भूयात् ॥

[1053] **अन्तः**— संवत् १९१९ ना सरावण पेला वद १४ दने ली० साधु गोविंद-दास षुसालदास श्रीसेहेर पाहालणपुरमध्ये कमालपुरामध्ये लष्युं छेजो ॥ गरणीजी जडावसरीजी वास्ते परत लखी छेजी ॥

[1054] **स्त०अन्तः**— विलोक्य श्रीहारिभद्रवृत्तितोऽलेख्यार्थान्तम् ।
अशुद्धं दूरतस्त्याज्यं विद्वद्भिः सत्कृपापरैः ॥

[1055] **अन्तः**— इति श्रीदशवैकालिकसूत्रं समाप्तमिति ॥ श्री ॥ संवत् १६१८ वर्षे कार्त्तिकमासे चतुर्थीतिथौ रविवासरे श्रीविक्रमहानगरे लिखितम् ॥

[1056] **मू० अन्तः**— संवत् १८५१ वर्षे आसो वदि ५ दिने सोमवासरे भट्टारकश्री-विजयजैनिंद्र(जिनेन्द्र)सूरिस्व(रीश्व)रराजेः(ज्ये) सकलगणिः ।

सकलभट्टारकपुरि(रं)दरभट्टारकश्रीविजयरत्नसूरिस्व(रीश्व)रजी-तत्शिष्यसकल-गणिगरिष्ठविसि(शि)ष्टसि(शि)ष्टाधिराज्यगणिश्री१९श्रीमान् खिजयगणी-तत्शी(शि)-ष्यपण्डितश्री७श्रीकुशलविजयगणि-तत्शी(शि)ष्यपण्डितश्री५श्रीहस्तिविजयगणि-तत्शी(शि)ष्यविनेयी से०माणिका(क)विजयेन लिपीकृतं स्वआत्महेतवे माङ्गल्यम् ।

स्त० अन्तः— इति श्री दस(श)वैकालिक अर्थतः टबार्थ सर्व संपूर्णः ॥ श्रीअलीयापुरमध्ये ।

संवत् १८५१ ना वर्षे अश्वन्मासे कृष्णपक्षे ५ तिथौ शशिवासरे सर्व सूत्रं संपूर्ण कृत्य(त)म् ।

संवत् १८५१ वर्षे कार्तिकमासे सु(शु)क्लपक्षे ८ दिने शुक्रवासरेऽर्थः संपूर्णः बफोरें ।

[1058] अन्तः— संवत १५१४ वर्षे माघमासे शुक्लपक्षे १३ दिने श्रीखरतरगच्छे श्री-सागरचन्द्रसूरि-वा०महिमराजगणि–तच्छिष्यवा०दयासागरगणिना समलेखि ग्रन्थोयम् । श्रीमालज्ञातीयसं०चांदा-भार्यया सं०झालीसुश्राविकया लेखिता टीकेयं वा० महिमराजगणि–तच्छिष्यवा०दयासागरगणिवराणां श्रीमंडपे ।

सं० १५६२ वर्षे वैशाखशुद्धाक्षततृतीयादिने श्रीबीकानयरमहादुर्गे वा० ज्ञानमन्दिरगणिनामन्तेवासिदेवतिल[क]गणिना वाचिता किंचित् संशोधिता चेति वाच्यमाना नन्दतु ॥

[1062] अन्तः संवत् १५०५ वर्षे ।

(हरतालप्रयोगेण प्रभ्रष्टान्यक्षराणि-)

संवत् १६२७ वर्षे पोस(ष)शुदि ९ सा० वासण-पुत्रसा०सोषाकेन ।

[1067] आदिः— ॐ नमः सर्वज्ञाय नमः ॥ नमो अरहंताणं० ।

अर्हद्भ्यस्त्रिभुवनराजपूजितेभ्यः । सिद्धेभ्यः सितघनकर्मबन्धनेभ्यः ।
आचार्यैश्रुतधरसर्वसंयतेभ्यः । सिद्ध्यर्थी सततमहं नमस्करोमि ।

अन्तः— सुगमा एसा अणुगहत्था फुडवियडविसुद्धवंजणाइ णमो इक्कारसहिं सएहिं तेतीसाहिएहि संगहिया ११३३ सुगमा ओघनिर्युक्तिटीका समाप्ता ॥

[1070] अन्तः— इति श्रीद्रोणाचार्यकृतवृत्तेः श्रीमदोघनिर्युक्त्यवचूरिः श्रीज्ञानसागरसूरिकृता समाप्ता ॥

संवत् १४९६ वर्षे वैशाखवदि ५ शुक्रे श्रीपत्तने आगमगच्छे शीलसुन्दर-गणियोग्यं महं०नाईयाकेन लिखितम् ॥ श्रीः ॥

[1072] अन्तः— चिदानन्दलहर्य्याख्या स्तुतिरेषा जिनेशितुः ।
आचन्द्रार्कं च वो भूयात् स्थायिनी मोददायिनी ॥४१॥

समाधिप्राग्भारामृतजलधिबेलाम्बुजननिः
मुदा स्पृष्टा येनोज्ज्वलतरचिदानन्दलहरी ।
महातापं हृत्वा निबिडतरकर्मौघजनितं
महानन्दानन्दातुलविपुलशैत्यं स भजते ॥४२॥

मुदोपाध्यायेनेत्थमिति शिवचन्द्रादिगणिना
स्तुतिलक्ष्म संचार्या वरनिगरणे भव्यमतिभिः ।

सदौदार्य्यस्फूर्ज्जद्विविबवरवर्णावलिलसत्-
स्वयंभूसंचब्रद्गुणमणिगणैः संविरचिता ।
कृपांभोधेर्माया क्षितिसुहल(?)पार्श्वेशितुरियं
स्तुतस्यासंख्येयैर्विविधविबुधेन्द्रैः क्रमनतैः ॥४३॥ षट्पदं काव्यम् ।

कलशः ।

भवसिन्धुवर्द्धनचन्द्रिकोपमकुमतितापसुचन्दनः
समभक्तिभरनिर्भरपुरंदरनिकरविरचितवन्दनः ।
घनकुशलकारी दुरितदारी सकलजगदभिनन्दनः
स भवतु भविनां भक्तिमनसां(? साम)जनि वामानन्दनः ॥४४॥

इति श्रीपार्श्वेश्वरजिनेन्द्रस्तुतिगर्भिता अध्यात्मचत्वारिंशिका । सं०१९१२ वै० व० ।

[1073] अन्तः— सं० १९०५ कुञ्जरांवालाख्यपत्तने अध्यात्मचत्वारिंशिका लिखिता फागुण-
वदि ८ बृहस्पतौ विहारी(रि)ऋषिणा ।

[1092] अन्तः— इति श्रीचतुर्विंशतिजिननमस्कारः संपूर्णः ।
संवत् १८१८ वर्षे शाके १६८४ प्र० जेठसुदि १३ शुक्रे ग्रामवोतारीयां
पोल ... पं०लब्धिलिष(खि)तम् ।

[1093] मू०अन्तः— इति श्रीपाक्षि[क]नमस्कारः संपूर्णम्(र्णः) ।
संवत् १७७८ वर्षे चैत्रसुदि ८ बुधवासरे लपि(लिपी)कृतम् । राजनगरमध्ये
लिषापितम् ।

स्त०अन्तः— ए नमस्कारनो टबोऽर्थ लिष्यो अर्थथी बालावबोधरूपै । पं०श्रीजय-
विमलगणि सार्धमिकजनइ बोध माटि इति मङ्गलम् । ग्रं०१५५ ॥
इति श्रीपाक्षि[क]नमस्कारः संपूर्णम्(र्णः) ।
संवत् १७७८ वर्षे चैत्रसुदि ९ गुरौ टबो संपूर्णः ।
या पृथवी या मेरुगिर या शशियर दिनकर ।
या लगी पुस्त चिर नन्दजौ ओ शास्त्र वाचणहार ॥

[1094] अन्तः— संवत् १८७२ वर्षे शाके १७३७ प्रवर्त्तमाने मिति आसोज सुद ११
शनिवारे ॥

स्त०अन्तः— (अन्यदीयहस्तेनोल्लिखितमिदम्-)
पं० श्रीसाधुजीश्रीतेजविजयजी लिषावी छइं श्रीपालीमध्ये लि०कपूरसागरग० ।

[1115] सूचनम्— सप्तविंशतिश्लोकात्मकं स्तोत्रं, न तत्र काचित् प्रशस्तिः ।

[1193] अन्तः— संवत् १६११ वर्षे पोषमासे शुक्लतरपक्षे नवम्यां तिथौ क्षितितनयवासरे
श्रीपूर्णिमापक्षनभोमार्गप्रकाशनैकदिनमणयः भट्टारकपादाः श्री५पुण्यप्रभसूरिपुरं-
दराणामन्तेवासिनां चेला वच्छाकेन लिलिखांचक्रे । शुभं भवतु देवगुर्वोः पाद-
पङ्कजप्रसादतः चिरं नन्दतु वाच्यमानम् ॥

[1199] आदिः— संपूर्णमण्डलशशाङ्ककलाकलापपीयूषतां तव गिरः समुदीरयन्ति ।
ते नूनमुर्ध्वगतयः खलु शुद्धभावा भव्या भवन्ति शिवपूर्पथसार्थवाहाः ॥१॥

अन्तः— इत्यष्टकं विदुरवृन्दविनोदहेतोः श्रीमज्जिनस्य च मया निरमायि नूनम् ।
कल्याणमन्दिरपदैर्मुनिमानतुङ्गनिर्मापितस्तवपदैश्च निबद्धमिदम् ॥९॥
ये लक्ष्मीकल्लोलबुधप्रणीतमेनं समस्याष्टकमामनन्ति ।
स्तवद्वयान्तःस्थपृथक्पदोत्थमियर्त्यवश्यं परमां रमाऽन्ते ॥१०॥

इति स्तवद्वयान्तर्गृहीतपृथक्पदनिबद्धं जिनस्तवरूपमष्टकं संपूर्णम् ।
पं० लक्ष्मीकल्लोलगणिकृतं विद्वज्जनमनोविनोदाय ॥ श्रीरस्तु ॥

वाचकचक्रशक्रश्रीशशिगणव्योमसोमश्रीदेवसोमगणिदृग्गोचरीकरणाय लिलिखामं मध्येकुमरगिरि ॥

संवत् १६६८ वर्षे चैत्रसित ५ मी गुरौ श्रीनवीननगरे । पं० सुमतिकुशलगणिना लिपीकृतं पत्रमिदम् ॥

[1342] आदिः— रुचिर्जिनोक्ततत्त्वेषु गुरवो यत्र साधवः ।

अन्तः— इति योगशास्त्रमध्याऽनुष्टुप्पादैः पृथग्निगदसिद्धिः ।
लक्ष्मीकल्लोलबुधो विरचितवानष्टकं समस्यायाः ॥९॥

इति समस्याष्टकं पं० लक्ष्मीकल्लोलगणिकृतं सं० १६८८ वर्षे चैत्रसुदि-४ दिने ।

[1398] अन्तः— श्रीमत्तपागणनभश्चरणे विनेयः श्रीसोमसुन्दरगुरोर्जिनकीर्त्तिसूरिः ।
स्वोपज्ञपञ्चपरमेष्ठिमहास्तवस्य वृत्तिं व्यधाज्जलधि-मन्द-मनुप्रमेऽब्दे (१४९४)॥१॥

[1411] आदिः— अर्हदादीन् नमस्कृत्य स्वगुरूणां प्रसादतः ।
सप्तस्मरणवस्तूनां कश्चिदर्थः प्रतन्यते ॥१॥

अन्तः— नागपुरीयतपोगणनाथाः श्रीचन्द्रकीर्त्तिसूरीन्द्राः ।
तच्छिष्यहर्षकीर्त्तिः सूरिरिमां वृत्तिमातनुतः(ते) ॥१॥

इति श्रीपंचमस्मरणटीका संपूर्णा ।

[1412] अन्तः— इति श्रीसप्तस्मरणानि संपूर्णानि ॥

पण्डितश्रीतिलकसागरगणि-शिष्यमुनिज्ञसागरलिखितानि श्रा० कपूरां-पठनार्थम् । ओशवंशज्ञातीयसोमीश्रीवछ-भार्याबा० मोहनदे-पुत्रीश्राविकाकपूरां-पठनार्थम् । सं० १६९९ वर्षे ।

[1415] अन्तः— इति श्रीधरणोरगेन्द्रस्तोत्रं संपूर्णम् ॥

संवत् १७०२ वर्षे माहमासे शुक्लपक्षे ६ तिथौ चन्द्रवासरे लिखितम् । सकलगणिगजेन्द्रश्रीलब्धिविजयग०-तत्शिष्यहर्षविजयेन । थामस्थलीनगरे ॥

[1417] अन्तः— इति श्रीलघुशांतिस्तवनं समाप्तमिति ॥

संवत् १६६८ वर्षे वैशाखशुदि १२ अर्कवासरे श्रीखरतरगच्छे पंडित-श्रीराजकलशमुनि-शिष्यान्तेवासी(सि) पं० गुणसागरेण लिपीकृतमिदं (तानि) सप्तस्मरणाणि(नि) पातिसाहसाहसलेमजहांगीरहजरतिराजे ।

[1418] अन्तः— इति श्रीबृहच्छान्तिः संपूर्णा । भ०श्रीविजयप्रभसूरीश्वर-शिष्यपं०ऋद्धिविजयग०लिखितं शिष्य-गणिरामविजयपठनार्थम् ।

संवत् १७५७ वर्षे आसोवदि २ गुरुवारे वांसानगरमध्ये ।

[1420] स्त०अन्तः— इति मानतुङ्गसूरिविरचितभक्तामराभिधानश्रीमद्युगादिदेवस्तोत्रस्यार्थः संपूर्णमि (इ)ति श्रेयः ॥

संवत् १७४२ वर्षे आसो सुदि ५ लिखिता पं०सुखसागरेण स्वार्थे मोरवाडामध्ये । इति श्रीअजितशान्तिस्तवटबार्थः ।

श्रीअजितशान्तिस्तत्र स्तबुकार्थो वर्णविषयतां भी(नी)तः ।
नयविमलेन प्रकटं विहितोयं मुग्धबोधकृते ॥१॥

[1421] मू०अन्तः— संवत् १८५३ वेसाषसुदि २ दिने वारसु(शु)क्रे पं० रूपविजयग० । सी(शि)भक्ती(क्ति)लषो(खि)तम् । श्रीजामपुरमध्ये मध्यान(ह्न)समये ।

स्त०अन्तः— इति श्रीसंवत् १९०९ ना वर्षे प्रथमभाद्रपदशुक्लपक्ष ७ दने थावरवासरे लषीतं मात्मा भोजाजी पालणप(पु)रमध्ये लष्युं छे । श्रीपंन्यासअमृत्यतवजेजी-सीससुखवजेजी-सीस नीत्यवजेजी तथा भाई भणनार परसोतमपठनार्थः ।

[1424] स्त०आदिः— श्रीपार्श्वजिनमानम्य फलवर्द्धिपुरस्थितम् ।
सप्तानां स्मरणानां च टबार्थो लिख्यते मया ॥१॥

पर्वदिननइं विषइं सर्वमंगलीकने अर्थे अने क्षुद्रोपद्रवदोष वारवाने अर्थे अने कारण पडये सुखशांतिकने अर्थे० ... ...

अन्तः— इति श्रीलघुशांतिस्तवाभिधं सप्तस्मरणस्य टबार्थः कृतः । सकलपंडितश्री ५-श्रीपद्मसागरगणि-शिष्यसकलवाचकचक्रवर्त्तिमहोपाध्यायश्री ५ श्रीकुशलसागरगणिशिष्य-पंडितश्री ५ श्रीउत्तमसागरगणि-शिष्य पंडितश्री ५ श्रीकांतिसागरगणि-शिष्य पं०-गौतमसागरगणिलिपीकृता । श्रीआऊआनगरे श्रीऋषभनाथप्रसादात् । सकलपंडितश्री ५ श्रीकेसरसागरगणिभिः कृतः अयं टबार्थः ॥

संवत् १७६२ वर्षे कार्त्तिकवदि १३ धन्यत्रयोदश्यां तिथौ बुधवारे संपूर्णीकृता ॥ श्रीसकलविद्वज्जनशिरोमणिपंडितश्रीकेसरसागरगणिमां प्रशस्तिः । श्रीऋषभनाथप्रसादात् श्रीशांतिजिनप्रसादात् ॥

[1440] आदिः— श्रीजिनं सर्वतोभद्रचित्रेणाकर्णितुं मया ।
प्रारभ्यते सुधीलोकालोकनायाल्पमेधसा ॥१॥

अन्तः— इदं सर्वतोभद्रचित्रेण जैनं मया निर्ममे निर्ममेनाष्टकं च ।
लसल्लक्ष्मि(क्ष्मी)कल्लोलनाम्ना बुधेन प्रबुद्धप्रबोधार्थसिद्धिप्रसिद्ध्यै ॥१२॥

भुजंगप्रयातछन्दः ।

इति श्रीसर्वतोभद्राष्टक-अर्द्धभ्रम-समविपरीतपादपादचित्रेण श्रीऋषभदेवस्तोत्रं महोपाध्यायाधिराजचक्रवर्तिश्री ६ हर्षकल्लोलगणि-शिष्यभुजिष्यपदपांशुना पं० लक्ष्मीकल्लोलगणिना कृतम् । प्रवीणैः पठ्यमानं चिरं नन्दतात् ।

[1460] वृ०आदिः— श्रीगुरुभ्यो नमः ॥

वृत्तिं भक्तामरादीनां स्तवं वच्मि यथोचितम् ।
संक्षेपान्मुक्तिलाभाद् यो मुग्धबुद्धिप्रबुद्धये ॥१॥

अन्तः— इति श्रीखंडिलगच्छसंबंधिश्वेतांबराचार्यशांतिसूरिविरचितश्रीमानतुंगसूरिकविकृतभक्तामराख्यसूत्रवृत्तिः परिसमाप्ता ॥ ग्रंथाग्रम् ४२८ सर्वमीलने ॥

संवत् १७०१ वर्षे पंडितश्रीविद्यारत्नगणि–तत्शिष्यपंडितश्री५श्रीलावण्यरत्नगणि–तत्शिष्यपंडितश्रीकीर्त्तिरत्नगणि·तत्शिष्यराजरत्नेन स्ववाचनकृते स्वहस्तेनालेखि । श्रीभक्ताम॰दीपिका संपूर्णा ॥ श्रीमद्विद्यापुरशाहपुरे ।

[1462] अन्तः— इति उपाध्यायश्रीरत्नचंद्रगणिविरचिता श्रीभक्तामरस्तोत्रवृत्तिः ॥

इति श्रीभट्टारकश्रीहीरविजयसूरींद्रै सह आगरादेशविहारकृतां स्वकृतकृपारसकोशग्रंथश्रवण–पातसाहश्रीअकब्बररंजितचित्तानां सकलदेशे श्रीहीरविजयसूरींद्रनाम्ना जीजीआकरनिवारणकारितस्फुरन्मानानां तथा श्रीहीरविजयसूरींद्रनाम्ना षण्मासिजीवाभयदानकारितस्फुरन्मानानां ईडरप्रतिश्रीराजनारायणसभासमक्षं वादिभूषणक्षपणकेन सह वादेन लब्धजयवादानां वादिभूषणेतिनामस्थाने वादिमूकणोतिनामकृतां श्रीजंबूद्वीपप्रज्ञप्तिप्रमेयरत्नमंजूषानाम बृहद्वृत्तिः कृता महोपाध्यायश्रीशांतिचंद्रगणिवराणां चरणकमलरसिकचंचरीकायमाणैः महोपाध्यायश्री–रत्नचंद्रगणिभिर्विरचिता ॥

सं० १८१५ काती(र्तिक)वदि ५ देवपक्षे उदयपुरे ।

[1464] वृ०अन्तः— इति भक्तामरस्तवव्याख्या ॥

श्रीधनेश्वरसूरीणां मूलपट्टक्रमागतैः ।
श्रीमद्भिश्चैत्रगच्छीयैः श्रीगुणाकरसूरिभिः ॥१॥
जिन–बाण–धरा(१५२४)संख्ये वर्षे मासि च कात्तिके ।
भक्तामरस्तोत्रवृत्तिः कृता दृष्टांतसंयुता ॥२॥ युग्मम् ॥

इति भक्तामरवृत्तिः संपूर्णा । ग्रंथाग्रम् अक्षरगणनया २०२८ ॥ यादृशं० ॥

एकमप्यक्षरं यस्तु गुरुः शिष्यं निवेदयेत् ।
पृथिव्यां नास्ति तद् द्रव्यं यत् कृत्वा अनृणीभवेत् ॥

संवत् १५५४ वर्षे आसूवदि चुदसि सोमे । श्रीचैत्रगच्छे भट्टारि(र)कश्रीचार(रु)चन्द्रसूरिः ॥

[1465] अन्तः— अन्योऽप्यर्थः सुधीभिः स्वधिया व्याख्येय इति चतुश्चत्वारिंशद्वृत्तार्थः । संपूर्णस्तत्संपूर्तौ संपूर्णेयं भक्तामरस्तववृत्तिः सप्रभावकथानकसंयुक्ता ।

श्रीचन्द्रगच्छे श्रीअभयसूरिवंशे श्रीरुद्रपल्लीयगच्छोद्भवश्रीगुणचंद्रसूरिशिष्यश्रीगुणाकरसूरिरेनां चक्रे ।

संवत् १४२६ वर्षेऽतौ नभस्यमासे श्रीसरस्वतीपत्तने ... ... ।

संवत् १५२५ वर्षे वैशाख शुदि सप्तम्यां पुष्यनक्षत्रे श्रीभक्तामरस्तववृत्तिर्लिखिता । वाचनाचार्यशिरोरत्न पं० नंदिरत्नगणिचरणांबुजचंचरीकेण ।

[1467] अन्तः— इति भक्तामरस्तोत्रमहास्तवनवृत्तिः संपूर्णा ॥

संवत् १६९९ वर्षे आसोसुदि ११ रवौ लिषितं भट्टारकप्रभुश्री (?) हीररत्नसूरीणां तत्‌शिष्यपंडितश्रीलब्धिरत्नगणि-तत्‌शिष्यश्रीमुनिश्रीविजयरत्नेन लिपीकृतम् । स्वशिष्यश्रेणिपठनार्थम् [--]र्णाकपुरे गणिश्रीविजयरत्न ... ।

[1469] अन्तः— श्रीअमरप्रभसूरीशा वैदुष्यगुणभूषिताः ।
भक्तामरस्तवीं वृत्तिमकार्षुः सुखबोधिकाम् ॥१॥
साधुश्रीवाचनाचार्यदेवसुन्दरसद्यतेः ।
तस्याभ्यर्थनतोप्येवं गुणरत्नमहोदधेः ॥२॥
इति श्रीभक्तामरस्तवटीका ॥

सं[व]त् १७२१ वर्षे अश्विनमासे शुक्लपक्षे द्वादश्यां तिथौ ज्ञवारे । उपाध्यायश्रीमति(त्)कीर्त्तिजीगणि-शिष्यवा०श्रीसुमतिसिंधुरजीगणि-शिष्यमुख्यपंडित श्रीकनककुमारजीगणीनामंतेवासिना कनकविलासेनालेषि ।

[1474] वृ०आदिः— श्रीशंखेश्वरपार्श्वं नत्वा भक्तामरस्तवस्यार्थम् ।
श्रीविजयप्रभसूरेर्लिखामि वचनात् सुशिष्यार्थम् ॥१॥

अन्तः— सूरिश्रीविजयप्रभप्रमुखादेशात् शिशूनां हिते
देशावृत्तिमिमां व्यधत्त विधिना श्रीमेघनामा कविः ।
शिष्यः श्रीसुधियां कृपादिविजयाख्यानाम मुख्यां पुन-
र्यद् दृष्टं तदिह प्रसादसदनैः शोध्यं विशुद्धाशयैः ॥१॥
इति भक्तामरस्तवराजवृत्तिः पूर्णा श्रियेऽस्तु । यादर्श० ।

संवत् १७६० वर्षे शाके १६२५ प्रवर्त्तमाने प्रथमश्रावणमासे कृष्णपक्षे तिथौ द्वितीयचतुर्दश्यां शुक्रवारे लिपीकृतम् । श्रीबीकानेरमध्ये ।

[1476] वृ०आदिः— श्रीगुरुभ्यो नमः ।
प्रणम्य परमानंददायकं परमेश्वरम् ।
वृत्तिं भक्तामरस्याहं कुर्वे बालहितैषिणीम् ॥१॥

वृ०आदिः— श्रीमत्तपागणगगनांगणदी(?दि)नमणी(?णि)हीरविजयसूरीणाम् ।
शिष्याणुना विरचिता वृत्ते(?त्ति)र(?रि)यं कनककुशलेन ॥१॥
इति भक्तामरस्तोत्रं संपूर्णम् ।

भट्टारकश्री १०८ श्रीरत्नसागरसूरीश्वरजीविजे(विजय)राज्ये श्रीमुंबईबंदरे श्रीअंचलगच्छे भातबजारमध्ये वीसाने अपासरे चतुर्मासो(सो) कर्यो श्रीआदीश्वरजी-प्रसादात् । लिपीकृतं मु०भाग्यशिखरजीगणी तत्‌शिष्यमु०प्रमोदशिखरजीगणी तत्‌शिष्यमु०कि(की)र्त्तिशिखर-तत्‌शिष्यवरमोतीचन्देन लिपिकृतं स्वआत्मा-अर्थे ।

संवत् १९१७ ना शाके १७९३ प्रवर्त्तमाने कार्त्तिकमासे शुक्लपक्षे एकादशीती(ति)थौ शुक्रवासरे मुंबइमध्ये अपासरा बे छे अंचल ... ... ।

[1477] अन्तः— श्रीमत्तपगणगगनांगणदिनमणिहीरविजयसूरीणाम् ।
शिष्याणुना विरचिता वृत्तिरियं कनककुशलेन ॥१॥
नयन-शर-रसेंदुमिते(१६५२)वर्षे देराटनाम्नि वरनगरे ।
बालजनविबोधार्थं विजयदशम्यां हि समासा ॥२॥ युगलम् ।
श्लोकानां षट्शती षोडशोत्तरा समजायत ।
प्रत्यक्षरं गणनया वृत्तौ संख्या निवेदिता ॥३॥
अंकतोपि ६१६ सूत्रसहितवृत्तंग्रंथाग्रम् ६९३ ।
इति भक्तामरस्तोत्रवृत्तिः ।
संवत् १६८५ वर्षे श्रावणवदि ६ दिने गणिदेवसागरेणालेखि श्रीस्तंभायतनगरे ।
(हस्तान्तरलेखनमिदम्-)
पंडितश्रीजयसुन्दरग० नी परति । सकलपंडितशिरोमणिपंडितश्री ५ पं०कपूरविजयग० तत्शिष्यपंडितजिनविजयपठनार्थम् ।

[1481] अव०आदिः— प्रणम्य परमानंदप्रदं निजगुरोः बालबोधकृते भक्तामरस्यार्थो निदर्श्यते ।
मू०अन्तः— इति श्रीभक्तामरस्तोत्रं संपूर्णम् । लिखितं मुनिनयविजयेन श्रीराजनगरे । श्रीपार्श्वनाथप्रसादात् ।
अव०अन्तः— श्रीलाभविजयप्राज्ञशिशुना बालबोधदा ।
श्रीभक्तामरसूत्रस्य लिखिता वृत्तिरद्भुता ॥१॥
इत्याचार्यश्रीमानतुंगसूदी(रि)विरचितभक्तामरस्तोत्रस्य स्तबावचूर्णिः संपूर्णा । लिखिता सकलपंडितशिरोमंडनसकलपंडितोत्तम पं०श्री १०८ श्रीलाभविजयगणि-शिष्यमुनिनयविजयेन आत्मार्थं श्रेयोस्तु श्रीः । संवत् १७२६ वर्षे फाल्गुनवदि १३ दिने ।

[1487] अन्तः— श्रीरुद्रपल्लीयगच्छेशश्रीगुणचन्द्रसूरि-शिष्यश्रीगुणाकरसूरिकृता वृत्तितो भक्तामरस्तवविषमपदावचूरिः समासा ।
संवत् १४ एकासीआ(८१) वर्षे मार्गशरशुदिप्रतिपद्दिनेऽलेखि ।

[1491] बा०आदिः— श्रीऋषभाय नमः ॥
प्रणम्य श्रीमहावीरं नत्वा च श्रुतदेवताम् ।
श्रीसर्वसुन्दर(जिनकीर्त्ति)सूरीणामासाद्यादेशमुत्तमम् ॥१॥
मुग्ध(बाल)लोकप्रबोधार्थमेषोहं मेरुसुन्दरः ।
भक्तामरमहास्तोत्रं करिष्ये वार्त्तया मुदा ॥२॥ युग्मम् ॥
मू०अन्तः— इति श्रीभक्तामरनामस्तोत्रं श्रीमानतुंगसूरिणा रचितं पूर्णमजनि ॥ संवत् १९२२ मा आसोसुदी १५ दिने ।
स्त०अन्तः— इति श्रीभक्तामरनामस्तोत्रं श्रीमानतुंगसूरिविरचितं टबार्थ-कथा-मन्त्र-सही(हि)तं संपूर्णम् ॥ श्रीमत्तपागच्छे सकलभट्टारकशिरोवतंससभट्टारकश्री ५०

श्रीदानरत्नसूरीश्वरतत्पदे विद्यमानभट्टार्कश्री५श्रीकीर्तिरत्नसूरीश्वरशेखनेश(श्वर-शिष्या-वतंस)पं०श्रीकल्याणरत्नजीगणिनां तव(त्)शिष्यपं० [इतः परं नास्ति किञ्चिदपि लिखितम् ।]

[1511] अन्तः— भावप्रभाख्यवरसूरिगणाधिपेन श्रीजैनधर्मवरसंस्तवनं सुरम्यम् ।
शिष्यस्य कौतुककृते रचितं सुबोधं कल्याणमन्दिरसदन्तिमपादलग्नम् ॥४५॥

इति श्रीकल्याणमन्दिरांत्यपादसमस्यामयं श्रीजैनधर्मवरसंस्तवनं श्रीपौर्णिमीयगच्छाधिराजश्रीभावप्रभसूरिणा रचितम् ॥

संवत् १७९१ वर्षे भाद्रपदमासे कृष्णपक्षे अष्टमीतिथौ रोहिणीपतिवारे श्रीमदणहिल्लपुरपत्तने ढंढेरपाटके पूर्णिमापक्षीयभट्टारकश्री ५ श्रीभावप्रभसूरिविजयराज्ये सतीर्थाल्लालजी(सतीर्थ्यलालजी)केनेदं पुस्तकं लिवी(पी)कृतम् लघुशिष्यज्योतीरत्नपठनार्थम् श्रीश्रेयः ॥ काव्यम्—

शस्युः कुरंगकुटकुंजसत्ककुद्मत्कौंचांककूर्मकजकेशरिकंचुकांकाः ।
कोलांककुंडलिकलाधरकासरांकाः कप्पंककः कुलिशकांककिशोरकांकौ ॥१॥

[1519] अन्तः— इति श्रीअजितशांतिस्तवनं संपूणम् ।

संवत् १७३७ वर्षे ज्येष्ठसुदिप्रतिपदातिथौ रविवासरे श्रीभाग्यनगरमध्ये पं०श्री ५ श्रीविमलचन्दगणि–मुनिश्रीजयचन्दजीमुनिश्रीअमरचन्दजी–मुनिश्रीचतुरचन्दजीलिखितम् । सुश्रावकपुन्यप्रभावकदेवगुरुपरमभक्तिकारकसा०जयतीदास–सा०ऋषभदासश्राविकाबनोईपठनार्थम् ॥श्री॥

[1522] मू०अन्तः— इति श्रीअभिनन्दनजिनस्तोत्रम् ॥ अष्टोत्तरशतसंवरशब्दार्थगर्भितम् ।
श्रीतपागच्छाधिराजश्रीहेमविमलसूरिणा कृतं लिखितं च श्रीसयंबलिकशुभनगरे संवत् १६५६ मार्गशीर्षवदि ८ बुधवासरे ॥

वृ०अन्तः— इति श्रीअष्टोत्तरशतसंवरशब्दार्थगर्भितश्रीअभिनन्दस्तोत्रावचूरिः संपूर्णा लिखिता कृता च श्रीतपागच्छाधिराजश्रीहेमविमलसूरिशिष्याणुना श्रीसौभाग्यहर्षसूरिपट्टधारिणा श्रीसोमविमलसूरिणा श्रीसयंबलिकशुभनगरे विद्वज्जनैः प्रसादमाधाय संशोध्या कल्याणं भवतु पाठक–वाचक–श्रोतृकसाधुजनपरंपराणाम् ॥ संवत् १६५६ मार्गशीर्षमासे ।

[1558] मू०अन्तः— श्रीकल्याणनिर्मलगुरोश्चरणप्रसादाद् भक्तामरस्तवनपादतुरीयमाप्त ।
पादत्रयेण रचितं स्तवनं नवीनं विनयाब्धितेन मुनिना विमलस्य शांतेः ॥४५॥
इति श्रीशांतिभक्तामरस्तोत्रं संपूर्णम् ।

संवत् १९१२ ना वर्षे माघविद ८ शुक्रे लिषतं गुरुजीश्री ५ रंगसागरजीगणि–तत्शिष्यमुनिफतेसागरगणि–तत्शिष्यमुनिदेवसागरलिपीकृतं श्रीकोटामध्ये चतुर्मासं भ० ।

[1559] अन्तः— संवत् १५६३ वर्षे मार्गसरिमासे शुक्लपक्षे सप्तम्यां रविवारे पूज्यपं०श्रीहर्षरत्नग०जयकल्लोलादि श्रेयोस्तु ॥

प्राग्वाटज्ञातीयकोठारीनरसा–भार्याश्राविकाआसपु०कोठारीसोमा–भार्या

श्राविकाहर्षू-पुत्रकोठारीनायकपठनार्थं ग०जयरत्नेन लखितं लेखक-वाचकयोः शुभं भवतु श्रीरस्तु त्रसीं(त्रिंग्रा)मपुरे ॥

[1662] वृ०अन्तः— श्रीवृद्धकेशगणाब्धिचन्द्रसदृशा विद्वज्जनाह्लादन-
प्रावीण्याद् धर्मसारपाठकवरा राजन्ति भास्वत्तराः ।
तच्छिष्यः समुदाऽपि देवतिलकः सद्बुद्धिवृद्धिप्रदां
श्रेयोमन्दिरसंस्तवस्य मुदितो वृत्तिं व्यधादद्भुताम् ॥
कल्याणमंदिरवृत्ति-सौभाग्यमंजरी समाप्ता ॥ इति वृत्तिः॥

[1666] मू०अन्तः— श्रीकल्याणमंदिरस्तोत्रं महाकविश्रीसिद्धसेनविरचितं संपूर्णं कृतं घोलेराग्रामे। संवत् १७०० वर्षे कार्त्तिकमासे कृष्णपक्षे दशम्यां तिथौ बुद्ध(ध)वासरे लिखितं ऋ० श्री ५ वीरदास-ऋ०श्रीजसाजी-शिष्यमुनिसूजा स्वयं आत्मार्थे ॥

वृ०अन्तः— श्रीमत्तपागणनभोंगणपद्मबंधुर्भाग्याद्कब्बरमहीरमणाद्वाप्ता ।
ख्यातिं जगद्गुरुरिति प्रथितां दधानः सश्रीकहीरविजयाभिधसूरिरासीत् ॥१॥
तत्पट्टे वरगुणमणिगणरोहणभूधरा धरापीठे ।
साम्प्रतमद्भुतयशसो विजयन्ते विजयसेनसूरिवराः ॥२॥ - गीतिः
वाचकचूडामणयः श्रीमन्तः शान्तिचन्द्रनामानः ।
विद्यागुरवो विबुधा विजयन्तां कमलविजयाश्च ॥३॥
एषां श्रीसुगुरूणां प्रसादतो नयन-बाण-रस-चन्द्रे(१६५२) ।
प्रमिते वर्षे रचिता वृत्तिरियं कनककुशलेन ॥४॥
प्रत्यक्षरं गणनया वृत्तौ संख्या न विद्यते ।
संजाता षट्शती सार्द्धा श्लोकानामिह मङ्गलम् ॥५॥
अंकतो ६५० ससूत्रवृत्तेर्ग्रंथाग्रन्थम् ७२७ ॥
इति श्रीकल्याणमन्दिरवृत्तिः समाप्ता ॥

[1670] अन्तः— संपूर्णा च सप्रभावश्रीस्तवराजस्य वृत्तिः ॥
जीयासुः श्रीतपगणगगनांगणभासने प्रभाहस्ताः ।
श्रीविजयप्रभभगवत्पादा विलसत्प्रसादार्थाः ॥१॥
तत्साम्राज्ये विजयिनि विजयन्ते कविवराः कृपाविजयाः ।
तच्छिष्यमेघनामाऽलिखत् प्रभोराज्ञया वृत्तिम् ॥२॥

[1671] आदिः— श्रीमत्पार्श्वजिनं नत्वा बालानां बोधहेतवे ।
कल्याणमन्दिरस्तोत्रव्याख्यालेशो विधीयते ॥१॥

तत्र प्रथममस्य स्तोत्रस्योत्पत्तिर्लिख्यते । तद्यथा— उज्जयिन्यां विक्रम-पुरोधसः पुत्रो विप्रसिकाकुक्षिभूः मुकुन्द इति नामा वादार्थं भृगुकच्छपुरिं प्रति चलितः ।

अन्तः— श्रीमन्नागपुरीयकाह्वयतपागच्छाधिपाः सत्क्रियाः

सूरिश्रीप्रभचन्द्रकीर्त्तिगुरवस्तेषां विनेयो वरः ।

वाच्यः पाठकहर्षकीर्त्तिरकरोत् कल्याणसद्मस्तवे

मेधामन्दिरदेवसुन्दरमहोपाध्यायराजो महान् ॥१॥

यत्किंचिन्मतिमन्दत्वात् यच्चात्रानवधानतः ।

व्याख्यातं वैपरीत्येन तद् विशोध्यं विचक्षणैः ॥२॥

इति श्रीशिव(कल्याण)मन्दिरस्तोत्रस्य टीका संपूर्णा ॥ ग्रं० ७०० ॥

[1676] **मू०अन्तः**— इति श्रीकल्याणमन्दिरनामकं श्रीपार्श्वनाथस्तोत्रं समाप्तिमगात् ।

संवत् स्थाणुदृष्टि-विधि-श्रवणसप्ति-कुमुदबांधव(१७४३)प्रमिते श्रीमति रामपुराभिख्ये नगरे ।

अव०अन्तः— श्रीमति बृहत्खरतरगच्छे । भ०श्रीमज्जिनरत्नसूरीन्द्राणां शिष्येण श्रीवर्द्धमानसूरिणा स्वविनेयवा०अमरसोमगणिकृते कृतो लिखितश्चायमर्थः । नभःशुक्लप्रतिपदि सौम्यवारे ।

[1680] **मू०अन्तः**— इति श्रीकल्याणमन्दिरस्तवः समाप्तः । पं०श्रीक्षि(क्ष)माकीर्त्तिगणि-शिष्य-पं०राजकीर्त्तिगणिलिखितम् ॥

अव०आदिः— श्रीपार्श्वनाथाय नमः ॥

श्रीपार्श्वजिनमानम्य सर्वज्ञं मोहनाशनम् ।

कल्याणमन्दिरस्तोत्रस्यार्थः कश्चन लिख्यते ॥१॥

तत्रादौ कल्याणमन्दिरस्तवस्योत्पत्तिर्वर्ण्यते । श्रीउज्जयिन्यां श्रीविक्रमस्य पुरोधसः पुत्रो देवसिकाकुक्षिभूः सिद्धि(द्ध)सेनो वादीन्द्रो वादार्थं भृगुकच्छं पुरं गतः । मुकुन्देति पूर्वनामानो वृद्धवादिगुरुवः सन्मुखाः गोपसमक्षं वादे संस्कृतं जल्पममकरोत् । न किंचिदिति गोपैरुक्तम् । गुरुवः प्रोचिरे—

नवि मारीइ नवि चोरीइ परदारागमणने वारीइ ।

थोवा थोवं दाईए, इम सरगि दुगि जाइए ॥१॥

कालअ कम्बल नइनी छद्दट छासिइं भरी उदइ वरपट्ट ।

अइवड पडीउ नीलइ झाडी, अवर किसर गहसींग मिलाडी ॥२॥

ग्रन्थान्तरे त्वेवम्–

जहि डूंगर तहि खोहलइ, जहि नइ तहि वलणाइ ।

जिहिं सुपुरिस तहिं घंघलइ, हीआ विसूरिहि कांइ ॥१॥

जेण कलंतरु चिंतियउ, गंठिइ बन्धउ दम्म ।

नवि खमणउ नवि सेवडउ गयउ अकत्थउ जम्म ॥२॥

इधु सुत्थिअ देसडउंइ, भइ दुल्ला मु कल्लि ।

अमुणिय जम भड दडवडइ, पडि इकि अज्ज कि कल्लि ॥३॥ इत्यादि ॥

गोपैस्त्वम्—जितं जितमनेन । एवं वृद्धवादिर्निर्जित्य प्रव्राजितः । गुरुदत्तकुमुदचन्द्रनाम्ना श्रीसूरिपदप्राप्तौ पुनः सिद्धसेनदिवाकर इति नाम्ना ख्यातौ गुरुन् जगाद सर्वं सिद्धांतं संस्कृतं करोमि । गुरव ऊचिरे—

बाल-स्त्री-मन्द-मूर्खाणां नृणां चारित्रकांक्षिणाम् ।
अनुग्रहार्थं तत्त्वज्ञैः सिद्धांतः प्राकृतः कृतः ॥१॥

एवं जल्पतस्तव महत् प्रायश्चित्तमापन्नम् । ततो विमृश्य सिद्धो जगौ—अहमाश्रितमौनो द्वादशवार्षिकं पारांचिकं नाम प्रायश्चित्तं गुप्तमुखवस्त्रिकः रजोहरणादिर्लिंगः प्रकटितावधूतरूपश्चरिष्याम्युपयुक्तः । एवमुक्त्वा ग्रामादिषु भ्रमतः श्रीसिद्धसेनाचार्यस्य १२ वत्सरीयुः । ततः श्रीउज्जयिन्यां महाकालप्रासादे गत्वोपावीक्षत् । देवं कथं न नमस्यसीति लोकैर्जल्पमानोऽपि नाजल्पत्, नत्वो[प]स्थापितोप्युत्तस्थौ । एवं च जनपरंपरया तं श्रुत्वा श्रीविक्रमादित्यनृपः समागत्योक्तवान्–कुतस्त्वया देवो न वन्द्यते ? वादिनेदमवादि—मत्प्रणामं न सहते शिवः । राजा जगाद–किमसंभाव्यं ब्रवीषि ? सिद्धः प्राह— एवमेतत् । राजा प्रोचे-तर्हि कुरुष्व प्रणामं, प्रत्ययो दृश्यतो सिद्धः स्माह–राजन् ! निःफलं कार्यं बुधा नैवारभन्ते... ... ...

अव०अन्तः— अनेन वृत्ते जिनविशेषणद्वारेण कविना दीक्षासमये गुरुदत्तं कुमुदचन्द्रेति स्वरूपं स्वनाम ज्ञापितं दृष्टव्यमत्र । स्तवनं महाकविदब्धं प्रायः प्रतिवृत्ते मंत्रादयः संभाव्यन्ते । परं ते तथाविधाम्नायाभावान्नाभिहिताः स्वयं तु ते ज्ञातव्याः सुगुरुप्रसादात् ॥४४॥

इति महामन्त्रमयसमहिमश्रीकल्याणमंदिराख्यश्रीपार्श्वनाथस्तववृत्तिः समाप्ता ॥

संवत् १६६७ वर्षे वदि ३ शनौ श्रीविवन्दिरे श्रीअचलगच्छे श्रीधर्ममूर्त्तिसूरिविजयराज्ये पं० राजकीर्त्तिगणि-शिष्यऋषिश्रुतकीर्ति–शिष्यविजयकीर्त्तिवाचनार्थम् ॥

[1701] अन्तः— इति श्रीकुमुदचन्द्रविरचितकल्याणमन्दिरस्तोत्रं काव्यबन्ध(बद्धं) संपूर्ण भाषा-अर्थ-बालावबोधसहितम् ।

कुमुदचन्द्रकृतं काव्यं वाणारसी भाषा कयौं ।
दोनुं देषि विचारी लबधिशेखर अर्थ जु वयौं ॥१॥

चोपाईछन्दः— काव्यग्रन्थ कोई०... ... ... ॥२॥

रतनशेखर गुरु अंचलगच्छिं लबधिशेखर शिष्य ताकी पच्छि ।
संवत सत्तरसित्तरि (१७७०) वरषैं पोस दशमि दिन आनन्द हरषै ॥३॥

इति श्रीकल्याणमन्दिरस्तोत्रार्थः मुनिलबधिशेखर०स्वार्थे आत्मार्थे संतजनज्ञापनार्थं कृतो लिखिता(तः) । संवत् १७७० पोषदशमीदिने श्रीनगरथट्टामध्ये(ध्ये) श्रीपार्श्वप्र[सा]दात् ।

[1731] अन्तः— इति श्रीवीरस्तोत्रं समसंस्कृतं संपूर्णम् ।

संवत् १७३३ वर्षे कार्तिककृष्णत्रयोदश्यां वाचनाचार्य्यश्रीमानसमुद्रगणिनां शिष्यमुख्यपं०श्री ५ श्रीभावनिधानगणीनां शिष्यहेमकरणेन लिखितमिदं संघवी-श्री ५ श्रीवछीयापुत्रिका सुश्राविका पुण्यप्रभाविका राजकुमरिजीपठनार्थम् ।

[1759] **आदिः—** कल्याणमालामणिसंनिधानं श्रीगौतमाद्यैर्मुनिभिः प्रधानम् ।
यशोगुणैः संप्रति वर्द्धमानं स्तवीमि भक्त्या जिनवर्द्धमानम् ॥१॥

अन्तः— एवं कल्याणनिर्वाणकल्याणिकतपोहनि ।
संस्तुतः पार्श्वचंद्रेण श्रीवीरो दिशतु श्रियम् ॥

इति श्रीमहावीरस्तवनं सारस्वतसंज्ञाधिकारसूत्रपदस्यांकितम् ।

वृ०आदिः— स्तुत्यं सारस्वतं बीजं बीजं सज्ज्ञानसंपदाम् ।
नयाम्यहं स्तुतेर्मार्गे मनोमन्दिरदीपकम् ॥१॥
कविना पार्श्वचंद्रेण वीरस्तोत्रमकारि यत् ।
सारस्वतस्य संज्ञाधिकारसूत्रपदांकितम् ॥२॥
श्रीपूर्णिमागणाधीशः श्रीभावप्रभसूरिराट् ।
कुर्वे तस्याधुना टीकामर्थार्थिशिष्ययाञ्चया ॥३॥

इति श्रीपूर्णिमागच्छीयभट्टारकश्री ५ श्रीभावप्रभसूरिविरचिता श्रीमहावीरस्तोत्रटीका संपूर्णा । संवत् १७९५ मिते भाद्रपदमासे कृष्णपक्षे त्रयोदश्यां तिथौ गुरुवारे ।

[1810] **मू०अन्तः—** इत्यनुबन्धफलगर्भा गौतमस्वामिस्तुतिः ॥

संवत् १५१५ वर्षे फा० व० १२ दिने पूज्य पं०मेरुरत्नगणि-शिष्येणाऽलि(ले)खि ॥

अव०अन्तः— इत्यनुबंधफलगर्भगौतमस्तोत्रावचूर्णिः ॥ सं० १५१५ वर्षे फा० व० १३ दिने तपागच्छनाथकश्रीसोमसुन्दरसूरि-शिष्यश्रीविशालराजसूरि-शिष्यपं० मेरुरत्नगणि-शिष्यसिद्धांतसुन्दरेणाऽलेखि ॥

[1849] **अन्तः—** इति सत्तरिसयस्तोत्रं समाप्तम् ।

संवत् १८३८ वर्षे फाल्गुणमासे शुक्लपक्षे तिथौ नवम्यां रविवारे श्रीविक्रमपुरमध्ये लिष(खि)तं पं०कनीराम चिरं०खुस्यालपठनार्थम् ॥

[1850] **अन्तः—** इति श्रीअजितशांतिस्तवनं संपूर्णम् ॥

संवत् १७३७ वर्षे ज्येष्ठसुदिप्रतिपदातिथौ रविवासरे श्रीआम्बनगरमध्ये पं०श्री ५ श्रीविमलचन्दगणि-मुनिश्रीजयचन्दजीमुनि-श्रीअमरचन्दजीमुनि-श्रीचतुरचन्दजीलिखितम् ॥ सुश्रावकपुन्यप्रभावकदेवगुरुपरमभक्तिकारकसा०जयती दाससा०ऋषभदास-श्राविकाधनोबाईपठनार्थम् ।

[1857] **आदिः—** अर्हं ॥ अजितशांतिजिनाधिपयोः स्तवः० ... ...

अन्तः— संवद्विक्रमभूपतेः शर-ऋतुद्वन्द्वैः-शशांके(१३६५)मिते

पौषस्यासितपक्षभाजि शशिना युक्ते द्वितीयातिथौ ।

श्रीमत्श्रीजिनसिंहसूरिसुगुरोः पादाब्जपुष्पंधयः

पुर्यां दाशरथेर्जिनप्रभु(भ)गुरुर्जग्रन्थ टीकामिमाम् ॥४॥

अशुद्धपाठप्रतिषेधनार्थं वृत्तिः स्तवस्यास्य मया व्यधायि ।

इतीपि चेत् कस्यचनोपकारः संपत्स्यतेऽभूरितरां पवीनः(?) ॥५॥

समाप्ता चेयं श्रीमदजितशांतिस्तववृत्तिर्बोधप्रदीपिकानाम कृतिरियं श्रीजिनप्रभसूरीणाम् । ग्रंथा० ७४० ।

प्रत्यक्षरं निरूप्यास्या [ग्रन्थामानं वि]निश्चितम् ।

अनुष्टुभां सप्तशती चत्वारिंशत्समन्विता ॥

संवत् १४६४ वर्षे माहवदिषष्ठीदिने उत्तराफाल्गुनीनक्षत्रे भौमवारे श्रीअजितशांतिस्तववृत्तिम(र)लेखि मन्त्रिकरणा-सुतमंत्रिनरदेवेन० ...

[1870] अन्तः— इति श्रीअजितशांतिस्तववार्तिकं लिखितम् ।

संवत् १७६० वर्षे फागुणवदि १० रविवारे लिखितं खंभायतमध्ये ।

श्रीमद्बृहत्तपागच्छेऽजितशांतिस्तवस्य च ।

श्रीसाधुरत्नशिष्येण श्रीपार्श्वचंद्रेण वार्त्तिकम् ॥१॥

चक्रे बालावबोधाय वाचनीयं च हर्षदम् ।

वाच्यमानं चिरं नन्द्यात् तावद् यावज्जिनागमः ॥२॥

ऋषिश्रीरूपजीपठ्यमानम् ।

[1930] आदिः— श्रीपार्श्वं सम्यगानम्य हर्म्यं सकलसंपदाम् ।

वृत्तिर्वितन्यतेऽस्माभिरुपसर्गहरस्तवे ॥१॥

विद्यामन्त्रोद्धाराः पूर्वाचार्यैः प्रदर्शिता येऽस्मिन् ।

ते च चिरन्तनवृत्तेर्ज्ञेयास्तानिह न वक्ष्यामः ॥२॥

अन्तः— उपसर्गहरस्तोत्रे व्याख्या किंचिन्मयाऽरचि ।

यात्र चानौचिती वाच्ये सा शोध्या कृपया बुधैः ॥१॥

वृत्तिः सैषा विशेषोक्तिरीचिष्णुश्चारुचेतनैः ।

अर्थकल्पलता नाम चिरराय्राम चर्च्यताम् ॥२॥

संवद्विक्रमभूपतेः शर-ऋतुद्वन्द्वि-मृगांकैर्मिते (१३६५)

पौषस्यासितपक्षभाजि शनिना युते नवम्यां तिथौ ।

शिष्यः श्रीजिनसिंहसूरिसुगुरोर्वृत्तिं व्यदर्धीदिमां

श्रीसाकेतपुरे जिनप्रभ इति ख्यातो मुनीनां प्रभुः ॥३॥

समाप्ता चेयमुपसर्गहरस्तववृत्तिः, कृतिः श्रीमज्जिनप्रभसूरेरिति । ग्रन्थाग्रम् २७१ ॥

[1968] मू०आदिः— दुरियरयसमीरं मोहपंकोहनीरं० ।

मू०आदिः— श्रीजिनाय नमः ॥

वर्द्धयतु वर्द्धमानः श्रीसिद्धान्तरुचिवाचकोवाच ।
चिरतचमत्कृतिचतुरं चतुरनराणां वचो यस्य ॥१॥

अन्तः— इति श्रीमहावीरचरित्रटीका समाप्ता ॥ लिवी(पी)कृतं वा०साधुहर्षगणिना ॥

श्रीखरतरगच्छेशश्रीमज्जिनभद्रसूरिशिष्याणाम् ।
श्रीरापल्लेः पार्श्वप्रभुलब्धवरप्रसादानाम् ॥१॥
श्रीग्यासदीनसाहेर्महासभालब्धवादिविजयानाम् ।
श्रीसिद्धान्तरुचिमहोपाध्यायानां विनेयेन ॥२॥
साधुसोमगणीशेनाक्लेशेनार्थप्रबोधिनी ।
श्रीवीरचरिते चक्रे वृत्तिश्चित्तप्रमोदिनी ॥३॥
मतिमन्दान्मोहाद् वा प्रमादतो वात्र किंचनापि मया ।
यत् सूत्रितमुत्सूत्रं तन्मिथ्यादुःकृतं मेस्तु ॥४॥
अत्रानागमिकं युक्तिरिक्तं वा यत् पदं क्वचित् ।
विद्वद्भि[रा]रभि(चि)ता सद्भिस्तच्छोध्यं शुद्धबुद्धिभिः ॥५॥
जिनवल्लभसूरीन्द्रसूक्तिमौक्तिकपंक्तयः ।
दर्शितार्थाः सुदृष्टिनां सुखग्राह्या भवन्त्विति ॥६॥
भावो(व)चरित्रपंचकवृत्तिविहिता नवैकतिथि(१५१९)वर्षे ।
हर्षे हर्षेण महर्षिगणैः प्रवाच्यमानां चिरं जयतु ॥७॥

इति श्रीवीरचरित्रटीका संपूर्णा ॥

संवत् १७३७ वर्षे मगसिरवदि ७ दिने विभाते लिखितं श्रीस्तंभतीर्थमध्ये।

[1973] मू०आदिः— श्रीगुरुभ्यो नमः

नमितसुरनरालिव्रातपादारविन्दं
विदितसकललोकालोकसद्ज्ञेयवृंदम् ।
सविनयमथ नत्वा वर्द्धमानं जिनेशं
किमपि विरचयेहं तत्स्तवस्यार्थलेशम् ॥१॥

पूर्वं तावच्छ्रीपादलिप्तसूरयोऽनेकयोगसिद्धान्तमहान्तः प्रभावकपुरुषा आसन्। तदन्वये सकलज्ञानविज्ञानविज्ञाः श्रीपुण्यतिलकसूरयो विहरन्तोऽवंतीपुर्यां समेतास्तत्र च श्रीविधिपक्षगच्छाधिराज-सरस्वतीलब्धप्रसादश्रीमन्महेन्द्रसिंहसूरयः संति। तेषां महिमानं सकलनागरिकजननिकरवदनकमलालंकारायमानं श्रुत्वा विद्यामदध्मातचित्ताः श्रीपुण्यतिलकसूरयो वादलिप्सया श्रीगुरुसमीपमागता। उक्तं च भो !

मया सह वादो विधेय;स्तदौ श्रीगुरुभिरुक्तं किं वृथायासेन वादेन ? प्रयोजनमनुद्दिश्य मन्दधियोपि न प्रवर्तन्ते । तदा श्रीपुण्यतिलकसूरिभिरुक्तं कथं वृथायासः । यो यं जयति स तं शिष्यं करोति(त्वि)त्यावयोः संधा । तदा गुरुभिरंगीकृतं प्रारब्धश्च वादः । श्रीगुरुभिर्मुहूर्त्तादेव ते जिताः । ततः श्रीपुण्यतिलकसूरयः स्वं धन्यं मन्यमानाः श्रीगुरुन् प्रणम्य संस्तूय च शिष्या जाताः । श्रीगुरुभिरपि तेषां महत्त्वरक्षणार्थं दीक्षां दत्त्वा शाखाचार्यत्वे स्थापिताः । तत्पूर्वजानां च श्रीपादलिप्तसूरीणां विरचितमिदं श्रीरजिनस्तोत्रं सप्रभावं बहुयोगसिद्धिसंपन्नं दृष्ट्वा श्रीसप्तस्मरणमहास्तोत्रेषु तृतीयं महास्तोत्रं स्थापितम् । महत्त्वं चास्य स्तोत्रस्यानेकयोगसिद्धिमयत्वेन समहिमत्वेन च ज्ञेयं श्रीउपसर्गहरस्तोत्रवत् । तदन्वये चाद्यापि नवीनशिष्यस्य दीक्षां दत्त्वा प्रथममिदं स्तोत्रं पाठयंतीति । अस्य प्रथमगाथा—

जयइ नवमलिणकुवलयविअसिअसयवत्तपत्तदलच्छो ।
वीरो गइंदं मयगलसुललिअगइ विक्कमो भयवं ॥१॥

मू०अन्तः— अथोपसंहारमाह—

एवं वीरजिणंदो अच्छरगणसंघसंथुओ भयवं ।
पालित्तयमहमहिओ दिसउ खयं सव्वदुरिआणं ॥६॥

अर्थात्— कासद्रहगच्छीयपादलिप्तसूरिकृतमेतत् स्तोत्रमित्यर्थः ॥

विधिपक्षगणाधीशाः सूरयो भूरिसद्गुणाः ।
श्रीअमरसागराख्याः विचरन्ति महीतले ॥१॥

तत्पक्षद्योतकाः श्रीमद्दयासागरवाचकाः ।
सच्चारित्रगुणोपेता ज्ञानविज्ञानपेशलाः ॥२॥

तेषां प्रसादमासाद्य पुण्यसागरवाचकैः ।
महावीरस्तवस्येयं टीका विरचिता शुभा ॥३॥

नन्दाग्नि-मुनि-भूसंख्ये(१७३९)वर्षे मास्याश्विने सिते ।
पक्षे दशम्यां वारेऽर्के बुरहानपुरे पुरे ॥४॥

इति श्रीमहावीरस्तवस्यावचूरिः ॥

[2004] अन्तः—एवं नुतश्चरमतीर्थपतिर्नयेन ँधारबंदिरनिवास[– –]रत्नम् ।
आनन्दपूर्वविजयाभिधकोविदस्य शिष्येण मेरुविजयेन शिवाय भूयात् ॥ १९ ॥
इति गंधारबन्दिरस्तवनं संपूर्णम् ॥

[2030] अन्तः— इति श्रीमहेन्द्रप्रभसूरिकृता श्रीरिकापल्लीपार्श्वनाथस्तवावचूरिः संपूर्णा ॥
वाचकोत्तमवाचकचक्रचूडामणिवा०श्री७श्रीमानचन्द्रजीगणि-शिष्यप्रवरप्रधानमुनिश्रीकल्याणचन्द्रजीगणि–तदंतेवासी(वासि) मुनिमाणिकचन्द्र–शिष्यमुनिसौभाग्यचन्द्रगणिलिखितं श्रीसामराईनगरे चिरं खुस्यालचन्द्रपठनार्थम् ।

[2155] मू०आदिः— श्रीवीतरागाय नमः ॥

श्रीवर्द्धमानः मांगल्यप्रदीपः पीवरद्युतिः ।
देयादतुलकल्याणविलासं विपुलं सताम् ॥१॥

स्त०आदिः— अर्हं नत्वाऽल्पबुद्धीनां बोधाय जनभाषया ।
कुर्वे दीपालिकापर्वकल्पव्याख्यानमादारात् ॥१॥

मू०अन्तः— संवत्सरेऽग्नि-द्विप-विश्व(१४८३)संमिते दीपालिकाकल्पममुं विनिर्ममे ।
तपागणाधीश्वरसोमसुन्दरश्रीसूरिशिष्यो जिनसुन्दराह्वयः ॥२८॥

दीपालीपर्वकल्पोयं वाच्यमानः सुधीजनैः ।
जीयाज्जयश्रियो हेतुराचन्द्रार्क्कं जगत्त्रये ॥२९॥

इति श्रीतपागच्छाधिराजश्रीसोमसुन्दर-शिष्यभट्टारकप्रभुश्रीजिनसुन्दरसूरि-विनिर्मितायां इति श्रीदीपोत्सवकथानकं संपूर्णम् ।

स्त०अन्तः— श्रीज्ञानविमलसूरीश्वरप्रसादात् सुखावबोधार्थम् ।
श्रीदीपोत्सवकल्पस्ति(स्त)बुकार्थः समर्थितो मयका ॥१॥

कविदीपदीपसागरशिशुना सुखसागरेण सन्मतिना ।
गुण-रस-मुनि-विधुमाने(१७६३)वर्षे श्रीराजनगरनगरे ॥२॥

संशोध्यं खलु चैतत् प्राकृतभाष्ये तथापि बुद्धिधनैः ।
यस्मादुपकृतिनिपुणास्संतः संतीति कल्याणम् ॥३॥

सद्ध्यानोज्ज्वलदीपकः प्रविलसत्स्वाध्यायमे(मा)रात्रिकः
शुद्धाहारसुभोजनः सुगुणवाक् तांबूलशोभाशुभः ।
अन्तःनिर्गमलक्ष्म्युपागमजयज्येष्ठाम्बुनामोत्तरः
शीलालंकृतभाग् मुदे भवतु अ[यो]र्हद्धर्म्मदीपोत्सवः ॥४॥

इति अंतर्मलदीपोत्सवः ॥

द्वादशशशतप्रमाणं ग्रन्थाग्रं प्रायशोस्य संजातम् ।
वाच्यं विनयेन श्रीवीरचरित्रमिदमखिलम् ॥१॥

कविरविरद्धिविजयबुधस्याभ्यर्थनया कृतोप्ययं यत्नः ।
विबुधजनैर्वाच्यमानः सुदृशां सम्यक्त्वदो भवतु ॥

इति श्रीसूत्रतः टबावलीतः दीपालिकाकल्पः संपूर्णः ॥

संवत् १७८७ वर्षे शाके १६५२ प्रवर्त्तमाने फाल्गुनमासे शुक्लपक्षे त्रयोदश्यां तिथौ श्रीमति अणहिल्लपत्तने ढंढेरपाडके कृतचातुर्म्मासकैः श्रीपूर्णिमापक्षीयप्रधानशाखीयभट्टारकश्रीभावप्रभसूरिभिः पं०श्रीलालजी-पं०श्रीहेमचन्द-पं०श्रीतेजसीमुख्यभक्तशोभितैः शिष्यजोइतादास-प्रयागजी-प्राणजीप्रमुखसेवितचरणकमलैरिदं श्रीदीपालिकाकल्पपुस्तकं सूत्रं स्तबुकार्थमयं शोधितम् । पुनर्लिखितं तु प्रयागजीनाम्ना

शिष्येण निर्विघ्नं संपूर्णं जातं श्रीढंढेरकमहावीरजिनप्रसादात् प्रौढमूर्त्तिश्रीश्याम-लाजीनामपार्श्वनाथप्रसादात् । सप्रभावश्रीकलिकुण्डनामपार्श्वनाथप्रसादाच्च वाच्यमानं श्रेयोस्तु । श्रीमच्चतुर्विधसंघः सदा जीयात् । कल्याणमस्तु ।

इति श्रीदीवालीकल्पः संपूर्णः ॥

संवत् १८६७ ना वर्षे मागसिरवदि ५ दी(दि)ने लषी(लिखि)तं पं० श्री १००८ ग्यांनविजयगणी तत्सिष्य १०८ श्रीपं०ललितविजयगणी–सिष्यसुभ-विजयलषीतं सूत्रात् ॥

[2158] **मू०अन्तः**— इति श्रीवीरचरित्रकल्पदीपालीकल्पः संपूर्णः लिखितः ॥

इति श्रीवीरपाटे भट्टारकश्री(५)१०८श्री५विजयदेवसूरीश्वरचरणसेवक-उपाध्यायश्रीरत्नविजयगणि–चरणसेवकपं०श्री१९श्रीषिमाविजयगणीना सुशिष्य श्री११श्रीनेमविजयगणीना चरणकमल सदाइं सेवितसेवक पं०ग्यानविजयगणी पं०-ग्यांनासवाईपं०श्रीनेमविजयग०सत्कपं०न्यानविजयगणीलषितं पाटणमध्ये संवत् १८१२ ना वर्षे मासोत्तममासे श्रीमाहमासे कृष्णपक्षे तृ(त्री)ज(३) दिने बुधवासरे श्री ॥

स्त०अन्तः— श्री १०८ श्रीश्रीमहोपाध्यायश्रीलावण्यविजयगणीना सिष्य श्रीश्री-उपाध्यायश्री१९श्रीरत्नविजयगणीना सुशिष्य पं०श्रीषिमाविजयगणिना सिष्य पं०श्री११पं०श्रीनेमविजयगणीना सिष्य पं०श्रीज्ञानविजयगणीलषितं पाटणमध्ये संवत् १८१२ ना वर्षे मासोत्तममासे श्रीमहामासे कृष्णपक्षे १४ दिने रविवासरे दीवालीकल्पः संपूर्णः श्रीः ॥

मू०अन्तः— श्रीमत्तपगणगगनाङ्गणमणिविजयसेनसूरीणाम् ।
शिष्याणुना कथेयं विनिर्मिता कनककुशलेन ॥ ५० ॥
बुधपद्मविजयगणिभिः प्रवरैर्भीमादिविजयगणिभिश्च ।
संशोधिता कथेयं भूतेषु–रसेन्दु(१६५५)मितवर्षे ॥ ५१ ॥
गणिविजयसुन्दराणामभ्यर्थनया कृता कथा मयका ।
प्रथमादर्शो लिखिता तैरेव च मेडतानगरे ॥ १५२ ॥

इति श्रीकार्त्तिके सौभाग्यपञ्चमीमाहात्म्यविषये वरदत्तगुणमंजरीकथानकं संपूर्णम् ॥ पं०श्रीश्री १९ श्रीनेमविजयगणि–शिष्यपं०न्यानजीलषितम् ॥

स्त०अन्तः— श्रेयना करणहारः तपगछरूप अकाशनिइ विषइं गुणनो भण्डारः बुद्धिनो अंबार सुर्यनइं समान श्रीविजयसेनसूरी(री)श्वर प्रतपइं छइं तेह्नोना शिष्योनइं अर्थे ए कथा पंचमीनी उपगारनइं अर्थे निपजावि जोडी ग्रन्थमांहिथी अधिकार जोईनइं कनककुसलकावेना । १५० । तेह्नोना शिष्यपंडितपद्मविजयगणिना सुम-तिवंत एहिवा शीष्य भीमविजयगणियें वणेवी सोधी ए कथाप्रति ॥ संवत्

१६५५ ना वर्षे ग्रन्थमांहिथी जोईनई जूदी कथा करी छ । १५१ । गणि-
विजयसुन्दरइं पोतानइं अर्थे कथा करी मई प्रथम पैलां ए कथा लषि
मेवतानगरमइं विषइं । १५२ ॥

इति कात्तिकपंचमीनइं विषइं गुणमंजरी-वरवरदत्तकथानकं संपूर्ण
पाटणमधे महोपाध्यायश्री १०८ श्रीरत्नविजयगणिना चरणयुक्त पं०श्री१९श्री-
षिमाविजयगणी-चरणसेवक पं०श्रीनेमविजयगणीना परमसिष्य पं०ज्ञानविजय-
गणीलषितम् ॥

मू०अन्तः— षट्-सप्त-पंचैकसंवत्(१५७६)विक्रमे निर्मिता कथा ।
सौभाग्यनन्दीसुरि(सुरी)न्द्रैर्हमीरपुरसंस्थिते ॥ १७ ॥ इति

संवत गो-निधि-काश्यपीसुसीसभृत्संख्यायुते वत्सरे
श्रीमन्मार्गसितेतरे शुभतिथौ षष्ठी गुरौ वासरे ।
संक्षेपं तनुते सुराजनगरे चाभाषणैकादशी-
पर्वसु धिया टबार्थमलिखित् सौभाग्यचन्द्रो मुनिः १ ॥

इति श्रीमौनएकादशीकथा संपूर्णम् । सुप्रसादं विधायायं सोधनीयं
विचक्षणैः ॥ ११श्रीपं०श्रीनेमविजयगणीमा सीष्य पण्डितश्रीन्यानविजयगणीलषितं
पाटणमध्ये संवत् १८११ वर्षे ॥

[2169] अन्तः— पुरा श्रीजिनप्रभसूरिभिः प्रतिदिननवस्तवनिर्माणपुरस्सरमिवैयाहारग्रहणा-
भिग्रहवद्भिः प्रत्यक्षपद्मावतीदेवीवचसाऽभ्युदयिनं श्रीतपागच्छं विभावयतां
श्रीसोमतिलकसूरीणां स्वशैक्ष-शिष्यादिपठनविलोकनार्थं यमक-श्लेष-
चित्र-छन्दोविशेषादिनवनवभङ्गीसुभगाः सप्तशतीमिताः स्तवा उपदीकृताः निज-
नामांकितास्तेष्वयं सर्वसिद्धांतस्तवो बहूपयोगित्वाद् विव्रियते ॥

नत्वा० ॥ गुरुभ्यः श्रुतदेवतायै सरस्वत्यै०... ... ...

मू०अन्तः— इति भगवतः सिद्धांतस्य प्रसिद्धफलप्रथां
गुणगणकथां कण्ठे कुर्याज्जिनप्रभवस्य यः ।
वितरति[त]रां तस्मै तोषाद् वरं श्रुतदेवता
स्पृहयति च सा मुक्तिश्रीस्तत्समागमनोत्सवम् ॥४६॥

इति श्रीसिद्धस्तवः ।

मू०अन्तः— अत्र पूर्वार्द्धे जिनप्रभवस्येतिसिद्धान्तविशेषणेन कविरौद्धत्यपरिहाराय
गुप्तं जिनप्रभेति स्वनामाभिहितवान् ॥ ४६ ॥ इति ॥

आदिगुप्ताभिधानस्य गुरोः पादप्रसादतः ।
पदविच्छेदरूपेयं विवृतिर्लिखिता मि[ता] ॥ १ ॥

इति श्रीसिद्धान्तस्तवावचूर्णिः समाप्ता ॥

[2185] आदिः— ॥ ॐ ॥ श्रीवर्द्धमानाय नमः ॥

पणमिय.........वीरं वोच्छंतस्सेवयसिद्धिगमपवि०

अन्तः— समाप्तोऽयं श्रीअपापाबृहत्कल्पो दीपोत्सवः कल्पो वा ॥ ग्रन्थाग्रम् ३९५ ॥

संवत् १६६५ वर्षे वैशाखसुदि ६ शनौ ..... खामगरमध्ये श्रीअंचलगच्छेशश्रीधर्म्ममूर्त्तिसूरिविजयराज्ये पण्डितश्रीक्षिमाकीर्त्तिगणि-शिष्य......कीर्त्तिगणिलिषितम् ॥ पं०श्रीजयवन्तगणि-शिष्यऋषिश्रीकुलकीर्त्तिगणि-तत्‌शिष्यऋषिमुनिकीर्ति... ... ॥

[2192] **मू०अन्तः**— सारावलीपयन्नगगाहाओ सूरिभद्दभणियाओ ।

जो पढई गुणई निसुणई सो लहइ सेत्तुज्जजत्तफलम् ॥ २५ ॥

इति श्रीशेत्रू(शत्रुं)जयतीर्थकल्पः संपूर्णः ॥

संवत् १९२३ न वर्षे पोसवद ९ दिने लखुं छे । लषितं खेमचन्द राजनगरमध्ये लखुं छे ॥

स्त०अन्तः— इति श्रीसेत्रु(शत्रुं)जयतीर्थकल्पटबाऽर्थ संपूर्ण लख्यो छे । लखावितं गरणीजीजीवसरीजी तथा नवलसरीजी तथा जडावसरीजी परत लखावी छे । सांमीनारणना वासमां लखुं छे ॥ श्लोक ७५ ॥

[2233] **आदिः**— पण्डितश्री ५ श्रीमानविजयगणिगुरुभ्यो नमः ॥

अर्हन्नामापि कर्णाभ्यां शृण्वन् वाचा समुच्चरन् ।
जीवः पीवरपुण्यश्रीर्लभते फलमुत्तमम् ॥ १ ॥

अन्तः— एतदष्टोत्तरं नाम सहस्रं श्रीमदर्हतः ।
भव्या पठंतु सानन्दमहानन्दैककारणम् ॥ १३ ॥

इति श्रीअर्हन्नामसहस्रसमुच्चये दशमशतप्रकाशः ॥१०॥

इति श्रीमदर्हतः सहस्रनामानि । महोपाध्यायश्रीदेवविजयगणिशिष्य-पं०-श्रीमानविजयगणि-शिष्यगणिश्रीप्रीतिविजयलिखितम् ॥

[2244] **आदिः**— सिद्धार्थजातो भगवान् जगच्चक्षुः श्रियेस्तु वः ।
पन्था प्रकाश(श्य)ते यीप्रैर्यद् गवां निवहैः शिवः ॥ १ ॥

अन्तः— मुनि-युग-नरपति(१६४७)संख्ये वर्षे श्रीहीरविजयसूरीणाम् ।
वचनेन हेमविजयो रविनाम्नां संग्रहं विदधे ॥ १८ ॥

इति सूर्यसहस्रनामसंग्रहे दशमः प्रकाशः ॥
पण्डितहेमविजयगणिविरचिता सूर्यनामकामधेनुः संपूर्णा ॥

[2250] **मू०आदिः**— श्रीमहिमाप्रभसूरिगुरुभ्यो नमः ॥

सकलनिर्मलमण्डलकौमुदीपतिसमानमुखो यतीनां पतिः ।
विजयते जयते तसु(व) सेवकः सुमहिमा महिमाप्रभसूरिराट् ॥ १ ॥

अन्तः— गुरोः कृतस्य भावतः प्रमेण सूरिणा सतः ।
स्तवस्य पाठतः प्रगे सुखानि सन्तु सत्सताम् ।। ८ ।।

इति श्रीसद्गुरुश्रीमहिमाप्रभसूरिस्तुत्यष्टकं संपूर्णम् ।
शुभं भवतु । संवत् १७८३ वर्षे ज्येष्ठ सुदि ३ शुक्रे लिखितम् ।।

अव० आदिः— प्रणम्य परमज्योतिर्महिमाप्रभसंभवम् ।
करोम्यस्य स्तवस्यार्थं श्रीभावप्रभसूरिराट् ।। १ ।।

सकलेति-महिमाप्रभसूरिराट् श्रीमहिमाप्रभनामा सूरिराजः आचार्यः स्वामी विजयते० ... ...

अव०अन्तः— अथ प्रमाणिकाछन्दः । सा प्राह प्रगे प्रभाते गुरोः श्रीसूरेः स्तवस्य पाठतः भणनात् सत् निरन्तरं सतां सज्जनानां सुखानि सन्तु भवन्तु इत्याशीर्वचःकथनं स्तुत्यष्टकान्ते मांगल(ल्य)हेतुत्वात् । कथंभूतस्य स्तवस्य भावतः प्रमेण भावशब्दात् अग्रे प्रभयोजनेन भावप्रमेण नाम्ना सूरिणा आचार्येण कृतस्य वचनरचनागुम्फितस्य अथवा प्रमेण उत्कृष्टकांतिना एवंविधेन सूरिणा पण्डितेन अथवा आचार्येण भावतः निजमनोरसिकत्वेन कृतस्य भावत इति पदेन न तु कस्यचित् प्रेरकस्य बलात् किन्तु निजगुरौ भक्तिरागातिशयत्वादिति । पुनः कथंभूतस्य स्तवस्य सतः शोभनस्य ।।८।।

इति श्रीस्वोपज्ञश्रीमहिमाप्रभसूरिस्तुत्यष्ट[क]स्य विवरणं श्रीभावप्रभसूरिकृतं संपूर्णं शिष्य-प्रशिष्याणां पठन-पाठनहेतवे ।। श्रीः ।।

[2255] **आदिः**— प्रणम्य भक्त्या ऋषभं जिनोत्तमं सम्यक् नमस्कृत्य गजाननं गुरुम् ।
वास्तुप्रतिष्ठादिविचारमध्याद् देवप्रतिष्ठादिव्रजं करोमि ।। १ ।।

स्वे(श्वे)तांबराशांबरशिल्पशास्त्रे पृथक् पृथग्मान्यमतांतरं महत् ।
सम्यग्धियालोक्य समग्रशास्त्राद् विरच्यते देवनिधानम्मला(माला) ।। २ ।।

प्रतिष्ठाविधाने तथा शुभस्थाने प्रासादार्चने सद्मनि देवस्थाप्ये ।
व्रतोद्यापने तथोत्पातकान्च्च च सदा शांतिकर्म्म प्रशस्तं विधेयम् ।। ३ ।।

वाप्याराम-तडाग-कूप-भुवनारंभप्रतिष्ठाव्रता-
रंभाचार्यनृपाभिषेकसमये कुर्यात् सुरस्थापनम् ।
दुष्टोत्पातकराजविग्रहगते विद्युच्च निर्घोषके
यात्रासंकटकाकसंगमगते स्यात् शांतिकर्म विदुः ।। ४ ।।

श्रीमदमरविजयाख्यः सस्नेहं उत्तमं प्रति ।
इत्येवं कथयामास प्रतिष्ठाकल्पः क्रियताम् ।। ५ ।।

तथैवं नरविजयेन सादरं कथितं मम ।
सुबोधं तु सुरम्यं च पूजाविधिः विरच्यताम् ।। ६ ।।

हैमाचार्यैः कृतं कियत् कियत् समयसुन्दरैः ।
तदनुग्रहात् प्रवक्ष्यामि सुविदवरकयोरिव ।। ७ ।।

न्यूनाष्टवर्षमात्रं स्यात् तथा पक्षप्रमाणकम् ।
विशेषमासमेकं तु उत्कृष्टं सार्द्धमासकम् ॥ ८ ॥

तेषां दिने दिने किं स्यात् किं कुर्याद् बिंबपूजनम् ।
केन केन प्रकारेण पूजाविधिः विरच्यताम् ॥ ९ ॥

इति पूज्यवचः श्रुत्वा कृत्वा शास्त्रावलोकनम् ।
सम्यक्ज्ञानावबोधाय प्रतिष्ठाकल्प उच्यते ॥ १० ॥

[2257] आदिः— प्रणम्य श्रीमहावीरं लब्धसामग्रीसंयुतम् ।
जिनबिंबस्य प्रतिष्ठापूजां वक्ष्ये विधानतः ॥ १ ॥

विनीतो बुद्धिमान् दाता न्यायोपात्तधनो महान् ।
शीलादिगुणसंपन्नो श्राद्धो ह्यत्र प्रशस्यते ॥ २ ॥

देशकालादिभावज्ञो निर्ममः शुद्धमानसः ।
श्रद्धात्वादिगुणोपेतो पृच्छकः सोऽत्र शस्यते ॥ ३ ॥

इति श्राद्धलक्षणम् ।

दर्शन-ज्ञान-चारित्रैः संयुतो ममतातिगः ।
प्राज्ञप्रश्नज्ञः सस्नात्रो गुरुः स्यात् शांतिनिष्ठितः ॥ ४ ॥

इति आचार्यलक्षणम् ॥

अन्तः— एते प्रतिष्ठास्थापनान्तरं गुर्व्वते पश्चादष्टाहिकामहोत्सवः कार्यः । इति श्रीभद्रबाहुस्वामिना विद्याप्रवादपूर्वात् प्रतिष्ठाकल्प उद्धृतः तन्मध्यात् जगच्चंद्र-सूरीश्वरेण यत्प्रतिष्ठाकल्पः भट्टारकश्रीहरिभद्रसूरिकृतप्रतिष्ठाकल्पः हेमाचार्यकृत-प्रतिष्ठाकल्पः श्यामाचार्यकृतप्रतिष्ठाकल्पः भट्टारकगुणरत्नाकरसूरिकृतप्रतिष्ठाकल्पः— एभिः प्रतिष्ठाकल्पैः सह संयोजितः संशोधितश्च । भ०श्रीविजयदानसूरीश्वराग्रे वाचकसकलचन्द्रगणिविरचितः प्रतिष्ठाकल्पः समाप्तः ।

श्रीविक्रमसंवत् २००९ ना फाल्गुनकृष्णचतुर्थी बुधवासरे श्रीमदण-हिल्लपुरपत्तनवास्तव्यश्रीमालीविप्रज्ञातीयश्रीलक्ष्मीशंकरात्मजगोवर्धनदासत्रिवेदिनेदं पुस्तकं लिपीकृतम् ।

[2265] अन्तः— सं० १५०९ वर्षे आसो शुदि १० शनौ श्रीमहीशानपुरे श्रीपूर्णिमापक्षे श्रीगुणसमुद्रसूरीणां शिष्यपं०गुणप्रभगणिना लिखिता प्रतिष्ठाविधिः ।

[2271] आदिः— अथाध्यात्मं प्रविक्षा(वक्ष्या)मि गृहबिंबस्य लक्षणम् ।
एकांगुलं त्रयं चापि पंच सप्तांगुलं शुभम् ॥१॥

अन्तः— इति पूजाविधिः ॥

लिखिता संवत् १६१२ वर्षे तपागच्छे भट्टारकप्रभुश्रीविजयदानसूरि-तत्पट्टे भट्टारकश्रीहीरविजयसूरि–तत्शिष्यपं०श्रीविशालरत्नग०–तत्शिष्यगणि-विमलाभिलिखितं स्वपरोपकाराय ॥

[2278] **आदिः**— अर्हं नमः ॥

प्रणम्य श्रीजिनान् सर्वान् सर्वातिशयसंस्मितान् ।
स्नात्रपंचाशिकां वक्ष्ये भव्यानां बोधहेतवे ॥ १ ॥

अन्तः— ततः स्तोत्रैर्वरैर्भावपूजां कुर्वन् महीपतिः ।
अर्जयामास तीर्थेशगोत्रं मुक्तिसुखप्रदम् ॥ ७ ॥

इति पूजायां श्रेणिकभूपकथा ॥ ५१ ॥

इति श्रीजिनेंद्रपूजाविषये पं० शुभशीलविरचिता स्नात्रपंचाशिका समाप्ता । ग्रन्थाग्रम् ४२१ ॥

संवत् १५५५ वर्षे अश्विनि मासे सितपक्षे त्रयोदश्यां तिथौ गुरुवासरे सुरत्राणश्रीमाहेमूदविजयराज्ये श्रीश्रीपूर्णिमागणांभोधितुहिनकराणां प्रभुश्रीपूज्य-परमगुरुभ०श्रीश्रीभुवनप्रभसूरीणां विनेयेन मुनिना वीरकलशेन भिल्लकुट्टनगरे चातुर्मासिकसंस्थेन स्वपठनार्थं लिखितमदः ॥

[2280] **अन्तः**— इति श्रीजिनेंद्रपूजाविषये श्रीतपागच्छाधिराजश्रीसोमसुन्दरसूरिशिष्यपं०शुभ-शीलगणिविरचिता स्नात्रपंचाशिका समाप्ता ॥ ग्रंथाग्रम् ४३१ सर्वसंख्यया । लिखिता पण्डितोत्तमपं०श्रीविशालसौभाग्यगणि-तच्छिष्यपण्डितचक्रचूडामणिपण्डित-श्रीशङ्करसौभाग्यगणि-तच्छिष्येण उदयसौभाग्यगणिना स्वपरोपगा(का)राय च ॥ संवत् १६७२ वर्षे आषाढमासे शुक्लपक्षे एकादश्याम् ।

[2282] **अन्तः**— इति श्रीजिनेंद्रपूजाविषये श्रीविधिपक्ष्य(क्ष)गच्छाधिराजपूज्यभट्टारकः श्री१०८ श्रीउदयसागरसूरीश्वरविरचितायां श्रीस्नात्रपंचाशिकायां नामा ग्रंथः समाप्तः ॥

जयति भुवनैकसूरः सर्वत्र विहितकेवलालोकः ।
नित्योदयः स्थिरस्तापवर्जितो वर्द्धमानजिनः ॥ १ ॥

श्रीवीरवक्त्रात् त्रिपदीमवाप्य यो द्वादशांगीं विमलां चकार ।
स्वामी सुधर्मा सकलर्षिशास्ता जीयात् स्वकीयं वयवृद्धिकर्ता ॥ २ ॥

चांद्रे कुले श्रीविधिपक्षगच्छस्तत्राभवत् साधुपधर्ममूर्तिः ।
तदीयपट्टे शिवसिंधुसूरिस्तत्स्थानके श्रीअब्धिसूरयः(रिः) ॥ ३ ॥

तत्पट्टांबुजभास्करा मृशधियो दुर्वादिदंतावलाः
हर्यक्षा उपकेशवंशजनुषो रोषादिदोषद्विषः ।
निर्णीतागमशष्ट(स्त)शास्त्रविषया उद्योगिनोऽध्यापने ।
विद्यासागरसूरयो युगवरा विश्वप्रियाः स्वर्ययुः ॥ ४ ॥

तत्पदांभोजमधुपः सूरिः श्रीउदयोदधिः ।
स्नात्रपंचाशिकाग्रन्थं रचयामास हर्षतः ॥ ५ ॥

वर्षेऽब्धिखाहीदुमिते(१८०४) सुरम्ये श्रीपोषमासे धवलपक्षे ।
श्रीपूर्णिमायां शशिवासरे च श्रीपादलिप्ताख्यपुरे सुराष्ट्रे ॥ ६ ॥

प्रत्यक्षरगणनया ग्रंथमानं विनिश्चितम् ।
अनुष्टुभां त्रयोदशशतीसंख्यमुदीरितम् ॥ ७ ॥
श्रीयोगविमलसाधोस्तथा श्रीदर्शनांबुधेः ।
अभ्यर्थना(नया) रचितो ग्रंथोयं बोधिलब्धये ॥ ८ ॥
श्रीमालिवंशे गुरुदेवभक्तः कीकासुतः सा० कचराभिधानः ।
तदीयसंघेन समं च यात्रां कुर्वन् कृतोयं जिनराजभक्त्यै ॥ ९ ॥
यावल्लवणसमुद्रो० ॥ १० ॥ अर्हतो मङ्गलं मे स्युः ॥ ११ ॥

इति प्रशस्तिः समाप्ता ।

संवत् १८१५ ना वर्षे फाल्गुणमासे कृष्णपक्षे द्वितीयादिने गुरौ वासरे लिखितं श्रीवडावलीमध्ये ॥

[2308] आदिः— अंगुष्ठे जापः मोक्षाय उपचारे तु तर्जनी ।
मध्यमा धनसौख्याय कुर्यादनामिका शांतिम् ॥१॥

अन्तः— इति जापफलम् ॥

संवत् १८४५ रा कार्तिकसुदि १५ गुरौ श्रीमेदपाटदेसे(शे) वणेडा-नगरमध्ये लिषतं खरतरगच्छे । वा० कुशलसौभाग्यगणिमावचरिश्रीया श्रीमा-हेतवे ॥

[2310] अन्तः— श्रीजयचन्द्रगुरुभिरतिप्रतिक्रमणविधिर्यथागगमम् ।
लिखितस्तत्रोत्सूत्रं यन्मिथ्यादुष्कृतं तस्य ॥ २ ॥

इति किंचित्हेतुगर्भप्रतिक्रमणक्रमविधिः समाप्तः ॥

श्रीपरमगुरुश्रीतपागच्छनायकश्रीजयचन्द्रसूरिकृतः एवं श्रीयुतसोमसुन्दर-गुरुश्रीपट्टपूर्वाचलादित्यैः श्रीजयचन्द्रसूरिगुरुभिः श्रीमत्तपागच्छपैः किंचिद्धेतुमय-प्रतिक्रमणविधिः वर्षे रस-द्यो-तिथि(१५०६)संख्ये दक्षजनप्रबोधविधये कृतश्चिरम् ।

[2319] अन्तः— श्रीमद्विक्रमसंवति बाण–रस–अमरचरण–शशि(१६६५)संख्ये ।
श्रीअमरसरसि नगरे चैत्रदशम्यां च शुक्लायाः ॥१॥
श्रीजिनचन्द्रगणाधिपशिष्याग्नि(प्र)सकलचन्द्रगणिशिष्य[:] ।
कुरुते स्म समयसुन्दर इमां चतुर्मासिकव्याख्याम् ॥२॥
इति चातुर्मासिकपर्वव्याख्यानपद्धतिः समाप्तीकृता समयसुन्दरेण ।

अतिचाराः- ५संलेखनाया अतिचाराः, १५ कर्मादानानां अतिचाराः, ८ ज्ञानस्य अतिचाराः, दर्शनस्य अतिचाराः ८ चारित्रस्य, तपस्य(सः) १२ अतिचाराः, वीर्यत्रिकस्य ३ अतिचाराः, सम्यक्त्वस्य ५ अतिचाराः,-अतिचाराः ६० द्वादशव्रतानां सर्वेऽपि संख्यामीलने १२४ श्रावक–श्राविकाणामतीचाराः समाप्तम्(प्ताः) ॥

संवत् १७५५ लिखितम् ।

[2323] अन्तः— षट्-सप्त-पञ्चैक वर्षे(१५७६)विक्रमे निर्मिता कथा ।
सौभाग्यनन्दिसूरीन्द्रैर्हम्मीरपुरसंस्थिते ॥ १ ॥ इति ॥
संवत् गोनिधिकाश्यपीसुसीम(शशि)भृत्संख्यायुते वत्सरे
श्रीमन्मार्गसितेतरे शुभतिथौ षष्ठीगुरौ वासरे ॥
संक्षेपं तनुधा(धात्) सुराजनगरे चाभाषणैकादशी-
पर्वस्तु धिया ढवार्थमलिखित् सौभाग्यचंद्रो मुनिः ॥ १ ॥

इति श्रीमौनएकादशीकथा संपूर्णन्(र्णा) सुप्रसादं विधायेयं सो(शो)धनीया विचक्षणे(णैः) श्रीपं०श्रीनेमविजयगणीनां सी(शि)ष्यपं०श्रीन्या(ज्ञा)नविजयगणीलषी(लिखि)तं पाटणमध्ये संवत् १८२२ वर्षे ।

[2326] आदिः— ऐं नमः ॥ श्रीमहिमाप्रभसूरिभ्यो नमः ॥
नत्वा पार्श्वजिनेशाय श्रीभावप्रभसूरिणा ।
सत्फाल्गुनचतुर्मासव्याख्यानं क्रियते स्फुटम् ॥ १ ॥

अन्तः— इति गुरुप्रशस्तिमाह—
अणहिल्लाभिधे रम्ये पत्तने पुण्यतास्पदे ।
ढंढेरपाटके हृद्ये भिष्पापवसतौ स्थिताः ॥ १ ॥
सत्पक्षे पूर्णिमापक्षे गच्छे गौरवसंश्रिताः ।
वादीशाः समजायन्त श्रीविद्याप्रभसूरयः ॥ २ ॥
तत्पट्टभूषणं श्रीमल्ललितप्रभसूरयः ।
ललितं वचनं येषां पीत्वा को न मुदं दधौ ॥ ३ ॥
तत्पट्टतोयआदित्यो विनयप्रभसूरिराट् ।
विनेतुं जन्तुकर्माणि देशनायोद्यतोऽभवत् ॥ ४ ॥
तत्पट्टमण्डनं श्रीमन्महिमाप्रभसूरयः ।
जज्ञिरे महिमा येषामद्भुतः केन वर्ण्यते ? ॥ ५ ॥
तत्पट्टभृद् यथाबुद्धि श्रीभावप्रभसूरिराट् ।
कृतवानिदमाख्यानं श्रोतॄणामिष्टसिद्धये ॥ ६ ॥
द्वयष्टाश्व-भूमिते(१७८२) वर्षे ज्येष्ठाद्यशुक्लपक्षके ।
पंचम्यां भूमिभूवारे पूर्णतामिदमाप्तवान् ॥ ७ ॥

इति श्रीफाल्गुनचतुर्मासकव्याख्यानं संपूर्णम् ।

[2329] अन्तः— वर्षेक-कर-हस्त्यब्जसंख्ये (१८२१) श्रीजेसलाद् गिरौ ।
श्रीमत्खरतरेशाश्च श्रीजिनाद्विजयाभिधा ॥ १ ॥
तच्छिष्याः पाठकाः ख्याताः रंगशीला मया कृताः ।
तच्छिष्यअमीमराजेन व्याख्येयं भव्यहेतवे ॥ २ ॥

इति चैत्रीपूर्ण(र्णि)माव्याख्यानं समाप्तम् ॥
श्रीजेसलमेरमधे(ध्ये) लिखता ॥

[2330] आदिः— श्रीसिद्धचक्राय नमः ॥
शांतीशं शांतिकर्तारं नत्वा स्मृत्वा च मानसे ।
अष्टाहिकाया व्याख्यानं लिख्यते गद्यबन्धत[ः] ॥ १ ॥

अन्तः— संवद्व्योम-रसाष्ट-राम्निप्रमिते (१८६०) मासे शुचौ शोभने
पक्षे प्रोज्ज्वलतायुते सुविदिते सम्यग् द्वितीयातिथौ ।
पूज्यश्रीजिनहर्षसूरिगणभृद्राज्ये मुदाष्टाहिका-
व्याख्यानं सुगमं हितं सुविहितं श्रीजेसलाख्ये पुरे ॥ २ ॥
श्रीमन्तो गुणशालिनः समभवन् प्रीत्यादिमां(मत्)सागरा-
स्तच्छिष्यामृतधर्मवाचकवरा आसन् स्वधर्मादराः ।
तच्छिष्यैर्जिनराजराजिचरणांभोजप्रसक्तैः क्षमा-
कल्याणाभिधपाठकैः सुमनसां श्रद्धावतां प्रीतये ॥ २ ॥ युग्मम् ॥
मुनेरुदयरंगस्याग्रहाद् व्याख्यानमादरात् ।
इदं व्यधायि प्राचीनं पद्यबन्धं विलोक्य तत् ॥ ३ ॥
इति श्रीपर्युषणाद्यष्टाहिकाव्याख्यानम् ।

[2331] अन्तः— संवत् १९४० मीति कातिसुदि १० दिने लखि हीराचन्द जावरावाला श्रीसवाईजयपुरमध्ये महाराजजीश्रीमुक्तसूरजजी श्रीजीसाहेब खरतरगच्छका राजा ज्याके उपासरामें लीष्यौ । उपासरो सांगानेरी दरवाजे कुन्दीगराका मोहला मेरुजीकी पासमें ॥

[2332] आदिः— श्रीआसन्नोपकारकश्रीवीरपरमेश्वराय नमः ॥
काव्यम्— देवाः स्युर्वशमापतन्ति निधयश्चाष्टौ महासिद्धयो
गेहस्थाः सुरधेनुशाखिमणयो यस्य प्रभावान्नृणाम् ।
शिष्टा[भी]ष्टफलप्रदाननिपुणः श्रीवीतरागोदितो
भो भव्याः! भवपारदः प्रतिदिनं धर्मः समाराध्यताम् ॥ १ ॥
जयसिरि वंछिय सुहए अनिट्ठहरणे तिवग्गसारम्मि ।
आलोगपरहिअत्थे सम्मं धम्मंमि उज्जमह ॥ २ ॥
त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य ।
तत्रापि धर्मं प्रवरं वदन्ति न तं विना यद्भवतोर्थ-कामौ ॥ ३ ॥
अथ प्राणिनां प्रतिदिवसकृत्यमाह—

अन्तः— एकदा स्वप्रधानादिभ्यो श्रीहीरसूरेः वर्णनं श्रुत्वा श्रीअकब्बरेण स्वनामांकितफुरमानं प्रेषितं बहुमानेन । गांधारतः संवत् १६३९ ज्येष्ठबहुलत्रयोदशीदिने तत्र संप्राप्ताः । श्रीसाहिना समं मिलिताः । साहिना सादरं पृष्टः सूरी(रिः) । तथा धर्मोपदेशो ददे यथा —

आगरां गतोऽजमेरपुरं यावदध्वनि प्रतिकोसं कूपिकोपेतमनारान् विधाय स्वकीयाऽखिलखेटकलाकुस(श)लताप्रकटनकृते प्रति मनारं शतसो(शो) हरिण-विषाणाद्यारोपणविधानादिना प्राग् हिंसाकरणरतिरपि स भूपः दयामति(तिः) संजातः। ततः श्रीसाहिरवदत् यत् श्रीमन्तो मया दर्शनोत्कंठितेन दूरदेशादाकारिताः। अस्मदि(दी)यं च न किमपि गृह्यते। तेनाऽस्मत्सकाशात् श्रीमद्भिरुची(चि)तं याच्यम्।

ततः विचार्य श्रीगुरुभिस्तदीयाऽखिलदेशेषु पर्युषणापर्वसत्काष्टाह्निकाया-ममारिप्रवर्त्तनं बन्दिजनमोचनं(नम)याचि। तद्गुणचमत्कृतमनसा श्रीसाहिना अस्मदीयान्यपि चत्वारि दीनानि समधिकानि भवतु इति कथयी(यि)त्वा स्ववशीकृतदेशेषु श्रावणबहुलदशमीतः प्रारभ्य भाद्रपदशुक्लषष्ठी यावदमारिप्रव-र्त्तनाय द्वादशदिनामारी(रि)सत्कानि कांचनरचनांचितानि स्वनामांकितानि षट्-फूरमानानि त्वरितमेव श्रीगुरूणां समर्पितानि। प्रथमं श्रीगुर्जरदेशीयम्। द्वितीयं मालवदेशसत्कम्। तृतीयं अजमेरदेशीयम्। चतुर्थं दिल्ली-फतेपुरसत्कम्। पञ्चमं लाहोर-मुलतानदेशसत्कम्। श्रीगुरुपार्श्वे रक्षणाय। षष्ठं देस(श)पंचक-सम्बधि साधारणं चेति। तेन तत्तद्देशेष्वमारिपट्ट(ट)हो विस्तृतः। तथा श्रीगुरूणां पार्श्वादुत्थाय तदेवानेकगव्यूतमिते डाबरनाम्नि महासरसि गत्वा साधुसमक्षं स्वहस्तेन नानाजाति(ती)यानां देशांतरीयजनप्राभृति(ती)कृतानां पक्षिणां मोचनं चक्रे। तथा कारागारस्थबहुजनानां बन्धनभंजनमप्यकारि।

ततः श्रीगुरुणा साहिप्रार्थनया वाचकश्रीशांतिचन्द्रा महादक्षाः तत्र धर्म्मश्र(श्रा)वणार्थं निहिताः। तैः स्वोपज्ञकृपारसकोशाख्यशास्त्रजलेन सित्का(क्ता) सती त्रधिपति(वृद्धिमती) कृपालुता श्रीसाहिहृदये बभूव। तदभिज्ञानं च। श्रीमत्साहिजन्मसम्बन्धी मासः श्रीपर्युषणापर्वसत्कानि द्वादशदिनानि सर्वेपि रविवाराः, सर्वसंक्रातितिथयः, नवरोजसत्को मासः, सर्वे ईदिवासराः, सर्वे मेहरवासराः। सोफीआनवासराश्चेति षण्मासिकामारिप्रवर्त्तनसत्कफुरमानम्। जीजीआकरमोचनफुरमानानि च श्रीसाहिपार्श्वात् समानीय समर्पितानि श्रीगुरूणां दौल्याम्। अकबरपातसाहेन श्रीहीरगुरुं विज्ञाप्य शांतिचन्द्रोपाध्यायाः धर्मतत्त्वपृच्छार्थं वन्दनार्थं रक्षिताः। प्रत्यहं तं वाचकमुख्यं भजते।

एकदा श्रीसाहिपुरः आमलप्रमाणद्वयमुक्ताफले केनचिदिभ्येन प्राभृति-(ती)कृते तं सन्मान्य ततः स्वकोशाध्यक्षं १, चामरधारकं १२, हजारिमन-सुबबिभ्रतं च तं प्रति ते फले स्थापनाय प्रदत्ते। सोपि स्वगृहे गतः स्वभार्यायै दत्तवान्। सापि स्नानार्थं समुत्सुका स्ववस्त्रे बध्वा स्नानं चकार। तो सरु-चिना इति सा शिक्षिता। इमें मुक्ताफले पातसाहसत्के स्ति(स्तः), त्वया सम्यग् रक्षीं(क्ष)णीये। ततः सा स्वेष्टस्थले मुमोच। कतिपयवासरेषु विगतेषु सा तु मृता।

अथ कतिचिद्दिनेषु व्यतीतेषु साहिना ते मार्गिते। स प्राह-साहिब! मद्गृहे गत्वा शीघ्रं समानयामि। ततः स गृहे गत्वा सर्वत्र विलोकिते।

अप्राप्य महच्चिन्तामग्नोऽभूत् । अहो! मया तद्दिने ओरतं प्रति दत्ते, सा तु मृताऽधुना किं करिष्येहम् । तदनु व्याघुटय आयाति नृपपार्श्वे तदा मार्गे पुण्योदयात् शांतिचन्द्राः वाचकवराः मिलिताः । तैः चिंतास्वरूपं पृष्टम् । तेनातिनम्रतया यथाजातं विज्ञप्तम् । तदा ते प्राहुः–त्वं गृहे गच्छ, पूर्ववत् यत्र स्थले दत्ते तत्रैव मार्गणीयम् । सोपि तत्र गतः । तथैव स्नानोद्यतां तां वीक्ष्य ते मार्गिते । तयापि स्ववस्त्रांचलग्रन्थीः संछोटय दत्ते ।

सोपि प्राप्ताश्चर्यः साहिपार्श्वे समेतः । तत्पुरः ते संस्थाप्य चामरव्यग्रनोद्यतोऽभूत् । परं तदाश्चर्ये मग्नः विचारांदोलितचेताः पुनः पुनः स्तिमितदेहोऽभवत् । तदा साहिना पृष्टः किमद्य वितर्क करोषि ? भूत-सदृशो भवसि ? स प्राह— स्वामिन् ! एकं महादाश्चर्यमस्ति । तदनु साग्रहं नृपेण पृष्टः सर्वं व्यतिकरं स्माह । तदा साहिनोक्तं किमत्राश्चर्यं स तु अद्वितीयः खुदासदृशोस्ति ।

अथ प्रभाते साहिकचेरीमध्ये धर्म्मश्रवणार्थं वाचकमुख्यः सुवर्णपादपीठोपरि सभा[मा]गत्य स्थितः । तदा अन्तःपुरतो सुरत्राणो नि[ः]सृतः, तं प्रणम्य स्थितः । ततो व्यजिज्ञपत्–हे पूज्य! किमप्याश्चर्यमस्माकं दर्शय । सोप्याह— कल्ये गुलाबपुष्पवाटिकायां त्वया स्थातव्यम् । तत्राहं दर्शयिष्ये । ततः प्रत्यूषे भूपः तत्र गतः । वाचकेन्द्रोपि तत्रागात् । द्वौ परस्परं वार्त्ता विज्ञतः (कुर्वन्तौ) तावत् पातसाहिनोबतगर्जारवो श्रुतः । सहसा श्रुत्वा चकितः । स्वसेवकान् प्राह— अस्मादाज्ञां विना कस्यापि नोबतरवो १२ द्वादशगव्यूतमध्ये न जायते । किमिदं श्रूयते ? पश्यत यूयम् । ततस्ते विलोक्य नृपं प्राहुः–साहिः युष्मत्पिता हुमाउ ससैन्य[ः] त्वां मिलनाय समेति । इति कथनानन्तरमेव हुमाउ एत्य पुत्रमालिंग्य स्थितः । सर्वेषामकबरसैनिकानां मेवा–मिठाइभृतरजतरकाबान् ददौ । नृपं प्रति महत् सन्मानं दत्त्वा यथागतस्तथा ययौ । क्षणेनादृशोऽभूत् । तत् अकब्बरः वाचकेन सह तथैव वार्त्ता कुर्वन् स्वात्मानं दृष्टवान् । साश्चर्यं दध्यौ च नेदमिन्द्रजालम् । अस्मदादि(दी)नां समर्पितवस्तूनि प्रत्यक्षं दृश्य-(श्यं)ते । अतः नूनं इदं चेष्टितं गुरूणा विनिर्मितं ज्ञायते । ततः गुरवे नत्वा स्तुतिं चकार ।

अथैकदा नृपः अटकदेसेस(शेश)जयनार्थं ३२ कोसमितप्रयाणमकरोत् । तदा हाजरी सुरत्राणेन गृहिता । तन्मध्ये वाचकस्यापि नाम श्रुत्वा दध्यौ– अहो ! वाहनोपानहादिविमुक्ताः अमी महद्दुःरकं(दुःखं) प्राप्ता भविष्यन्ति । ततः स्वसेवकान् स प्राह— तान् गुरून् अत्रानय । सेवका गुरून् स्माहुः । स्वामिन्! त्वां भूपः स्मारयति । अत्र मुनीन्द्राऽवस्था ईदृशी जातास्ति सो(शो)फयुक्तपदाभ्यां पदमात्रमप्यग्रे चलनाक्षमः टोप्परकस्थितप्रासुकजलेन वस्त्रांचलमार्द्रीकृत्य स्वोरसि स्थापितो(तम)स्ति । द्वौ शिष्यौ वैयावृत्यं कुरुतः । ततः सेवकैः एतत् स्वरूपं सर्वं नृपाय निवेदितम् । तदा भूपेन सुखपालं मुमोच । तदनु साधुमुख्यः एकां काष्ठावलीकामानाय्य तदुपरि आरुरोह । स्वशिष्यौ तत्प्रान्तौ

समुत्पाद्य चलितौ । साहिना तथावस्थं समागच्छन्तं वि(वी)क्ष्य दध्यौ । अहो ! गुरुवचनरसिकाः धन्या इमे ये मदनुयायिनः प्रवर्तन्ते । अन्यथा मत्समीपे क एषां लाभोस्ति । मदीयं वस्त्रं पात्रं तृणमपि कदाचित् न गृहीतम् । अहो ! अस्य समर्थस्य निरीहता ॥

तदनु स नृपः अभिमुखमेत्य कदमबोसीं चकार । आह च— स्वामिन् ! मत्कृते महद् दुःखं प्राप्नोषि । मद्गुनो सहनीयः । अद्य मया युष्मच्चरणौ न विलोकितौ । तस्मात् एतावती तस्ती दत्ता । अतः परं महत् प्रयाणं युष्माभिः न कार्यं, शनैः शनैः पश्चात् समागन्तव्यम् । ततः साहिः क्रमेण अटकदेशाधिपपुरं परिवेष्ट्यावस्थितः । द्वादशवर्षाणि जातानि, परं तद्वप्रः न स्वाधि(धी)नोऽभूत् ।

एकदा भूपं मलाणीया इति प्राह— जीवे आंपनां पातस्याहूकी जादीउं छती घडी घडीकी बला दूर साहिब हरे । राज ए शांतिचन्द्र सेवराकुं बार बार तुम सलाम कदमपोसी करते हो । दीनदूनीके पातस्याह अदबी खुदा होकर, उस बास्ते ए गढ लीया नही जाता । इति श्रुत्वा नृपः मौनमाधाय स्थितः । तत्स्वरूपं गुरु(र)वे ज्ञापितम् ।

गुरुः प्राह— यद्दिने वप्रग्रहणेच्छा तव स्यात् तद्दिने गृह्यते । लेशमात्रापि त्वया चिंता नैव कार्या, परं तव सैन्यं अत्रैव रक्षणीयम् । आवां द्वावेव व्रजावः परं तव सैनिकानां इत्थं विज्ञाप्यं पुरमध्ये कस्यापि हिंसा नैव कार्या । त्वया बालगोपालादयो न वध्याः इति शिक्षां दत्त्वा प्रभाते एकाकिनौ द्वावेव निस्सृतौ । तत्पृष्ठे सर्वं सैन्यं निःसृतम् ।

तदा मलाणीया इति जजल्पु(ल्प)–ए सेवराके पातसाह फिरके संगे लगा । ए सेवरा पातसाहकी पातसाइ डबो देगा । दुसमनके हाथे अकब्बरकुं देवेगा । इत्याद्यनेकजल्पनानि शृण्वन् सन् भूपः गुरुणा सह तद्वप्रसमीपे गतः । तदा गुरुः एकया फुंकमात्रया सर्ववप्रखातिका पूरिता । द्वितीयया फुंक्या च शत्रुसैन्यं ची(चि)त्रलिखितमिव संभूतम्, तृति(ती)यया फुंक्या च गोपुराण(णि) धाणिकानीव स्फुटितानि ।

ततः स्वहस्तेन भूपं संगृह्य स्वयमेव सोत्साहं साश्चर्यं तत्र स्थितः, भूपः गुरुं स्माह–हे पूज्य! मम किंचित् कार्यं सानुग्रहं कृत्वा समादिश । तदा गुरुः जीजीयाकरमोचनं प्रतिवर्षं चतुर्दशकोटिद्रव्यप्रदं याचितम् । चटकजिह्वाभक्षणं त्वया न कार्यं इत्यादि धर्मार्थम् याचितम् ।

ततः तेषां मलाणीयानाकार्य इत्युक्तम्— अब बेफिकर तुम हूए, ए सेवरा अदबी खुदा इनकी बेअदबी मत करना । देखो एके साहें राह उपर चलना । अदनाकु मेरी पातस्याइ देवे तो में क्या करुं । वास्ते सब इनकुं कदमबोसी करो । केसा ए बेनमा फकीर साहिबके राह पर चलता हैं । एती करामतका धणी हे तो बि किसीकुं इजा नहि देता । एता काम

मेरे खातर गुरुके हूकम पर कीया है । इति कथनपश्चात् स्वसैन्ययुत-द्दील्यां समागतः । प्राभृतीकृतानि फुरमानानि श्रीगुरूणां वाचकेन्द्रेणेति ।

एवंविधेन श्रीपर्युषणापर्व समाराधनि(नी)यम्— पर्युषणपर्वसु अमारि-पटह उद्घोषणीयः । पूर्वोक्तवत् साधार्मिकवात्सल्यं विद्वयं(धेयम्) । जिणगिहिए हवण १। जिणधणवुड्ढी २। साहम्मीअभत्ती ३। गुरुपूआ ४। सुअपूआ ५। दीणुद्धरणं ६। पाणीरक्खणं ७। धम्मजागरिआ ८। सुपत्तदाणं ९। तह तित्थपभावणा १०। सोही ११। दुगआवस्सयकरणं १२। णियमधारणं १३ —इत्यादिकृत्यैः वार्षिकपर्वं समाराधनी-यम् । श्रीतपागच्छनभे(भसि) नभोमणिशाली लघुः यः सूरी(रिः) सो मम मोददः । तत्पट्टभानूदयसोमसूरिणा वह्न्यंक-हस्ति-शशिवर्षे(१७९३)स्वकृतम् ॥ १ ॥

इति श्रीपर्युषणपर्व समाप्तम् ।

संवत् १९५४ मीती काती सुद ११ लीषतं कल्ला रामनाथपुष्करणा-ज्ञाती । पादरामध्ये लीखी ।

[2333] आदिः— ॐ नमः । ऐं नमः । श्रीमहिमाप्रभसूरीश्वरगुरुभ्यो नमः ।

नत्वा गुरुं गिरं चापि श्रीभावप्रभसूरिणा ।
अष्टाह्निकाधुराख्यानं भविबोधाय तायते ॥ १ ॥

अन्तः— श्रीपर्युषणापर्वाराधनेन परमपदसुखं स्वाधीनं कुरुत । शाश्वतसुखदानदक्षश्री-जिनशासनप्रभावात् ।

अणहिल्लाभिधे रम्ये पत्तने धनिपूरिते ।
चैत्यादिहर्म्यसंयुक्ते ढंढेरसंज्ञपाटके ॥ १ ॥

पौर्णिमीयाभिधे गच्छे स्वच्छाच्छगुणान्विते ।
विनयप्रभपट्टाब्जेऽभवन् सूर्यसमाः क्रमात् ॥ २ ॥

लेखितानेकचित्कोशा आचार्यगुणसंयुताः ।
सद्विद्याचञ्चवः श्रीमन्महिमाप्रभसूरयः ॥ ३ ॥

तेषां पट्टभृतेदं हि श्रीभावप्रभसूरिणा ।
अष्टाह्निकाधुराख्यानं कृतं स्तात् पुण्यवृद्धये ॥ ४ ॥

इति श्रीअष्टाह्निकाधुराख्यानं श्रीभावप्रभसूरिकृतं संपूर्णम् । मन्दबुद्धि-शिष्याणां वाचनाकृते श्रीरस्तु ।

(अन्यदीयहस्तेनोल्लेखितम्-)

चन्द्राष्ट-घोटक-क्षोणि(१७८१)प्रमिते वत्सरे वरे ।
नभोमासि सिते पक्षे तिथौ सौम्येस्य पूर्णता ॥ १ ॥

[2338] आदिः— श्रीसरस्वत्यै नमः ॥

स्वस्ति श्रीदायिकां सद्यः कार्यप्रत्यूहवारिणीम् ।
दधामि मानसे नित्यं श्रीविद्यां षोडशाक्षरीम् ॥ १ ॥

शत्रुंजये जिनं वन्दे नाम्ना भुवनदीपकम् ।
भूरिभाग्यभरप्राप्यं वैरस्वामिप्रतिष्ठितम् ॥ २ ॥

सुधाकुंडे महातीर्थे जीवितस्वामिसत्तमः ।
शांतिनाथो जगन्नाथः स्मर्त्तव्यः शांतिसिद्धये ॥ ३ ॥

उज्जयंतनगे शृंगे श्रीकांचनबलानके ।
काममूर्त्तिः सुधांभोधिर्नेमिनाथो जिनेश्वरः ॥ ४ ॥

श्रीफलाद्ध(लव)र्द्धिकायां तु विश्वकल्पलताभिधः ।
श्रीपार्श्वो वांछितं देयात् सहस्रफणिपूजितः ॥ ५ ॥

मोढेरे वायडग्रामे खेडे मुंडस्थलेऽपि च ।
उपकेशपुरे वीरं वन्दे श्रीमालपत्तने ॥ ६ ॥

स्मृत्वा सुधर्म्म-जंबू-प्रभवादिक-वज्ज(ज्र)सेनगणनाथान् ।
श्रीचंद्र-मानतुङ्गान् श्रीमच्छ्रीमानदेवांश्च ॥ ७ ॥

प्रद्योतनसूरी[न्]द्रान् [उ]द्द्योतन-वर्द्धमान-जिनचन्द्रान् ।
जिनदत्त-कुशलसूरीन् युगप्रधानांश्च जिनच[न्]द्रान् ॥ ८ ॥

तच्छिष्यमुख्यदक्षान् लक्षगुणान् सकलचन्द्रगणिचन्द्रान् ।
सांप्रतमेव विजयिनः तच्छिष्यान् शिष्यभाग्यानि ॥ ९ ॥

मषभूम-सेष-काजी-नाहड-लङ्गाह-यवनराजेभ्यः ।
दातृन् गोरक्षायाः राज्ञामादेयवाक्यानि ॥ १० ॥

वचनकला-काव्यकला-रूपकला-भाग्यरंजनकलानाम् ।
निस्सीमावधिभूपान् सदुपाध्याय(या)न् श्रुताध्यायान् ॥ ११ ॥

श्रीसमयसुन्दराख्यान् तच्छिष्यो हर्षनन्दनो वादी ।
मध्याह्नव्याख्याने सुपद्धतिं यत्नतः कुरुते ॥ १२ ॥ षड्भिरादिकुलकम् ॥

अन्तः— एवंकृते तेनापि सकलकर्मक्षयतः शुक्लध्यानेन द्रव्यचारित्रगमनाद् भावचारित्री-भूय सिद्धि[ः] प्राप्ता लोभार्थिः[? र्थी] अपि चारित्रपालनेन प्रान्ते निष्ठितार्थो जातः । एवं धारणमुनिनामस्मरणादानन्दमाला भवतु इति श्रीऋषिपंचाशिकावृत्तौ । इति श्रीबृहत्खरतरगच्छाधीश्वर-युगप्रधानश्रीजिनचन्द्रसूरि-शिष्यमुख्य-पंडितसकलचन्द्रगणि-शिष्यमुख्यश्रीसमयसुन्दरोपाध्याय-शिष्यमुख्य-वादिवाचनाचार्यहर्षनन्दनगणिविरचितायां मध्या[ह्]नव्याख्यानपद्धतौ अधिकमासव्याख्यानषट्कं संपूर्णं तत् समाप्तौ च समाप्तोयं ग्रन्थः ॥

श्रीसिद्धार्थवसुन्धरेशतनयस्याद्यादिमः शासने
संताने तु सुधर्म्मणो गणभृतोऽवच्छिन्नपर्यक्रमे ।
श्रीमत्कोटिकसूरितः परिवृते श्रीकोटिकाख्ये गणे
श्रीवज्रा[ज्ञा]ख्यमुनीश्वरप्रविवरच्छाखाविशेषे वरे ॥ १ ॥

कुले चंद्रसंज्ञे गुरोश्चन्द्रसूरेः यशोभद्रतोरण्यवासे विशिष्टे ।
इहरेभद्रसूरिः क्रमात् पट्टधारी गुरुदेवनामाभवद् ब्रह्मचारी ॥ २ ॥

वसतिमार्गविकासनकारकः खरतरापरनामकधारकः ।
विमलमंत्रिनिषेवितपक्षजो धरणशक्रकृताद्भुतदैवतः ॥ ३ ॥

श्रीवर्द्धमानोपि जिनेश्वरश्च सूरीश्वर[:] सोऽभयदेवसूरिः ।
युगप्रधानो जिनदत्तसूरिः श्रीराजगच्छे जिनचन्द्रसूरिः ॥ ४ ॥

श्रीभाणसोले जिनभद्रसूरिः भट्टारक[? कः] श्रीजिनहंससूरिः ।
अनुक्रमात् शुद्धपरंपरायां माणिक्यसूरिर्गुणरत्नभूमिः ॥ ५ ॥

तत्पट्टांबुजचंचरीककरणिः श्रीराहडीये कुले
भास्वद्भास्करपुङ्गवः शशकरो जाग्रत्कलाभिः कलौ ।
स्याद्वादाभिधनागलोकविबुधश्रेणिषु वाचस्पतिः
श्रीमच्छ्रीजिचन्द्रसूरिसुगुरुर्योगः(?यौ॑ग)प्रधानः क्षितौ ॥ ६ ॥

येषां हस्तप्रभावातिशयमभिदधुर्मन्त्रिकर्मादिचन्द्राः
श्रीमत्साहीशसाहेरकबरनृपतेः प्राप्तसभ्यप्रतिष्ठाः ।
स्थाने स्थाने प्रकृष्टा नरपतिविदिताः श्रावका ऋद्धिमन्तः
संघाध्यक्षा विपक्षप्रतिभयजनकाः लक्षसंख्या विशेषात् ॥ ७ ॥

येषां वासविशेषमंत्रमहिमां संदर्शयांचक्रिरे
जोगी-संघप-सोमजीप्रभृतयः प्राग्वाटवंशोद्भवाः ।
गच्छोऽतुच्छतरो गणेषु सकलेष्वेकप्रतिष्ठास्पदं
शिष्याः सर्वविशिष्टशास्त्रविबुधाः शिष्यप्रशिष्यान्विताः ॥ ८ ॥

येषां दर्शनमात्रविस्मितमनाः ढिल्लीभवः साहिराट्
जीवामारिमनेकदेशनगरानार्घ्यार्घ्यकेषु व्यधात् ।
येभ्यस्तीर्थकरस्तदीयनृपतेः कोशं परित्यक्तवान्
येभ्यः साधुजनाः तुरुष्कनृपतेर्देशे विहारं व्यधुः ॥ ९ ॥

संप्रापुः स्वर्गलोकं कृतसुकृतधनाः कृम्नबेन्नातटेऽस्मिन्
तेषां पट्टे पटिष्ठाः युगवरपदवीप्राप्तपूर्वाः[———] ।
प्रत्यक्षं विद्यमानाः गुरुगुणकलिता जैनसिंहा यतीन्द्राः
तेषां राज्ये सुराज्यप्रतिमगुणिजने दीप्तिम [च्छा]द्वर्गे ॥ १० ॥

त्रिभिर्विशेषकम् ।

जिनचन्द्रसूरियुगवरराजानां शिष्यमुख्यगणनायाम् ।
गणिसकलचन्द्रविबुधाः सद्गुरुभक्ताः सदा आसन् ॥ ११ ॥

तेषां शिष्या मुख्याः वचनकला–कविकलासु निष्णाताः ।
तर्क–व्याकृति–साहित्य–ज्योतिः–समयतत्त्वविदः ॥ १२ ॥

प्रज्ञाप्रकर्षः प्राग्वाटे इति सत्यं व्यधायि यैः ।
येषां हस्तात् सिद्धिः संताने शिष्यशिष्यादौ ॥ १३ ॥

अष्टौ लक्षानर्थानेकपदे प्राप्य ये तु निर्ग्रन्थाः ।
संसारसकलसुभगाः विशेषतः सर्वराजानाम् ॥ १४ ॥

तेषां शिष्यो मुख्यो वादी हर्षनन्दनो नाम्ना ।
मध्याह्नव्याख्याने सुपद्धतिं यत्नतश्चक्रे ॥ १५ ॥

गाथालापकसूत्राणि कथा व्याख्याश्च पण्डितैः ।
शोध्यानि हितनिष्णातैः त्यक्त्वा मात्सर्यमुल्बणम् ॥ १६ ॥

त्रिक-सप्त-षडेकाब्दे(१६७३) अक्षततृतीयादिने ।
ग्रन्थोयं पूर्णतां प्राप्तः श्रीअणहिल्लपुरपत्तने ॥ १७ ॥

ग्रन्थेस्मिन् ग्रन्थाग्रं षट्साहस्त्रीत्वेककेन संयुक्ता ।
सदनुष्टुभां समस्तं शस्ते व्याख्यानविख्याते ॥ १९ ॥

अंकतोपि ग्रन्थाग्रं० ६००० ॥

अथ प्रशस्तिः—

नानाधर्मरतैर्विवेकविशदैर्भव्यांगिभिस्संकुलं
श्रीप्रल्हादनपार्श्वनाथविमलागारेण संशोभितम् ।
अस्ति स्वर्गविजित्वरं पुरवरं प्रल्हादनं पावनं
मन्ये चास्य हि लज्जया सुरपुरं नायाति दृग्गोचरम् ॥ १ ॥

विशालेस्ति पुरे तस्मिन्नोशवंशोतिविश्रुतः ।
तस्मिन् वंशे पुरा ह्यासीत् पारेखान्वयभूषणः ॥ २ ॥

रामचन्द्रो धनी धर्मी कार्याकार्यविवेकभृत् ।
तत्सुतो दुलछाचन्द्रो गुणज्ञोस्ति विशारदः ॥ ३ ॥

तस्याभूद् भगिनी नाम्ना पार्वती धर्मकर्मठा ।
ग्रन्थोयं लेखयांचक्रे तद्भ्रात्रा तच्छिवाय च ॥ ४ ॥

स्वगच्छे हत्तपोगच्छे विजयानन्दसूरयः ।
प्रसिद्धा भुवनेभूवन् शिष्यौघसेवितक्रमाः ॥ ५ ॥

तेषां पट्टे किलेदानीं वर्तन्ते गच्छनायकाः ।
विजयकमलाचार्याः शीलालंकृतविग्रहाः ॥ ६ ॥

द्वि–रसांक–भूमितेब्दे(१९६२) श्रावणमासे सिते दले रम्ये ।
भूपसिंहोराजहम्मदखानेत्याख्यस्य शुभराज्ये ॥ ७ ॥

विजयानन्दसूरीणां विनयिविनेयस्य नित्यपठनकृते ।
ग्रन्थोयं तेन मुदा समर्पितः कांतिविजयस्य ॥ ८ ॥

इति प्रशस्तिः ॥ ग्रन्था० ६००० ॥

[2362] अन्तः — संवत् १६५४ वर्षे आषाढसितत्रयोदशीदिने शुक्रवासरे अद्येह श्रीपत्तनवास्तव्यश्रीश्रीमालीज्ञातीयसुश्रावकपुण्यप्रभावकसीवीरपालभार्यापुंजी–पुत्रसाह–रहीआ-पुत्रीवाल्ही-रहीयासहितेन इदं पुस्तकं लिखाप्य पूर्णिमापक्षे प्रधानशाखायां श्री ६ ललितप्रभसूरीणां प्रदत्तं वाच्यमानं चिरं जीयात् ॥

[2363] अन्तः — संवत् १९१५ कर्त्तिकमासे कृष्णपक्षे त्रयोदशी भृगुवासरे मुंबइबंदरे लिखितम् इति ग्रंथ समाप्तम् ॥

[2364] अन्तः— दक्षषदनन्देन्दुरब्दे(१९६२)माघवद्यः १३ लि० ऋ० व्यास मगदत्त । भावनगरमध्ये इदं पुस्तकं श्रीमद्विजयानंदसूरिनामधेयानां प्रशिष्यश्रीहंसविजयोपदेशाद् ज्ञानभं० ।

[2365] अन्तः— संवत् १६५७ वर्षे श्रावणमासे असितपक्षे श्रीमहेश्वराजपुरे सोमवासरे शोभननक्षत्रे कल्याणश्री विजयवेलायां पंडितलाजःपालेनापूर्ति लिलेख श्रीजिनकुशलसूरिप्रसादेन शुभं भवतु ॥

[2414] अन्तः— इति श्रीसम्यक्त्वोच्चारविधिर्विस्तरतः संपूर्णः ॥

संवत् १७९० मिते माघवदि त्रयोदश्यां बुधवारे पौर्णिमीयपक्षप्रधानशाखायां ढुंढेरपाटके भ०श्रो०श्रीभावप्रभसूरिभिरिदं पुस्तकं लिखितम् ॥

[2415] अन्तः— इति श्रीसम्यक्त्वोच्चारविधिः संपूर्णः ॥

संवत् १६६६ वर्षे फागणवदि ३ दिने श्रीमत्बृहत्तपागछे पूज्यश्री-११. श्रीसौभाग्यरत्नसूरीस्व(श्व)रः तत्शिष्य उपाध्यायश्री ५ श्रीदेवसागर-तत्शिष्यपं०श्रीसौभाग्येन लिखितम् ॥

[2446] बा०आदिः— श्रीशंखेश्वरपार्श्वेशं प्रणताऽभीष्टदायकम् ।
प्रणमामि परप्रेम्णा सर्वाभीप्सितसिद्धये ॥ १ ॥

सर्वज्ञं सर्वभाषामि ... ... ।
सर्वसत्त्वहितं वंदे वर्द्धमानजिनेश्वरम् ॥ २ ॥

अध्यात्मकल्पद्रुमसंज्ञकस्य शास्त्रस्य संविग्नहितावहस्य ।
वार्त्ताभिरप्रौढमतिप्रतुष्ट्यै बालावबोधां विदधे विवृत्ति[म्] ॥ ३ ॥

हवे ग्रंथनि आदिः—

ग्रंथकार प्रथम स्थापनानुं सूत्र कहे छे- अथायमिति— अथानंतरं शांतनामा रसाधिराजः मया मुनिसू(?सुं)दरसूरिणा पद्यसंदर्भेण भाव्यते । पूर्वि श्रीमुनिसुंदरसुरीइं त्रिदशतरंगिणीगुर्वावलीग्रंथा किधा । तिवार पछि ए ग्रंथ किधो । ते भणी इहां अथ शब्द आंण्यो ते माटे अथ कहेतां एटला थकि अनंतर ए जे जैन शासननें विषें प्रत्यक्ष शांतनाम जे रसाधिराज रस जे श्रृंगार १। हास्य २। करुणा ३। रौद्र ४। वीर ५। भयानक ६। बीभत्स ७। अद्भुत ८। शांत ९॥ ए नव मध्ये अधिराज कहेतां पूर्वे मनमां धर्यो छे ते ॥ काव्यबंधे प्रकट करि कहिइं छे ॥

बा० अन्तः— ए श्रीअध्यात्मकल्पद्रुमनामा ग्रंथनुं बालावबोधार्थं उपाध्यायश्रीरत्नचंद्रगणिकृतया उपाध्यायश्री ... गणिकृत ए बे टिका जोइने मे माहरि बुद्धिने अनुसारे मुझ सरिषा स्वल्पबुद्धि प्रांणीना उपकारने अर्थे लेश मात्र लिख्यो छे ॥ ते मध्ये अनाभोगथी तथा अज्ञानथी तथा भ्रांतिथी जे कांइ सूत्रना टीकाना अनुसारथी ओछुं अधीकुं अयुक्त लिखाणुं हुइं तेहनु मिच्छामि दुक्कडं अथवा किहांइक सुगमपणाने काजे किहांइक रूढीथी जे कांइ विभक्ती वचन लिंग कारक अन्वय प्रमुखनो विपर्याय किधो हुइं ते अपराध बहुश्रुत गीतार्थे षमवुं तथा उपकार बूद्धे अशुद्ध टालिनइं शुद्ध करवुं ॥

अथ प्रशस्तिः—

त्रि(?श्री)मत्तपगणगगनांगणभाश(स)नतरू(?रु)णतरणिनिभः ।
श्रीराजविजयसुरी(?सूरि)र्बभु(?भू)व भूरी(रि?)विततयशाः ॥ १ ॥

योत्याक्षी(द्) विभवं घनं सुविहितानुष्ठानबद्धादरो
लोकं कोकमिव प्रबोधमनयद् गोभिश्च गोस्वामिवत् ।
छित्वा वादिदर्पमुज्ज्वलपटा(?)श्चक्रे विसे(शे)[षो]ज्ज्वलान्
यो वाचालितमालवेश्वरसितच्छत्रप्रभावोज्ज्वलः ॥ २ ॥

रत्नत्रयग्रथितसंयमभृत्तदीय-
पट्टेषु रत्नविजयाह्वयसु(?सू)रिरासि ?सी)त् ।
येन प्रशांतरसमाप्रशमार्णवेन
रत्नाकरायितमनल्पगुणौघरत्नैः ॥ ३ ॥

तस्यान्वये निखिलभु(?भू)तलगीतकि(?की)र्त्ति[:]
श्रीहीररत्न इति सु(?सू)रिवरो विरेजे ।

स्वर्गं गतोप्यखिलभक्तसमीहितानि ।
योद्यापि पु(?पू)रयति भव्य इवामरद्रुः ॥ ४ ॥

तत्पट्टभु(?भू)षणमणिर्जयरत्नसु(?सू)रिः
सर्वाग्रणीर्गुणिषु भु(?भू)रिगुणाश्रयोभुत(?भूत्) ।
श्रीभावरत्न इति भावविदां वरेण्य-
स्त्पट्टभृ[ज्]जयति संप्रति सु(?सू)रिराजः ॥ ५ ॥

श्रीहीररत्नसु(?सू)रेर्मुख्याः शिष्याः सुनिर्मलाभिख्याः ।
श्रीलब्धिरत्नविबुद्धाः(?बुधाः) शास्त्रार्णवपारदृश्वानः ॥ ६ ॥

श्रीसिद्धिरत्ननाम्ना पाठकवर्यास्तदन्वये तदनु ।
श्रीहर्षरत्नवाचकवरा वरोयोगुणैर्वन्याः ॥ ७ ॥

लक्ष्मीरत्नगणीशा आसन् दुर्वादिदनुजलक्ष्मीशाः ।
श्रीना(ज्ञा)नरत्नगणयस्तदाश्रयाः सांप्रतं जयन्तु चिरम् ॥ ८ ॥

तच्चरणकमलसेवाभृङ्गस्तत्संगसमयतरङ्गः ।
सुविही(?हि)तकल्याणविमलगणिवरविहितार्थनीलुन्न(?) ॥ ९ ॥

बालाव[बो]धवार्त्तामध्यात्मसुरद्रुमाख्यशास्त्रस्य ।
मुनिहंसरत्न एतामतमोत् तनुबुद्धिसत्त्वहिताम् ॥ १० ॥

शोध्यः सुतत्त्वविद्भिर्ग्रन्थोयं धीधनैः प्रवाच्यमानश्च ।
सद्भावसंपदाढ्यैरा चंद्रार्कं ची(?चि)रं जयतात् ॥ ११ ॥

इति श्रीअध्यात्मकल्पद्रुमबालावबोधः संपूर्णः ॥

संवत् १९२४ अषाढ सु०२ राजनगरे लीपीकृत लहो०भाग(र)-
दास दाडिगराम्नि पोलमध्ये ॥ श्री ॥

[2448] **आदिः—** श्रीपरमात्माने नमः ॥

ब्रूमः किमध्यात्ममहत्त्वमुच्चैर्यस्मात् परं स्वं च विभिद्य सम्यक् ।
समूलघातं विनिहत्य घातिं नामेयभूः केवलमाससाद ॥ १ ॥

अन्तः— श्रीहर्षवर्धनकृतं स्वपरोपकारि-
द्वात्रिंशिकावरचतुष्टयमिष्टबोधम् ।
तत्त्वार्थिनां रसदमस्तु लसद्विवेक-
ख्यातिस्खलद्बलचिदात्मपरा प्रतीतिः ॥ ३२ ॥

इत्यध्यात्मबिन्दौ सदुपाध्यायश्रीमद्धर्षवर्द्धनविरचिते शुद्धस्वरूपप्रकाशिका
चतुर्थी द्वात्रिंशिका समाप्ता ॥

संवत् १७७८ मा वर्षे ज्येष्ठमास विदि १२ बुधे पत्तनमध्ये मु०
वीरचन्द लपीकृतम् ।

[2456] अन्तः—

स्वस्ति श्रीशुभकार्यसिद्धिकरणश्रीपार्श्वनाथार्हति
चे(?चै)त्ये सद्विधिना विवेकनिकरैः संपूज्यमाने सदा ।
राज्ये राउल-भीमनामनृपतेः कल्याणमल्लस्य च
वर्षे विक्रमतस्तु षोडशशते एकोनसत्सप्ततेः(१६६९) ॥ १ ॥

श्रीबृहत्खरतरगच्छे श्रीमज्जिनभद्रसूरिसंताने ।
जिनमाणिक्ययतीश्वरपट्टालंकारदिनकरे ॥ २ ॥

जाग्रद्भाग्यजये प्रबुद्धयवनाधीशप्रदत्ताभये
साक्षात्पंचनदीप्रसाधनविधौ संप्राप्तलोकस्मये ।
यावज्जैनपुतीर्थदंडकरयोः संमोचनाख्यालये
गोरक्षाजलजीवतारणविधिप्राप्तप्रतिष्ठाश्रये ॥ ३ ॥

देशाकर्षणसाधुदुःखदलनात् कारुण्यपुण्याशये
तत्सद्रूपविलोकरंजितमनःश्रीनूरदीरंजनात् ।
श्रीमच्छ्रीजिनचन्द्रसूरिसुगुरौ योगप्रधाने चिरं
राज्यं कुर्वति जैनसिंह(सूरि)सुगुरोः(?रौ) सद्यौवराज्ये किल ॥४॥

कोट्टे जेसलमेरे उपकेशज्ञातिमंडनं जातः ।
भणसालीकगोत्रीयः आसासाहः सदोत्साहः ॥ ५ ॥

तत्पुत्रो वस्ताख्यः तत्तनयः पुंजराज इति नामा ।
तत्पुत्रो जगधवलः तत्पु(?सू)नुः पुनसीसाहः ॥ ६ ॥

तत्कुलदीपप्रतिमः श्रीमल्लस्तस्य पुत्रवररत्नम् ।
चांपलदेवीकुक्षिस्वर्णाचलकल्पवृक्षो यः ॥ ७ ॥

भुवि जन्तुजातरक्षास्मारितसुकुमारपालभूपालः ।
जिनवरगुरुपरमाज्ञातिलकितभालो विशालगुणः ॥ ८ ॥

धर्मस्थानव्ययितद्रविणः प्रगुणः प्रधानशीलेन ।
जीर्णोद्धारधुरीणः दीनानाथादिदुःखहरः ॥ ९ ॥

स्वालयदेवगृहेषु भवाधिपस्थापनामहे सम्यक् ।
प्रत्येकश्राद्धानां पददेयी राजती मुद्राम् ॥ १० ॥

मिष्टान्नभोजनेन रंकान् संतोष्य पर्वनिष्ठासु ।
अष्टाह्निकासु सुसुमैः वर्णाढ्यैः पूजयांचक्रे ॥ ११ ॥

सार्द्धसहस्रचतुष्टयप्रमिताः प्रतिमाश्च सप्तचैत्येषु ।
द्रव्यस्तवाधिकारी भावस्तवसंगतः सततम् ॥ १२ ॥

नगरजनराजमान्यो विधिपक्षाराधको विधिज्ञश्च ।
दुःकालकं(?कुं)तहस्तो सद्गुणवान् सर्वमत्सररहितः ॥ १३ ॥

श्रीथाहरूसुनामा अग्रजहरिराज-मेघराजाभ्याम् ।
युक्तः कोडिमदेवर आढ्यो न्यायार्जितैर्द्रव्यैः ॥ १४ ॥

ज्ञानप्राप्तिनिमित्तं भवे भवे बोधिबीजशुद्धयर्थम् ।
स ज्ञानकोशमेनं सम्यक् संकेलयांचक्रे ॥ १५ ॥

चित्कोसा(?श)लेखनेन श्रेयो यदवापि थाहरूकेण ।
हर्षात् तेन प्राज्ञा जिनागमं वाचयन्तु सदा ॥ १६ ॥

इति पुस्तकप्रशस्तिः कृता वा० हर्षनंदनगणिना ॥

संवत् १८६३ मिती कार्त्तिकसुदि १५ तिथौ लिखितं श्रीजेसलमेरमध्ये वा० श्रीमतिश्रीजिनभक्तिसूरिशाखायां विलासजीगणि-तत्शिष्यउ० श्रीलक्ष्मीराजजीगणि-तत्सि(शि)ष्यमुख्यपं० श्रीसत्यमूर्त्तिजीमुनि-तत्सि(शि)ष्यमुख्यपं० रत्नचन्दजीमुनि-तत्सि(शि)ष्यपं०...चंदपठनार्थं श्रीजेसलमेर-(रे) चतुर्म्मासः कृतः रावलजी श्रीमूलराजजी राज्यं करोति सम्यक्धर्म्मी श्रीजिनहर्षसूरिजी विद्यमान इयं पुस्तिका ल० पं० तिलककीर्त्तिमुनिः शुभं भवतु यत्नसें रषणी अबे (यत्नतो रक्षणीयेयं) पुस्तिका ।

[2471] आदिः— ॐ नमो वीतरागाय ॥

परमात्मानमानम्य मुमुक्षुः स्वात्मसंविदे ।
इष्टोपदेशमाचष्टे स्वशक्त्या सादरं स्फुटम् ॥ १ ॥

तत्रादौ यो यद्गुणार्थी स तद्गुणोपेतं पुरुषविशेषं नमस्करोतीति परमात्मगुणार्थी ग्रन्थकृत् परमात्मानं नमस्करोति ॥ तद्यथा—

यस्य स्वयं स्वभावाप्तिरभावे कृत्स्नकर्म्मणः ।
तस्मै संज्ञानरूपाय नमोस्तु परमात्मने ॥ १ ॥

अन्तः— विनयेन्दुमुनेर्वाक्याद् भव्यानुग्रहहेतुना ।
इष्टोपदेशटीकेयं कृताशा(शा)धरधीमता ॥ २ ॥

उपशम इव मूर्त्तो ललितचन्द्रमुनीन्द्रो-
ऽजनि विनयचन्द्रः सर्व्वकोरैकचन्द्रः ।
जगदमृतसगर्भाः शास्त्रसंदर्भगर्भाः ।
शुचिचरितवरिष्णोर्यस्य धिन्वंति वाचः ॥३॥

जयन्ति जगतीवन्द्याः श्रीमन्नेमिजिनांहूयः ।
रेणवोपि शिरस्याज्ञामारोहंति यदाश्रिताः ॥

॥ इति इष्टोपदेशटीका समाप्ता ॥ ८०० ग्रन्थाग्रम् ॥

[2488] बा०आदिः—ऐन्द्रवृन्दनतं नत्वा वीरं तत्त्वार्थदेशिनम् ।
अर्थः श्रीज्ञानसारस्य लिख्यते लोकभाषया ॥ १ ॥

इन्द्रसंबन्धिनी जे श्रीलक्ष्मी तेहना सुखनइ विषइ मग्न एहवो जे पुरुष तेण०

अन्तः— इति श्रीयशोविजयकृतज्ञानसारनामा ग्रंथः संपूर्णः ।

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः
प्रोढिं प्रोढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशोः
श्रीमन्न्यायविशारदस्य कृतिनामेषा कृतिः प्रीतये ॥ १ ॥

बालालालापनवद् बालबोधो नायं किन्तु न्यायमालासुधौघः ।
आस्वाद्यैनं मोहहालाहलाय ज्वालाशांतेर्धीविशाला भवन्तु ॥ २ ॥

आतन्वाना भारती भारतीस्तुल्यावेशा संस्कृते प्राकृते वा ।
शुक्तिसूक्तिर्युक्तिमुक्ताफलानां भाषाभेदो नैव खेदोन्मुखः स्यात् ॥ ३ ॥

सुरजीतनयः शांतिदासहृन्मोदकारणविनोदतः ।
कृतः आत्मबोधधृतविश्रमः श्रमः श्रीयशोवाचकैरयम् ॥ ४ ॥ इति ॥

संवत् १७६२ शाके १६२७ प्रवर्त्तमाने माघमासि शुक्लपक्षे त्रयोदशीतिथौ भौमे श्रीमत्पूर्णिमापक्षे प्रधानशाखायां परमपूज्यचूडामणि-श्रीमहिमाप्रभसूरीश्वरचरणनीरजनिषेविमुनिभावरत्नेनेदं पुस्तकं लिवी-(पी)कृतम् ।

[2492] **अन्तः—** इति श्रीधन्यचरित्रशालीनि श्रीदानकल्पद्रुमे श्रीधन्यशालिसर्वार्थसिद्धिप्राप्ति-वर्णनो नाम नवमः पल्लवः संपूर्णोयं श्रीदानकल्पद्रुमनामा नवपल्लवीग्रंथः ग्रन्थाग्रम्– १२९२ ॥

संवत् १६६७ वर्षे अश्विनीशुदि १५ शुक्रवासरे वाचकशिरोमणि–पूज्याराः०श्री ५ श्रीराजलाभगणि–तत्सि(शि)ष्यपंडितविवेकलाभगणि-भिर्लिखितं हांसोटबिंदिरे ॥

[2494] **अन्तः—** श्रीवी(वि)जयादी(दि)धर्म्मसुगुरो[ः] प्राप्य प्रसादं परं
विचारी(रि)त्रधरो विदग्धचतुरः श्रीरङ्गरङ्ग[ः] कवीः(विः) ।
संवत् श्रीगुणाष्टभुमीप्रमीते(भूमिप्रमिते)धन्यससाली
स्तत्पादांबुजरेणुरामविजयैः स्पष्ट[ः] टबोयं कृतः ॥ १ ॥

श्रीतपागच्छेस(श)परमगुरुसोमसुन्दरसुरी(सूरि)तत्शिष्येन श्रीजी(जि)-नकीर्तिसूरी(रि)[णा] द्री(वि)रची(चि)ते श्रीदानकल्पद्रुमनइ विषइं श्रीधन्नासालिभद्रसर्वार्थसिद्धिप्राप्तिवर्णनो नाम नवपल्लवः संपूर्णोयं सुत्रार्थसहितोयम् ।

पं० श्री ५ ज्ञानविजयजीग० तत्सि(शि)ष्य पं०श्रीगोविंदविजयग०-तत्सी(शि)ष्यपं०ज्ञमविजयगणी–तत्सी(शि)ष्यमुनिरविविजयग०वाचनार्थम्–संवत्

१८८१ मा वर्षे मधुमासे सी(सि)ते पक्षे ५मी ती(ति)थौ सुरगुरुवासरे ल०श्वेतानगरे अजी(जि)तनाथप्रसादात् ल०ऋषभविजयग० पं०रंगसत्केन ।

[2496] आदिः— श्रीगणेशाय नमः ॥ ॥श्रीआर्यादुर्गायै नमः ॥

प्रणम्य मातरं गंगाभैरवीं वनशंकरीम् ।
महादेवाख्यपितरं श्रौतस्मार्तविशारदम् ॥
दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः ।
शिष्टानां तन्यते तुष्ट्यै दानसंक्षेपचन्द्रिका ॥

अन्तः— अभ्यस्य तु त्रिरात्रं व्रतस्थः प्राणायामैश्चांतेघमर्षणं जपेत् महापापैः शुद्धयेत् मत्या चेद्ग्रामात्प्राग्वेदविनिष्क्रम्यस्तामि(?)॥ इति स्मृत्यर्थसारोक्तप्रायश्चित्तानि ॥

इति दानचन्द्रिका समाप्ता ॥

[2497] अन्तः— श्रीमत्हर्षपुरीयगच्छतिलकः श्रीसूरिवंशे गुरु-
विद्वत्पर्षदि राजशेखर इति प्रख्यातिमायाति यः ।
तेनेदं नवदेशमार्थिहृदयानन्दाय सारं मितं
प्रोक्तं संघमहोत्सवप्रकरणं सुश्रावकश्रीकरम् ॥३६॥

इति दानछत्रीसी समाप्ता ॥

[2498] अन्तः— इति श्रीतपागच्छनायकश्रीविजयसेनसूरीश्वर-शिष्यश्रीसोमकुशलगणि-शिष्य-पं०कनककुशलगणिविरचिते दानप्रकाशे पात्रदानप्रकाशकोऽष्टमः प्रकाशः ॥

श्रीमत्तपागणनभोंगणपद्मबन्धुर्भाग्याद्कब्बरमहीरमणादवाप्ताम् ।
ख्यातिं जगद्गुरुरिति प्रथितां दधानः सश्रीकहीरविजयाभिधसूरिरासीत् ॥१॥

तत्पट्टे वरगुणमणिगणरोहणभूधरा धरापीठे ।
सांप्रतमद्भुतयशसो विजयन्ते विजयसेनसूरिवराः ॥२॥

गीतः— वाचकचूडामणयः श्रीमन्तः शांतिचन्द्रनामानः ।
विद्यागुरवो विबुधा विजयन्तां कमलविजयाश्च ॥३॥

एषां श्रीसुगुरूणां प्रसादतः काय-बाण-रस-चन्द्र(१६५६) ।
प्रमिते वर्षे रचितो ग्रंथोयं कनककुशलेन ॥४॥

दानप्रकाशे श्लोकानां सचतुस्त्रिंशताधिकाः ।
संजाताष्टशती विश्वे ग्रन्थोयं जयताच्चिरम् ॥५॥

ग्रन्थाग्रम् ॥८३४॥ इति प्रशस्तिः ॥

हालीवाटकग्रामे सुश्राद्धसा०हरषाख्येन स्वश्रेयोर्थं लिलिखेयं ग्रन्थः ॥

[2504] आदिः— श्रीखरतरगच्छेश्वरजिनसागरसूरिसुख्यतरः ।
मुनिमालामौलिमणिर्जयति श्रीधर्म्मचन्द्रगणिः ॥१॥

श्रेयान् श्रीमालवंशे विशदतरुचिः साधुशाखासमुत्थः
सद्वृत्तः श्रीनिवासः प्रवरमरपतेरेव मान्यो महार्घ्यः ।
रम्यो मुक्तागुणाभो निरुपमसुखदो राजमालांगजन्मा ।
श्रीमान् श्रीजावडेन्द्रः प्रथितगुणगणो राजते संघपोषम् ॥४॥

तस्य सुश्रावकस्यैव प्रार्थनातो विरच्यते ।
श्रीमद्धर्मविलासाख्यो ग्रन्थोल्पमतिना मया ॥५॥

अन्तः— इति प्रासादभूम्युतां स्थिरां कीर्त्तिकरीं श्रियम् ।
मत्वा भव्यैर्मिजा पद्मा संस्थाप्या तीर्थभूमिषु ॥११॥

इति श्रीभरतकारितप्रासादस्वरूपम् ॥

इति श्रीधर्म्मविलासग्रंथे संघाधिपश्रीजावडसुश्रावकाभ्यर्थनया श्रीखरतरगणनभोंगणदिनमणिश्रीजिनसागरसूरि-शिष्यवाचनाचार्यश्रीधर्म्मचन्द्रगणि-शिष्य-वाचनाचार्यश्रीमतिनंदनगणिकृते सत्कुलवर्णनो नाम चतुर्थोल्लासः संपूर्णः ॥

लिपिकृतव्यास नथमल नागोरमध्ये ॥ संवत् १९६४ रा माघमासकृष्णा-पक्षचतुर्दश्याम् १४ ॥

[2506] मू०आदिः— ओमित्यक्षरमक्षरद्युतिकरं त्रैलोक्यगर्भं पर-
ब्रह्माकारमखंडबिंदुममलं नव्यार्धचंद्रोर्ध्वगम्० ॥

वृ०आदिः— श्रीपार्श्वं प्रणिपत्यादौ श्रीगुरुभारतीं तथा ।
धर्मोपदेशग्रंथस्य वृत्तिरेषा विधीयते ॥१॥

ॐकारवर्णादारभ्य चाक्षाकारं यथाक्रमम् ।
एकादशोत्तरशतैः काव्यैर्धर्मोपदेशकम् ॥२॥

स्त०अन्तः— इति श्रीधर्मोपदेशाभिधानकाव्यस्य श्रीलक्ष्मीवल्लभगणिविरचितायां स्वोपज्ञाख्यायां टीकायां आत्मतत्त्वचिन्तनप्रभावो द्वादशः संपूर्णः ॥

श्रीमत्खरतरगच्छे श्रीमज्जिनकुशलसूरिसंतानः ।
भट्टारका बभूवुर्भास्वद्गुणरत्नवारिधयः ॥१॥

श्रीजिनचन्द्रप्रभमाना तच्छिष्यः पाठकास्तु गणिमुख्यः ।
तच्छिष्यविजयतिलकः पाठकपदधारकः श्रेष्ठः ॥२॥

[2507] अन्तः— यत्पादपङ्कजरजोभिरपि प्रमाणात्मनैः शिरस्यमलबोधकलावतारः ।
भव्यात्मनां भवति तत्क्षणमेव मोक्षं स श्रीगुरुर्दिशतु मे मुनिवीरनन्दी ॥७॥

दन्तामन्दमपारसंसृतिपथः श्रान्तः श्रमच्छेदकृत्
प्रायोदुर्लभमत्र कर्णपुटकैर्भव्यात्मभिः पीयताम् ।
निर्यातं मुनिपद्मनन्दिवदनप्रालेयरश्मेः परा
त्स्तोकं यद्यपि सारतात्विकमिदं धर्मोपदेशामृतम् ॥ ८ ॥

इति धर्मोपदेशामृतं समाप्तम् ॥

[2517] अन्तः— इति यतिदिनकृत्यप्रकरणं संपूर्णम् ॥ कृतिरियं महोपाध्यायश्रीश्री-यशोविजयगणिनां श्रीमत्पूर्णिमापक्षोदारपट्टालङ्कारभट्टारकश्री५श्रीमहिमाप्रभ-सूरीश्वर–शिष्यमुनिभावरत्नेन प्रथमादर्शे लिपीकृतम् ॥

[2522] अन्तः— श्रीबृहत्खरतरगच्छे श्रीजिनभद्रसूरिअंतेवासी श्रीबृहत्खरतरगच्छे भट्टा-रकजङ्गमयुगप्रधानक१०८श्रीश्रीजिनचन्द्रसूरिसा(शा)खायां वा०श्री१०८श्री-श्रीराजविनेयजीगणिः तत्सिष्य पां०प्रा०श्रीश्री १०८ श्रीसदारङ्गजीमुनिः तत्सिष्यः पं०१०८ श्रीसुमतशेखरजीमुनिः तत्शिष्य पं०ही(हि)तधीर-मुनिना श्रीवर्द्धमानदेशना गद्यबन्धेन प्रणीतायां वेतलीपिताप्रतिबोधनो नाम दशमः उल्लासः समाप्तः ॥ १० ॥

इति श्रीवर्द्धमानदेशना गद्यबन्ध(धेन) समाप्तम्(प्ता)। ग्रन्थाग्रन्थम् ४७८५ प्रत्यक्ष[र]गणनया ॥

[2529] अन्तः— इति श्रीजिनदत्तसूरिविरचिते विवेकविलासे द्वादसो(शो)ल्लासे जन्मचर्य्यायां परमपदप्रापणो नाम द्वादसो(शो)ल्लासः ॥ १२ ॥

इति श्रीविवेकविलासः संपूर्णः ॥

संवत् १९१८ रा साके १७८३ रा ... लिपिकृतं धुलिया-ग्राममध्ये षांनदेसे पांना विवेकविलासरा गया छापरा अर्रं लिषर नवा घाल्यां छें हीरविजै चिरं मोहनविजै आजदिन धुल्यारी पैठमें बाआर छें अङ्गरेजबाहादरराज्ये ॥

[2533] अन्तः— इति समाप्तेयं वैराग्यकल्पलताकृतिः श्रीयशोविजयगणीनां श्रीविजयदेव-सूरिराज्ये ॥

सिद्धार्थं वदति स्म मार्गमतुलं सिद्धार्थराजांगजः
सिद्धार्थं भविनां शिवाध्वगमने सिद्धार्थ[य]न्मंगलम् ।
यः सिद्धार्थनिकेतनं शमभृतां हृद्गह्वरे स्फूर्जितं
क्रीडन् सन्निव केसरी स जयति श्रीवर्द्धमानः प्रभुः ॥ १ ॥

तत्पट्टे सद्गण्यपुण्यकलिताः पुण्यं च दानावचः
श्रीपुण्यप्रभसूरयः समभवन् पुण्यप्रशंसाः क्रमात् ।
तत्पट्टाम्बुजराजहंससदृशाः सिद्धांतगोचश्चवः
श्रीविद्याप्रभसूरयः स्म दधते धीवारलाक्रीडनम् ॥ २ ॥

ललितवाक्यसुरंजितसूरयः समभवल्ललितप्रभसूरयः ।
विजितदुर्द्धरवादिमतारयः सुधृतयो धृतयोगरसास्ततः ॥ ३ ॥

तत्पट्टे विनयप्रभाख्यगुरवः श्रीसूरयः सत्क्रियाः
संजाता भविलोककोकहृदयामन्दाय भानूदयाः ।
षट्त्रिंशद्गुणगौरवोत्तरुच्चारित्रधर्मोज्ज्वलाः
पंचाचारसुपोषतः परिगलद्दोषारयोऽकल्मलाः ॥ ४ ॥

तत्पट्टे प्रभुतास्पदस्य पदवी प्राधान्यशाखापुषि
कन्ये पौर्णिमपक्षदक्षकलया श्रीसूरयः सांप्रतम् ।
राजन्ते महिमाप्रभाख्यगुरवः शब्दे च कोषे नये
काव्येलंकृति-नाटके च गणिते जैनेंबुधौ छंदसि ॥ ५ ॥

यद्देशनारविरुचः श्रुतिकर्णजालैश्चित्रं प्रविश्य सदने हृदि भव्यजंतोः ।
त्रिकालिकं शमसुधामयमुत्प्रकाशं नित्योदयं निदधते सुविबोधचन्द्रम् ॥६॥

तेषां पदाम्बुजरजःस्पृशनानुजीवी सन् भावरत्न इति नामतया सुशिष्यः ।
तच्छिष्य एव सहिजो इति नामतोसौ वैराग्यकल्पलतिका लिखिता मनेन ॥७॥

संवत् नेत्र-रस-तुरंग-चन्द्रप्रमिते (१७६२) पुस्तकमिदं लिपीकृतम् ।
सर्वग्रन्थाग्रम् ७००८ ॥ श्रावणसुदि ११ दिने ।

[2534] अन्तः— इति वृत्तं मयोद्दिष्टं संश्रये षष्ठकेखिलम् ।
चान्यन्मु(?न्म)या कृते ग्रंथोन्यस्मिन् द्रष्टव्यमेव च ॥ ७४ ॥

इति श्रीउमास्वामिकृतश्रावकाचारः समाप्ति(प्तः) । लिषितं लहीया श्रीकृष्ण अमरदत्तजी अमदावादमध्ये लक्षो(ख्यो) छे । संमत् १९५४ सुभ मी(ति) भाद्रवा सुद ४ थ ॥

[2544] अन्तः— नवांगवृत्तिकारश्रीअभयदेवसूरिविरचिता षोडशकवृत्तिः ॥
(अन्यदीयहस्तेन लिखितमिदम्–)
वृद्धिविजयपठनार्थं मुम्बैमध्ये लषावि ॥

[2545] अन्तः— अथवा हरिभद्रसूरेः स्तुतिं कुर्वाणोऽपर कश्चिदिदमाह वचनम–ननु हारिभद्रमिदं हरिभद्रसूरेरिदं धर्मगतं वचनं प्रकरणाख्यं तस्माद्धर्मश्रवणे बहुश्रुतसमीप एव यत्नो विधेयो बहुश्रुतेभ्यो हरिभद्राचार्यवचनार्थानुपलंभादेवं वचनमाहात्म्यद्वारेण स स्तौति–

कृत्वा विवरणमेतत् पुण्यं यदवापि तेन भव्यजनः ।
अध्यास्तां षोडशकलाशशिमंडलभास्वरं स्थानम् ॥
कृतिरियं श्वेतपटाचार्यस्य यशोभद्रसूरेरिति ।
इति षोडशकविवरणं समाप्तम् ॥

[2547] अन्तः— इति महोपाध्यायश्रीकल्याणविजयगणि–शिष्यमुख्यपण्डितश्रीलाभविजयगणि–शिष्यपण्डितश्रीजितविजयगणि–सतीर्थपंडितश्रीनयविजयगणि–चरणकमलचंचरीकपंडितश्रीपद्मविजयगणिसहोदरोपाध्यायश्रीज(य)शोविजयगणिविरचिता योगदीपिका नाम्नी षोडशकवृत्तिः संपूर्णा समाप्ता ।

एषा षोडशकव्याख्या संक्षिप्तार्थावगाहिनी ।
सिद्धाऽक्षततृतीयायां न सा यदक्षयसिद्धये ॥ १ ॥

इति षोडशकप्रकरणं संपूर्णम् ॥ ग्रन्थाग्रम् १३८८ ।

[2552] अन्तः— इति साधुभावना संपूर्णा ॥

श्रीचक्रेश्वरसूरिमानससरोहंसः समुत्साहितः
सत्यं सज्जनदुःखकैरवरवेः श्राद्धस्य वाचा रवेः ।
आचार्यो विमलाभिधः समकृत श्रीब्रह्मचन्द्रापरः
ख्याताभिख्य, इमां मनो रमयितुं सद्वृत्तपञ्चाशतम् ॥ ५ ॥

आकांक्षा यदि मोक्षवर्त्मनि मतिः संतोषसौख्ये यदि
प्रद्वेषो विषयेषु यद्यप्यथ रतिर्नीरागतायां यदि ।
तच्छुद्धां वियुतोऽपि कोमलतरामप्यञ्जगर्भादिमां
संवेगद्रुमकन्दलीं पठत भोः वक्षो भवद्भ्योऽञ्जलिः ॥

[2554] अन्तः— पूर्वर्षिभिर्या रचिता कथेयमप्रेषि काव्यैः ससुभाषितैश्च ।
श्लोकैर्मया सा ग्रथिता प्रमोदाद् वेदाभ्रबाणेन्दु(१५०४)मितेऽत्र वर्षे ॥२७।

इति श्रीचैत्रगच्छीयैः श्रीगुणाकरसूरिभिः ।
चक्रे श्लोकैर्नवा रम्या कथा सम्यक्त्वकौमुदी ॥२९॥

पुष्पदन्तौ स्थिरौ यावद् यावच्च ध्रुवमण्डलम् ।
वाच्यमाना बुधैस्तावज्जीयात् सम्यक्त्वकौमुदी ॥ ३० ॥

इति सम्यक्त्वकौमुदी शुभा संपूर्णा ।
अक्षरगणनया ग्रंथाग्रंथम् १७०१, अक्षर २१ ।

संवत् गुणे रसि मुणि शसि वर्षे (१७६३) चैत्रमासे शुक्लपक्षे तिथि २ मंगलवासरे लिखितं पूज्य उग्रसेनऋषि तस्य शिष्य—पूज्य उत्तमऋषि तस्य शिक्ष(ष्य)लिखितं बल्लूऋषि आत्मार्थे यमनाबादनगरे ।

[2557] अन्तः— हयेषुलोकसंख्येऽब्दे (१४५७) सूरिश्रीजयशेखरः ।
श्रीमदञ्चलगच्छेशः चक्रे सम्यक्त्वकौमुदीम् ॥ २ ॥

इति श्रीसम्यक्त्वकौमुदी समाप्ता । ग्रंथाग्रम् ७९७ एवं सही ।

संवत् १५९५ वर्षे रत्नपुरग्रामे लिखिता हीरसुन्दरेण स्वपरोपकाराय ।

[2559] अन्तः— श्रीविक्रमार्कनृपतेर्युग्म-षट्—मनुवत्सरे (१४६२) ।
श्रावणसितपंचम्यां जलकोटपुरे स्थितः ॥१॥

श्रीजयचन्द्रसूरीणां चरणांबुजषट्पदः ।
स लिलेख कथामेतां बोधाय मनुजन्मनाम् ॥२॥

सूर्याचन्द्रमसौ यावत् धरित्री च ससागरा ।
सम्यक्त्वकौमुदी तावद् वर्तिषीष्ट सतां हृदि ॥३॥

इति धर्मकीर्त्तिमुनिविरचिता सम्यक्त्वकौमुदीकथा संपूर्णा ॥
ग्रंथाग्रम् १३६२ ॥

[2564] अव०अन्तः— इति हिंसाष्टकस्या (चूरिर्मुख्यतश्चतुर्भंगीतो नवमेदव्याख्या चैतत् लिखी-(पी)कृता भ०श्रीज्ञानविमलसूरिभिः ।

संवत् १७५३वर्षे श्रावणवदि त्रयोदश्यां तिथौ सुराचार्यवारे प्रथमदले पं०प्र रश्री१०५श्रीभक्तिविशालगणि–तत्शिष्यपं०प्रेमराजेन लिपिचक्रे श्रीपत्तनमध्ये चतुर्म्मासीस्थितेन खरतरवसहीति नाम पाटकस्थितैरिति ॥

[2608] अन्तः— राजन्ति श्रीजिनचन्द्रसूरिगच्छाधिराजैरिह राजगच्छे ।
प्रमोदमाणिक्यगणेर्विनेयलेशेन साक्षाज्जयसोमनाम्ना ॥१॥
मुन्यब्धि-सच्चन्द्रकला(१६४७)मिताब्दे समर्थिता वृत्तिरियं सुखेन ।
श्रीपार्श्वनाथेष्टगुरुप्रसादान्नंद्याच्चिरं धीधनसाध्यमाना ॥२॥
यदत्र किंचिन्मतिमांद्यदोषात् सिद्धांतमार्गाद् विपरीतगत्या ।
विनिर्मितं तद्विबुधाः सुबुद्धया मदाग्रहात् साधु सुविशोधयन्तु ॥३॥

ग्रंथाग्रम् १०३५ ॥ संवत् १६६१ वर्षे शाके १५२६ प्रवर्त्तमाने माघमासे शुक्लपक्षे अष्टमीदिने प्रधानशाखायां श्रीललितप्रभसूरिशिष्येन चेलारामजीकेन प्रतिः लिपीकृता ।

[2629] अन्तः— कमठघनमृतांभोराशिसंवासिसर्प्पा–
घिपतिकलितमूर्त्तिर्नीलतालीककांतिः ।
सितरुचिरविराजल्लोचनः केवलश्री–
परिचयचतुरात्मा श्रीजिनो वः श्रियेस्तु ॥१॥
श्रीवर्द्धमानः शमिनां मनांसि जिनो धिनोतु त्रिपदी यदीया ।
व्याप्नोति विश्वं बलिघातिकर्म्मजयोदिता विश्वमनश्वरश्रीः ॥२॥
श्रीवीरशासनमहामहिमा गरिष्ठः श्रीभद्रबाहुविहिताचरणप्रतिष्ठः ।
काले कलावपि विलुप्तघनाघसंघः श्रीमानयं विजयते यतिमूलसंघः ॥३॥
श्रीनागेन्द्रकुले मुनींद्रसवितुः श्रीमन्महेन्द्रप्रभोः
पट्टे पारंगतागमोपनिषदां पारागमग्रामणीः ।
देवः संयमदैवतं निरवधिस्त्रैविद्यवागीश्वरः ।
संजज्ञे कलिकल्मषैरकलुषः श्रीशांतिसूरिर्गुरुः ॥४॥
शक्तिः कापि न कापिलस्य न नये नैयायिको नायक–
श्चार्वाकः परिपाकमुज्झितमतिर्बौद्धश्च मौद्गल्यभाक् ।
स्याद् वैशेषिकशेमुषी च विमुखी वादाय वेदांतिके ।
दांतिः केवलमस्य वक्तुरयते सीमां न मीमांसकः ॥५॥

तत्पट्टे प्रथमः शमिप्रभुरभूद्धानंदसूरिः परः
संजज्ञेऽमरचन्द्रसूरिरखिलानूचानचूडामणिः ।
शश्वद् यस्य सरस्वतीप्रसरणे सिद्धेशितुः संसदि ।
प्राज्ञैश्चेतसि वेतसीतरुसखाचार्यकं कार्यते ॥६॥

सिद्धांतोपनिषन्निषण्णहृदयो धीजन्मभूस्तत्पदे
पूज्यः श्रीहरिभद्रसूरिरभवच्चारित्रिणामग्रणीः ।
भ्रांत्वा शून्यमनाश्रयैरतिचिराद् यस्मिन्नवस्थानतः ।
संतुष्टैः कलिकालगौतम इति ख्यातिर्वितेने गुणैः ॥७॥

गुरुः श्रीहरिभद्रोयं लेभेधिकवयःस्थितिः ।
मोहद्रोहाय चारित्रनृपनासीरवीरताम् ॥८॥

तत्पट्टे विजयसेनसूरयः पूरयंति कृतिनां मनोरथान् ।
तद्गवी वृषभसूतनूतना कामधेनुरिव सर्वकामदम् ॥९॥

गर्वात् पूर्वमनादरैरवहितैः पश्चात् ततो विस्मितैः
प्रस्विन्नैरनुविस्मृतात्मभिरथो वादेऽनुवादे क्षणात् ।
भार्यैर्मानिमनीषिणां परिणता पुंस्त्वेन वागेष इ-
त्याक्षिप्तैरथ सेव्यते स्म सहसा यः सादरं वादिभिः ॥१०॥

यस्योपदेशममृतोपमितं निपीय श्रीवस्तुपालसचिवेश्वर-तेजपालौ ।
संघाधिपत्यमसमं जिनतीर्थतेजःसंवर्द्धनाज्जितश[त]क्रत् चक्रतुस्तौ ॥११॥

श्रीमद्विजयसेनस्य सौमनस्यं नमस्यते ।
यद्वासिता धृताः कैर्न गुणाः शिष्याश्च मूर्द्धसु ॥१२॥

शिष्यस्तस्य च लक्षणक्षणचणः साहित्यसौहित्यवा–
नुयत्तर्कवितर्ककर्कशमतिः सिद्धांतशुद्धातुरः ।
श्रीधर्माभ्युदये कविः प्रविलसद्दुर्वादिगोत्रे पवि–
स्तामेतामुदयप्रभाख्यगणभृद् वृत्तिं व्यधात् कर्णिकाम् ॥१३॥

तस्याज्ञया विजयसेनमुनीश्वरस्य शिष्येण सेयमुदयप्रभदेवनाम्ना ।
योग्या विशेषविदुषामुपदेशमालावृत्तिः कथाप्रथमतोभिनवा वितेने ॥१४॥

प्रथमादर्शे प्रथमानमानसो देवबोधविबुध इमाम् ।
स्थपतिरिव स्थापयिता गुरुषु नतोऽतनुत साहाय्यम् ॥१५॥

चांद्रे कुले कलशतः किल सूरिदेवानन्दाख्यशिष्यकनकप्रभसूरिनाम्नः ।
प्रद्युम्नसूरिरुदितः कवितासमुद्रमुष्टिंधयोम्बुवदशोधयदेव वृत्तिम् ॥१६॥

उत्सेकतोत्सूत्रनिरूपणाद् यैर्याशातना स्यात् तनुतापि काचित् ।
मिथ्यास्तु मे दुष्कृतमत्र साक्षी श्रीसंघभट्टारक एव तीर्थः ॥१७॥

एकैकेन विमोहशिवङ्यवरभ्रांशित्वया कथावानिमान्
दीप्रेभाकुम्भशाम्बुधामवि मनवैकेन हुत्वात्मनः ।
ग्रंथस्याष्टशतैरितीह जपितैस्तैः पंचभिः सिद्धये
गाथाभिर्गुंफिता विजयते जप्योपदेशावलिः ॥१८॥

कल्पाविष्करणादितो विवरणाद् विज्ञाय विज्ञात्मना-
माम्नायादुपदेशपद्धतिमिमामासेवमानो मुदा ।
लोकाग्रोपरिवर्त्तिनीमभिमुखीं कुर्वीत वीतान्यधी-
र्वृत्तिर्निर्वृतिदेवतां शिवपुरीसाम्राज्यकामः कृती ॥१९॥

तत्त्वोदित्वरसप्तभूमिकमहाप्रासादराजांगणं
यावद् भाति जगद्गुरोर्भगवतस्तीर्थेशितुः शासनम् ।
तावच्छ्रावकसाधुधर्मविजयस्तंभद्वयालंबिनी
वृत्तिर्वन्दनमालिका विजयतां तत्रोपदेशस्रजः ॥२०॥

सेयं पुरे धवलके नृपवीरधवीरमंत्रीशपुण्यवसतौ वसतौ वसद्भिः ।
वर्षे ग्रह-ग्रह-रवौ कृतभार्कसंख्यैः श्लोकैर्विशेषविवृतिविहिताद्भुतश्रीः ।२१।

इत्याचार्यश्रीउदयप्रभदेवसंघटितायां उपदेशमालायाः कर्णिकायां विशेषवृत्तौ तृतीयः परिवेशः संपूर्णः ॥ ग्रंथा[ग्र]म् ३७१४ एतावता च संपूर्णा उपदेशामालायाः कर्णिकाख्या विशेषवृत्तिरिति । ग्रन्थम् १७७४ ॥

सं० १४५९ वर्षे भाद्रपदशुदिपक्षे १३ शनौ अद्येह श्रीघोघा-वेलाकूले श्रीमत्तपागच्छे भ०श्रीजयविजयसूरिशिष्य-पं०देव[सुन्दर]गणि-योग्य-श्रीउपदेशमालावृत्तिर्लिखिता व्य० महिराजलेषकेन ॥

[2644] बा०आदिः—प्रणम्य श्रीमहावीरं वीरं सर्वार्थसाधकम् ।
इहोपदेशमालायां शब्दार्थस्तन्यते मया ॥१॥

नमिऊण कहेतां नमस्कार करीने०

बा०अन्तः—इति उपदेशमालाप्रकर्ण(रण) टबो संपूर्णः बालावबोधटीक(का) समाप्तः(प्ता) ।
पं०श्रीसामलचन्द्रगणि-पं०श्रीबालालचन्द्रल(लि)पीकृतम् ।

श्रीमद्यशोविजयवाचकसत्प्रसादान्निष्पादितोयमतिमन्दजनस्य हेतोः ।
सश्रीकसत्यविजयो विबुधेन्द्रमुख्यः शिष्येण वृद्धिविजयेन पदार्थगुंफः ॥१॥

वर्षे पुष्कर-जगति-विधुर-विधुसंमिते तथा युयुजे ।
गुरुशुक्रपूर्णिमायां सूर्यादिमबन्दिरे रम्ये ॥२॥

श्रीमत्परमगुरूणां नामस्मरणप्रभावतः स्पष्टम् ।
श्राद्धी इयामोघमतः पूर्णः संजात इति भद्रम् ॥३॥

इति श्रीउपदेस(श)मालाप्रकर्ण(रणं) समाप्तः(प्तम्) ।

संवत् १८९२ वर्षे मासोत्तममासे पोषमासे कृष्णपक्षे ५ ती(ति)थौ बुद्ध(ध)वासरे लिषिते चतुर्थप्रहरे सकलपण्डितसभासो(शो)भनी(न)भाल-स्थल[तिल]कायमानपण्डितश्री१०८श्रीलालचन्द्रगणि–तत्शिष्यपण्डितशिरो-रत्नपण्डितश्री२१श्रीसांमलचन्द्रगणि-तत्शिष्यश्री१९श्रीबालकचन्द्रगणि-तत्शिष्यपं०श्री ५ श्रीहीराचन्द्रगणि–तत्शिष्यवीर्यचन्द्रव(वा)चनार्थम् ॥

जिहां भूसायर चन्दरवो मेरु महिस्त होय ।
तिहां प्रतपो परिवार ज्युति लेषक पाठक दोय ॥१॥

लषितं श्रीबैणनगरे श्रीवि(वी)रश्रीशांतिजिनप्रसादात् ।

[2649] अन्तः— सूरिर्विजयदेवाख्यस्तपागच्छाधिनायकः ।
विख्यातस्त्रिजगत्यासीत् विद्यया गुरुसन्निभः ॥

तस्य पट्टोदयाद्रौ श्रीविजयसिंहसूरिराट् ।
आदित्य इव तेजस्वी सिंहवच्च पराक्रमी ॥२॥

सत्यादिविजयस्तस्यांतेवासी सत्यभाषकः ।
क्रियोद्धारः कृतो येन प्राप्यानुज्ञां गुरोरपि ॥३॥

विनेयस्तस्य कर्पूरविजयः सात्त्विकः सुधीः ।
कीर्त्तिः कर्पूरवद् यस्य प्राप्ता सर्वत्र विश्रुता ॥४॥

क्षमादिगुणसद्मक्षमाविजय इत्यभूत् ।
तस्य शिष्यो विनीतात्मा शिष्यानेकसमन्वितः ॥५॥

शब्दसा(शा)स्त्रादिशास्त्राणां वेत्ता शिष्यगणान्वितः ।
जिनादिविजयाह्वानस्तस्य शिष्यः सुलभभाग् ॥६॥

कर्मप्रकृतिप्रभृतिशास्त्रतत्त्वविचारवित् ।
उत्तमाद् विजयस्तस्य शिष्योभूद् भूरिशिष्यकः ॥७॥

तस्य पादयुगांभोजभृंगतुल्येन चाणुना ।
पद्मविजयशिष्येण स्वपरानुग्रहाय वै ॥८॥

राग–वेद–तथा नाग–चन्द्रेति(१८४६) च वत्सरे ।
वसंतपंचमीवसे विक्रमात् बुधवासरे ॥९॥

गौतमकुलकं नाम प्रोक्तं श्रीगौतमर्षिणा ।
मया बालावबोधोयं कृतस्तद्बाल्यबुद्धिना ॥१०॥

त्रिभिर्विशेषकम् ॥

यत् कश्चिद् वितथं प्रोक्तं मतिमांद्यादजानता ।
तत् सर्वं धीधनैः सो(शो)ध्यं विधाय मयि स[द]नुग्रहम् ॥११॥

वीरस्य सा(शा)सनं यावत् वर्त्तते विश्वदीपकम् ।
तावद् बालावबोधोयं तिष्ठतु शुद्धवासनः ॥१२॥

इति श्रीसकलभट्टारकशिरोमणिनां भट्टारकश्रीश्रीविजयदेवसूरीणां पट्टोदयाद्रौ सहस्रांशुश्रीविजयसिंहसूरयः अभूवन् । तेषां सकलविनेयजनशिरोरत्नं पं० श्रीसत्यविजयोऽभूत् । तच्छिष्यपं० कर्पूरविजयस्तत्शिष्यपं०श्रीक्षि(क्ष)माविजयस्त(च्छि)ष्यसकलसभाभामिनीभालस्थलतिलकायमानपं०श्रीउत्तमविजय-शिष्यपं०पद्मविजयकृतबालावबोधे श्रीगौतमकुलकप्रकरणे एकादशाधिकैकशतकथानकानि समाप्तानि संपूर्णमस्तु ॥

[2709] आदिः— प्रसादमासाद्य यदंह्रिपद्मयोर्जडोपि विद्वज्जनशेखरायते ।
सारस्वती सा मम मानसीतटे तनोतु हंसीव निवासमंजसा ॥७॥

विश्वातिशायिमतयो गुणशालिरुद्र-
पल्लीयगच्छगगनांगणशीतभासः ।
सिद्धांतवारिनिधयो गणधारिणोमी
नन्दन्तु संघतिलका गुरवोऽस्मदीयाः ॥८॥

येषां गुरूणामभिधा जगत्यामजिह्मवाग् ब्रह्ममयीव मन्ये ।
नो चेत् कथं तत् स्मृतिमात्रतोयं जनः कवित्वं तनुते जडोपि ॥९॥

तन्निर्देशात् स्वकृतेः श्रीमद्दानोपदेशमालायाः ।
वृत्तिं सुखावबोधां कुर्वे स्वपरोपकाराय ॥१०॥

इह हि प्रकरणकारः प्रकटीकृतामृतायमानसत्पात्रदानोपदेशसारः संसारपारावारवारिप्रवाहप्रणिमज्जत्प्राणिगणनिस्तारणप्रवहणायमानागण्य-पुण्यकाननोल्लासघनाघनसंरंभे श्रीदानोपदेशमालाप्रकरणप्रारंभे तत्त्वातत्त्वविवेकच्छेकास्तोकलोकचेतश्चमत्काराय प्रेक्षावत्प्रवर्त्तनाय शिष्टसमयप्रतिपालनाय दुरंतदुरितदूरीकरणाय च समुचितेष्टदेवतानमस्कारपूर्वकमभिधेयप्रयोजनसंबन्धबन्धुरां प्रथमगाथामाह—

सयलसमीहियकरणं रिसहजिणं पणमिऊण णाणघणं ।
दाणोवएसमालं भणामि मंगलमणीसालं ॥१॥

अन्तः— अथ ग्रन्थसमाप्तौ कविनामगर्भां मंगलाशिषमाह—
इइ संघतिलयगणहरसीसेण दिवायरेण रइएयं ।
दाणोवएसमाला कंठगया कं ण भूसेइ ॥१०॥

समाप्ता चेयं दानोपदेशमालाप्रकरणवृत्तिः ॥

विक्रमादित्यतोऽष्टेंदुवार्द्धीन्दु(१४१८)मितवत्सरे ।
चक्रुर्देवेन्द्रसूरीन्द्रा वृत्तिमेतां मनोहराम् ॥१॥

यदिह मया मतिमांद्यात् किमप्यसंबद्धभाषणं व्यरचि ।
तच्छोधयन्तु सुधियो दयामया मयि दयां कृत्वा ॥२॥

एतत्प्रकरणविवरणकरणाद् यदनघमर्जितं मया ।
तेन मम निखिलमंगलदायी वरबोधिलाभोस्तु ॥३॥

यावन्नभः सरसि तारकपद्मभाजि
सद्राज[हं]सयुगलं खलु खेलतीह ।
तावन्मुनीश्वरगणाः परमादरेण
टीकामिमामनुपमां परिशीलयन्तु ॥४॥

अस्य ग्रन्थस्येयं संख्यास्ति ख-ख-[बाण]-बाणेति(५५००) संख्यास्ति ॥
ग्रन्थाग्रन्थभाषायाम् ५५०० ॥

श्रीवृद्धगच्छे वादीन्द्राः श्रीमुनीश्वरसूरयः ।
तेषां विनेयो व्यलिखन्मुनिहर्षः सहर्षधीः ॥१॥

श्रीविक्रमार्कसमयाद् युग-दिग्गज-सागरेन्दु(१४६४)मितशरदि ।
स्वश्रेयसे कृतेयं पुस्तकरचना चिरं जीयात् ॥२॥

संपूर्णं समाप्तम् ॥

संवत् १९६५ रा मिति चैत्रकृष्णपक्षतीथी ६ षष्ठमी शनिश्वरवार इति संख्ये वर्षे बाणांग-नवेन्दु(१९६५)चैत्रकृष्णपक्षस्य षष्ठ्यां शनिश्वरवारे मूलचन्दशर्मा लिलेख ॥

[2727] अन्तः— इति श्रीपंचनिर्ग्रंथीटबार्थः संपूर्णः समाप्तः ॥
संवत् १९३७ ना वर्षे ज्येष्ठवदीसप्तम्यां रवीवारे ।

स्त०अन्तः— श्रीनयविजयगुरूणां प्रसादमासाद्य सकलकार्यकरम् ।
व्याख्यां कुर्वे कांचिल्लोकगिरा पंचनिर्ग्रन्थ्याः ॥१॥

नमिनइं श्रीमहावीरप्रतइं भव्यनइं हितने अर्थइं संक्षेपथकी कांइंक कहिसिं स्वरूप हुं पुलाकप्रमुष साधुनुं ॥१॥

स्त०अन्तः— भगवतिनां २५ पचवीसमा शतकनि छठ्ठा उद्देशानि नियंठानि संग्रहणिए अभयदेवसूरिइं रचि भावार्थ संभारवानेंऽर्थइं ॥१०८॥

श्रीनयविजयगुरूणां चरणाब्जोपासनादुरितपुण्यः ।
पुण्याय यशोविजयो व्यातेने बालबोधमिमम् ॥१॥

यद्यपि गीर्मे ममेयं कर्णाभरणमावलिर्मन्दमतीनाम् ।
तदपि प्रवचनभक्तिः पदकिंकिणिका भवत्वेवम् ॥२॥

इति श्रीपंचनिर्ग्रंथीटबार्थः संपूर्णः समाप्तः ॥ लिपिकृतं बाबा बाल-
गिरजी ग्रंथाग्रंथम् ५०० ॥

[2734] व्या०आदिः—सम्यक्त्वं नयसारनाम विदितः श्रीग्रामचिंतामणी-
र्यः संप्राप्य सुरद्रुमाधिकमहःश्रीस्वर्गमुख्यैर्दिराः ।
पत्राभा उपभुज्य जैनकमलामासाद्य पुष्पोपमां
श्रीकैवल्यफलश्रियं निरुपमां भुंक्ते स वीरः श्रिये ॥१॥

श्रीजिनेश्वरसूरीणां नत्वा पादसरोरुहम् ।
पंचलिंगीप्रकरणविवृतिर्लिख्यते मया ॥२॥

इह गूर्ज्जरवसुंधराधिपश्रीदुर्लभराजसभासभ्यसमाजमहावादिचैत्यवा-
सिककल्पितजिनभवनवासपरास्तसमासादितविस्त्वरकीर्त्तिकर्पूरपूरसुरभितत्रिभु-
वनभवनभोगश्रीजिनेश्वरसूरिविरचितपंचलिंगाख्यप्रकरणस्य यद्यपि प्रति-
वादिदंतिकुंभस्थलकेशरिभिः श्रीजिनपतिसूरिभिर्नानाप्रमाणावतारवसुन्धरा
विद्वज्जनमनोहरा वृत्तिर्निर्म्मिता तथापि संक्षिप्तरुचिसत्त्वानुग्रहाय तद्व्याख्या-
नुसारेण किंचिल्लिख्यते मया ।

टीकापुष्पिका —

इति पंचमं लिंगं विवृतम् तद्विवृतौ समाप्तं पंचलिंगीप्रकरण-
विवरणम् । इति वसतिमार्गप्रकाशकयुगप्रवरागमश्रीजिनेश्वरसूरिविरचितस्य
पंचलिंगाख्यप्रकरणस्य श्रीजिनचन्द्रसूरि-पट्टपट्टहस्तींद्रनिषादिराजश्रीजिन-
पतियतिराजविनिर्मितसविस्तरसहृदयधार्मिकचक्रिचक्रमनोहरसद्वृत्तितः संक्षिप्त-
रुचिमंदमेधाविनेयजनानुग्रहाय श्रीजिनेश्वरसूरिशिष्यलेशेन वा०सर्वराजगणिना
श्रीजेसलमेरुस्थितेन प्र०बुद्धिसमृद्धिगणिन्यभ्यर्थनया संक्षेपेणेदं विवरणं
समुद्धृत्य तदनुसारेण लिखितं शोधितं च पं०पद्मकीर्तिगणिना सर्वश्रुत-
धरैरत्रार्थे मय्यनुग्रहो विधेयः । तथा—

वरतरसमयज्ञानांजलिं संविधाय
अवनतिविनययुक्तोऽभ्यर्थयेऽभ्यर्थनीयान् ।
निखिलगुणसमेतं दोषलेशप्रमुक्तं
विवरणमिदमत्राधत्त संशोध्य पूज्याः ॥१॥

सुकृतलव इतो मे दुर्गदौर्गत्यहारी
सुपदविभवसारः प्रादुरासीन्निधिर्यः ।
विलसतु भविकौघस्तेन सम्यक्त्वलक्ष्म्या
त्रिभुवनवरसद्मासख्यसंभूषितांग्या ॥२॥

[2770] मू० अन्तः— इति भवभावनाप्रकरणं समत्तं पठनार्थं स्वपरमंगलमाहेश्वरी। संवत्
१५६४ वर्षे आसोवदिद्वितीयातिथौ ॥

अव०अन्तः— श्रीविक्रमतो देवेन्द्रतिथि(१५६४)प्रमिते वर्षे अर्जिकिमासे शुक्लपक्षे पूर्णिमातिथौ चन्द्रजवासरे मुनिना राजवल्लभेन श्रीभवभावनार्किचिदव-चूर्णिर्लिखिता पठनार्थं मंगल माह० ।

[2797] आदिः— नमः सर्वज्ञाय ॥

बालत्वे शैलराजं बल[व]दखिलधरामंडलं कंपयित्वा
शुद्धं सम्यक्त्वरत्नं सुरविभुरपतेर्मानसे यश्चकार ।
तं नत्वा वर्द्धमानं चरमजिनपतिं मूलशुद्धेः स्वशक्त्या
स्पष्टं व्याख्यां विधास्ये निजगुरुचरणद्वन्द्वसद्भक्ति(द्भक्ति)योगात् ॥१॥

अत्र सुगृहीतनामधेयो भगवान् श्रीमत्प्रद्युम्नसूरिः ।

अन्तः— सिद्धंतसाराणमिणं महत्थं बुद्धाण भव्वाणमणुग्गहत्थं ।
मइमई च महन्तमत्थं पज्जुन्नसूरीवयणं पसत्थं ॥

इति श्रीदेवचन्द्राचार्यविरचितं मूलशुद्धिस्थानकविवरणं समाप्तमिति ॥

आसीच्चन्द्रकुलांबरैकशशिनि श्रीपूर्णतल्लीयके
गच्छे दुर्द्धरशीलधारणसहैः संपूरिते संयतैः ।
निःसंबन्धविहारहारिचरितश्चश्वच्चरित्रः शुचिः
श्रीसूरिर्मलवर्जितोर्जितमतिश्चार्वाम्रदेवाभिधः ॥१॥

तच्छिष्यः श्रीदत्तो गणिरभवत् सर्वसत्त्वसमचित्तः ।
नरनायकादिचित्तः सद्वृत्तो वित्तनिर्मुक्तः ॥२॥

सूरिस्ततोभूद् गुणरत्नसिंधुः श्रीमान् यशोभद्र इतीद्धसंज्ञः ।
विद्वान् क्षितीशैर्नुतपादपद्मः सन्नैष्ठिको निर्मलशीलधारी ॥३॥

नीरागोपि विधानतो निजतत्त्वं (? मतं) संलिख्य सर्वादरात्
सर्वाहारविवर्जनादनशनं कृत्वोज्जयन्ते गिरौ ।
कालेणा(ना)त्र कलौ त्रयोदशदिनाद्याश्चर्यहेतुर्जने
शस्यं पूर्वमुनीश्वरीयचरितं संदर्शयामास यः ॥४॥

तच्छिष्यो भूरिबुद्धिर्मुनिवरनिकरैः सेवितः सर्वकालं
सच्छास्त्रार्थप्रबन्धप्रवरवितरणाल्लब्धविद्वत्सु कीर्त्तिः ।
येनेदं स्थानकानां विरचितमनघं सूत्रमत्यंतरम्यं
श्रीमत्प्रद्युम्नसूरिर्जितमदनभटोभूत् सतामग्रगामी ॥५॥

राद्धान्त-तर्क्क-साहित्य-शब्दशास्त्रविशारदः ।
निरालंबविहारी च यः शमांबुमहोदधिः ॥६॥

सिद्धांतदुर्गमहोदधिपारगामी
कन्दर्पदर्पदलनोनघकीर्त्तियुक्तः ।
दांतातिदुर्गमहृषीकमहातुरंगः
श्रीमांस्ततः समभवद् गुणसोमसूरिः ॥७॥

जगत्यपि कृताश्चर्यं सुराणामपि दुर्लभम् ।
निशाकरकराकारं चरित्रं यस्य राजते ॥८॥

तच्चरणरेणुकल्पः सूरिः श्रीदेवचन्द्रसंज्ञोभूत् ।
तच्छिष्यो गुरुभक्तस्तद्विधधिषणो विनिर्मुक्तः ॥९॥

किंच—श्रीमदभयदेवाभिधसूरेर्यो लघुसहोदरः ।
स इह स्थानकवृत्तिं चक्रे सूरिः श्रीदेवचन्द्राख्यः ॥१०॥

मतिविकलेनापि मया गुरुभक्तिप्रेरितेन रचितेयम् ।
तस्मादियं विशोध्या विद्वद्भिर्मयि कृपां कृत्वा ॥११॥

आवश्यकसत्पुस्तकलेखनजिनवन्दनार्चनोयुक्तः ।
शय्यादानादिरतः समभूदिह वीहकः श्राद्धः ॥१२॥

तद्गुणगणानुयायी श्रीवत्सस्तत्सुतः समुत्पन्नः ।
तद्वसतावधिवसता रचितेयं स्तंभतीर्थपुरे ॥१३॥

रस-युग-रुद्रै(११४६)र्वीतैर्विक्रमसंवत्सरात् समाप्तेयम् ।
फाल्गुनसितपंचम्यां गुरुवारे प्रथमनक्षत्रे ॥१४॥

अणहिल्लपाटकनगरे वृत्तिरियं शोधिता सुविद्वद्भिः ।
श्रीशीलभद्रप्रमुखैराचार्यैः शास्त्रतत्त्वज्ञैः ॥१५॥

साहाय्यमत्र विहितं निजशिष्याशोकचन्द्रगणिनाम्ना ।
प्रथमप्रतिमालिखता विश्रामविवर्जितेन भृशम् ॥१६॥

प्रत्यक्षरं निरूप्यास्या ग्रंथमानं विनिश्चितम् ।
अनुष्टुभां सहस्राणि संपूर्णानि त्रयोदश ॥१७॥

अंकतोपि सहस्रग्रंथाग्रम् १३००० ॥

साहश्रीवच्छासुतसाहसहस्रकिरणेन पुस्तकमिदं गृहीतं सुतवर्द्धमानशांतिदासपरिपालनार्थम् ।

[2800] अन्तः— सिद्धविग्गवग्गसायर पभणिअ सिरिदेवसूरि उद्धरिआ ।
जाव रविदिवसतरिआ ता जयउ जईण दिणचरिया ॥१९॥

॥ इति श्रीसुविहितसि(शि)रोमणिश्रीदेवसूरिविरचिता यतिदिनचर्या संपूर्णा ॥

संवत् १६०८ वर्षे शाके १४७४ प्रवर्त्तमाने वैशाखमासे शुक्लपक्षे १३ शुक्रे वाणसमावास्तव्यश्रीश्रीमालज्ञातीयश्रेष्ठिहरषाभार्यालखमाई-हासा-धनासहितेन श्रीपूर्णिमापक्षे प्रधानशाषीयभट्टारकश्री ६ कमलप्रभसूरिपट्टे भट्टारकश्री ६ पुण्यप्रभसूरीणां प्रदत्तं श्राविका लखमाई स्वपुण्यार्थं वाच्यमानं चिरं नन्दतु ॥

[2803] आदिः— श्रीवीतरागाय नमः ॥

प्रणम्य जगदानन्दवृन्दकन्दकशृजिनम् ।
श्रीपार्श्वं दिनचर्याया वक्ष्ये व्याख्यां ससूत्रगाम् ॥१॥

शांतिस्तनोतु सततं कृतपा[प]शांतिः
शांतिजिनोऽथ जलसंततिसागरांतिः ।
ख्यातिः क्षितौ क्षितिपतौ किल यस्य लोके
धर्माधिपे च भुवि गर्ज्जति संप्रति यः ॥२॥

यत्राभूद् गणभृत्प्रभावनिधिभृत् केशी प्रदेशी लसत्-
सत्सम्यक्त्वगुणातिशसिपदकृत् स्वर्गर्द्धिसंयच्छकः ।
तस्यैतद्दिनकृत्यमेतदखिलं गच्छस्य चान्यस्य च
व्याख्याबोधिनिबन्धनं गणधरस्याहुर्न ये सूत्रतः ॥३॥

अथार्या—दिनचर्या श्रुतधुर्या कृतवान् श्रीभावदेवसूरिवरः।
सुकरां तनुते रम्यां मतिसागर एषः तद्वृत्तिम् ॥४॥

अन्तः— समाप्ता यतिदिनचर्यावचूरिलिखिता ॥ सं० १९५६ श्लो० (?) पो० सुदी ४
वार सुकरवारे ॥ श्रीमद्राजनगरे वरे ॥

[2806] अन्तः— इति न्यायविशारदविरचितं सामाचारीप्रकरणं संपूर्णम् ।

श्रीधनविजयाह्वानैर्वाचकवर्यैरशोधि तत्कालम् ।
प्रकरणमिदं प्रमुदितश्रीपूज्यानां निदेशेन ॥१॥

[2808] आदिः— केवलं अथ सव्वं लोअग्गपयट्ठिअं जिणं वीरं ।
पणमित्तु पयत्थेमो निअजोवणुसासणं किंचि ॥१॥

[2809] अन्तः— आसीदत्र महामुनिश्च विजयानन्दाख्यसूरीश्वरः
श्रीलक्ष्मीविजयाह्वयश्च सुगुणस्तस्याजनि शिष्यकः ।
तच्छिष्यस्य मुनीशहंसविजयस्यात्रोपदेशेन च
ग्रंथोयं लिखितो बभूव भवीनां मोक्षाख्यशर्मोघदः ॥१॥

[2812] अन्तः— संवत् १६६९ वर्षे श्रीअंचलगच्छे पं०श्रीक्षि(क्ष)माकीर्त्तिगणि-
शिष्य वा०श्रीराजकीर्त्तिगणि-पं०श्रीगुणवर्द्धनगणि–शिष्यश्रुतकीर्त्तिलिखितं
श्रीपारकरनगरमध्ये ऋषिविद्याकीर्त्ति-ऋषिहर्षकीर्त्तिसहितैः ।

[2814] मू०आदिः—श्रीगुरुभ्यो नमः ॥

नमिऊण जिणवरिन्दे उवयारट्ठा गुरुं व सीसं व ।
सिद्धंतसारगाहा भणामि जे रयणसारित्था ॥१॥

अन्तः— इति श्रीरत्नसंचयग्रंथ[:] संपूर्णः ॥

पर्वत-वसु-मुनि-शशि(१७८७)एकांत, संवतनो ए कह्यो विरतांत ।
द्वितीय भाद्रव श्वेत पक्ष जान, तिथि द्वादशी शनिवार बखान ॥१॥

श्रीमदंचलगच्छेशाः श्रीविद्यार्णवसूरयः ।
तेजःप्रतापप्रबला विचरंति महीतले ॥२॥

तच्छिष्येण प्रमोदेन लिखितं रत्नसंचयम् ।
निधानाद्यध्ययनार्थं मुनिना श्रीहिताब्धिना ॥३॥

यह पुस्तक हेतें करो, लिख्यो जु मुनिहित राय ।
वाचत हित सुख उपजें, शिवपुरको हित थाय ॥४॥

मंगलमाला अतिघणी, ज्ञानें लच्छि विशाल ।
पढो गुणो ए सांभलो, वांचो चित धरी शाल ॥५॥

श्रेयसे भवतात् ।

[2815] **मू०अन्तः**— इय चक्किअतणुमाणं हरिसेणो जयस्स बंभदत्तस्स ।
पन्नरस बारस सत्त धणु गाहा आगमे भणिआ ॥४४॥

इति श्रीरत्नसंचयग्रंथः संपूर्णः ।

स्त०अन्तः— इह चक्रवर्तिनो देहमान हरिषेणचक्री धनुष १५, जयचक्रीनो देहमान धनुष १२, ब्रह्मदत्तचक्रीनो देहमान धनुष ७ ए सर्वगाथा आगमने विषे कही ४४ मंगलं—रत्नसंचयसंग्र[ह]टबार्थो संपूर्णः ।

संवत् १७८५ ना वर्षे शाके १६५० ना प्रवर्त्तमाने काती वद ८ दिने श्रीबुधवासरे सकलपण्डितशिरोमणिपण्डित श्री५नी(नि)त्यचन्द्रगणि-शिष्यपं०श्री५जयचन्द्रगणि-शी(शि)ष्यपं०श्री५श्रीप्रीतिचन्द्रगणिना लिखितं चेलाग०जिनचन्द्रवाचनार्थम् । श्रीश्रेआ(यां)सनाथप्रशा(सा)दात् श्रीवागडदेशमध्ये श्रीआडोसरनगरमध्ये ॥

[2816] **अन्तः** –इति श्रीतपागच्छाधिराज्येन परमगुरुश्रीसोमसुन्दरसूरि–श्रीजयचन्द्रसूरि–श्रीरत्नशेखरसूरि–श्रीलक्ष्मीसागरसूरि-श्रीसुमतिसाधुसूरिपट्टालंकरणसंप्रतिविजयमानपरमगुरुश्रीहेमविमलसूरिविजयमानराज्ये श्रीमालकुलकमलहंसमालवाधिपश्रीखलचीश्रीगयासदीननृपकोशाधिकारीलघुशालिभद्रबिरुदधारिश्रीजावडाभ्यर्थनया पण्डितप्रकाण्डमण्डलीशिरोमणिपं०श्रीसाधुविजयगणिशिष्याणुना पण्डितशुभवर्द्धनगणिप्रणीतायां श्रीवर्द्धमानदेशनायाम् ॥ ५०० ॥

श्रीः सर्वतः स्फुरति यत्प्रणतेरितीव
मत्वा जयं कपटतः प्रथितद्विरूपा ।
तच्छक्तिमार्गणकृते शितिचित्रवल्ली
शिश्राय यं भवतु नाभिभर्तुः स भूत्यै ॥१॥

श्रिया समृद्धः किल मालवाख्यदेशः कथं कस्य न वर्णनीयः ।
समप्रदेशागतदुःखिलोकान् यः पालयत्यात्मपितेव शश्वत् ॥२॥

तत्राखिलश्रीललनाविलासा लीलालयो मण्डपदुर्ग एषः ।
विभाति निश्शेषवसुन्धरायाः सारस्य पिण्डो विधिना कृतः किम् ॥३॥

प्रौढावहे नतरिपुक्षितिपालबाला नेत्राश्रुवर्द्धितमहोभरशालिसालः ।
स्वीयश्रिया तु कृतवासवराज्यसंपत् भूमिपतिर्विजयतेत्र गयासदीनः ॥४॥

पात्रैरमात्रैः सुभगः सुपवशाली गुणालिकलितः समन्तात् ।
श्रीमालवंशः शुभतीह तत्तन्नृरत्नमुक्ताफलमण्डितश्रीः ॥५॥

उदाभिधस्तत्र सुधीर्महेभ्यमुख्योभवन्नान्दिलगोत्ररत्नम् ।
जाया तदीया ऊहरीति जैनधर्माम्बुधेः सल्लहरी वरेण्या ॥६॥

श्रीक्षेमराजः समभूद् विभूतिपदं तदीयस्तनयो यशस्वी ।
पुंजीति धर्म्मादिगुणैकपुंजीभूता सुशीला दयिता तदीया ॥७॥

तदंगभूर्भूरियशोविशुद्धीकृताखिलाशाजनि हापराजः ।
चांपूहृदंभोरुहराजहंसः सौभाग्यभाग्यैः स्वकुलावतंसः ॥८॥

अङ्गे ततः श्रीजगसिंहनाम धामाभिरामः कमलाविलासी ।
गाम्भीर्यधैर्यादिगुणालिशाली माउमनोम्भोजगभस्तिमाली ॥९॥

गाम्भीर्यौदार्यधैर्याद्यनणुगुणमणीसागरश्रीजिनाज्ञा-
पूतात्मा स्वार्जितार्थप्रकरजिनमतोद्द्योतकृत् कान्तकीर्त्तिः ।
श्रीगोल्हाह्वस्तदीयस्तनुजनुरमितश्रीनैराधीशमान्यः ।
सामांप्राणप्रियाभूत् भुवि सकलनिजज्ञातिशृङ्गारकारी ॥१०॥

तद्भूः श्रीमहिमूदभूपतिसभालब्धप्रतिष्ठोदयः
स्फूर्जत्कीर्त्तिलतावितानपिहितश्रेणीमहामण्डपः ।
संघेशः समभूद् विभूतिवसतिः श्रीराजमल्लः कृती
सांगूस्तस्य जनी वनीपकवती कादम्बिनी पाविनी ॥११॥

यो निन्ये सुमनांस्यहो! प्रतिदिनं धर्माभिमुख्यं क्षणात्
दूरे सन्तु सुदृष्टयः कुमतिनां मिथ्यात्वभाजामपि ।
द्वात्रिंशन्मितवृद्धटङ्कसहस्राणां व्ययात् कारितो
लक्ष्मीसागरसूरिराजसुगुरोर्येन प्रवेशोत्सवः ॥१२॥

तत्पुत्रः परमार्हतः सुकृतिनां धुर्यासरेखः स्फुरत्-
तारस्फारयशोभरः प्रतिदिनं दाता सुभोक्ता श्रियाम् ।
कारुण्यैकनिधिर्गयासनृपतेः प्रौढप्रसादावधि-
स्तत्ताद्दग्गुणसेवधिर्विजयते श्रीजावडेन्द्रः कृती ॥१३॥

एकां रत्नमयीं गिरौ जिनपतेर्मूर्तिं पुरास्थापयत्,
प्राग्वाटः [सुमति]प्रभावजलधिः सौराष्ट्रिको जावडः ।
मूर्त्ती रूप्य–सुवर्ण–पित्तलमयी संस्थापयन्नैकशो
न स्यादभ्यधिकः कथं तत इह श्रीजावडेन्द्रो ह्यसौ ॥१४॥

वापी- कूप–सरोवरादिषु जलस्थानेषु दीव्यद्दया–
हेतोर्येन बबन्धिरे गलनकान्यानन्दतः सर्वतः ।
स श्रीजावडसंघपः कृतयुगस्यैवावतारं कलौ ।
कुर्वाणः कमनीयतां कथमसौ नो याति पुण्यैः स्वकैः ॥१५॥

श्रीसुमतिसाधुसुगुरोरुपदेशं प्राप्य सुविधिना येन ।
जगदाश्चर्यंकरः श्रीजिनप्रतिष्ठोत्सवं चक्रे ॥१६॥

जीवादे- खीमादे–सुहागदेव्यश्च तद्भार्याः ।
आभिर्भार्याभिरयं भाति सुमेरुर्यथा दिग्भिः ॥१७॥

श्रीमद्घनाई[? शुभ]कुक्षिवार्द्धिजैवातृकः सर्वकलाभिरामः ।
श्रीहीरनामा तनुजस्तदीयः सौभाग्यभाग्यादिगुणैः प्रधानः ॥१८॥

इति सारपरीवारपरितो जावडः सुधीः ।
अकारयदिदं शास्त्रं स्वान्योपकृतिहेतवे ॥१९॥

क्षेत्रे पवित्रे किमवापयन्मुदा शास्त्रच्छलाज्जावडसंघनायकः ।
धर्म्मो प्रशस्यश्रियमाप्य सर्वदा के के न तृप्तिं परमां च यान्त्यलम् ॥२०॥

मुक्ताहारलता सतामभिमता श्रीवीरसद्देशना–
रूपा जावडसंघपेन रुचिरा तन्वद्गुणैः कारिता ।
कण्ठे यामधिरोप्य कः सुकृतिनां धुर्यो वरीयान् पुमान्
कामं न स्पृहणीयतामयति सन्मुक्तिश्रियः सर्वदा ॥२१॥

श्रीमत्तपागणेन्द्राः सोमसुन्दरसूरयः ।
मुनिसुन्दरसूरीन्द्राः श्रीजयचन्द्रसूरयः ।२२॥

श्रीरत्नशेखराचार्याः लक्ष्मीसागरसूरयः ।
श्रीसुमतिसाधुसूरीश्वराश्च सुखदायिनः ॥२३॥

संप्रति जयन्ति शशिगुणश्रीहेमविमलसूरीन्द्राः ।
श्रीइन्द्रनन्दिगुरवः सूरीन्द्रा कमलकलशाख्याः ॥२४॥

सूरीश्वरा इमे सर्वे शुद्धाचारजुषः सदा ।
संघेशजावडेन्द्रस्य कुर्वन्तु [वः] सुखं शान्तिम् ॥२५॥

तस्मिन् निपुणाः श्रीजिनहर्षनामसत्पण्डिताः खण्डितवादिगर्वाः ।
श्रीविंशतिस्थानचरित्र-वस्तुपालप्रबन्धादिकृतावखर्वाः ॥२६॥

तच्छिष्या विबुधेन्द्रसाधुविजयाख्याः ख्यातिमन्तो गुणैः
जेतृवादिविनोदिवादिविजयग्रन्थादिसद्वेधसः ।
तच्छिष्यः शुभवर्द्धनोल्पमतिकः श्रीजावडाभ्यर्थनां
प्राप्यैनामिह देशनां व्यरचयत् श्रीवर्द्धमानप्रभोः ॥२७॥

यावच्चन्द्र-दिवाकरौ निजकरैः सद्भासयेतां भुवं
यावत् तृप्यति वारिभिर्जलधरो धत्ते फणीन्द्रो फणैः ।
श्रीमज्जावडसाधुकारितमिदं श्रीवीरसद्देशना-
शास्त्रं पुण्यपयोनिधिजिनमते तावच्चिरं नन्दतात् ॥२८॥

इति श्रीवर्द्धमानदेशना संपूर्णा ॥६॥ यादृशं० ॥

श्रीमदूकेशगच्छे भट्टारिकश्री ६ सिद्धसूरिसंताने महोपाध्या(य)-
श्रीदेवसुन्दर-तत्पट्टे वा०श्रीज्ञानसुन्दर-तच्छिष्यचांपालिपीकृतं आंनामध्ये ।

[2826] **आदिः**— जियरागदोसेणं सिरिवीरजिणेसरेण जह सिद्धा ।
सेणियरन्नो दुलहा दुवालसंगी तह कहेमि ॥१॥

अन्तः— एसा दुवालसंगी संपत्ता जेहिं जिणवरुद्दिट्ठा ।
जायंति ते कयत्था तिलोयचूडामणी सुहिणो ॥१॥

जयसिंहसूरिगुरुणा सुयंबतरुगहणसमहिरूढेण ।
उवएसरसफलाइं खित्ताइं पुत्तसिनिहेणं ॥२॥

मज्झाओ ताणि काणि वि पगरणपिडयंमि एत्थ चिइऊणं ।
सिरिपउमदेवसूरिहिं ढोइयाइं जणहिताय ॥२॥

मइमंदयाइ जं किंचि विरइयं सुत्तमग्गमइकम्मं ।
तं सोहिय सुयनिहाणो समत्थलोगे पयासंतु ॥१॥

वृ०आदिः— श्रीपार्श्वनाथाय नमः ॥ श्रीगुरुभ्यो नमः ॥

भव्याम्भोरुहबोधनैकपटुभिः स्वैरंशुभिर्वाङ्मयै-
र्येनान्तस्तिमिरं विधूय विदधे वस्तुप्रकाशः परः ।
निस्सीमप्रथितप्रतापमहिमा नित्यप्रवृत्तोदयः
स श्रीवीरजिनस्त्रिलोकतरणिः श्रेयांसि पुष्णातु वः ॥ १ ॥

गीर्देवता दिशतु वः श्रुतवर्त्म यस्या
ज्योतिर्मयैरिव मुखेन्दुभिरुदंशुजालैः ।
अंतःस्फुरद्धृदयकन्दरसंचरिष्णुः
मुष्णाति विभ्रमतमः प्रणिधानभाजाम् ॥ २ ॥

अगद्वन्थैस्तैस्तैर्गणधरगुणोघैस्तिलकितान्
गुरून् वन्दे प्रीतः श्रुतजलधिपारप्रणयिनः ।
शिशुप्रेम्णा सोहं निबिडजडिमग्रन्थिरपि यैः
प्रसादस्मेराक्षैर्विबुधपदवीं लम्भित इमाम् ॥ ३ ॥

श्रीपद्मदेवाभिधसूरिपुंगवैः स्फुटं निबद्धस्य यथोपदेशतः ।
विरच्यते साधु विवेकमञ्जरीनाम्नः प्रबन्धस्य मया विवेचनम् ॥ ४ ॥

वृ०अंतः— इति श्रीपद्मदेवप्रभसूरिविरचिता विवेकमञ्जरीसूत्रवृत्तिः समाप्ता ॥

आसीच्चन्द्रकुलावतंसकरिणश्चारित्रचूडामणिः
श्रीदेवाख्यमुनि(?नी)श्वरस्तदनु च श्रीनेमचंद्राभिधः ।
तस्यो[द्]द्योतननामकोजनि यशोदेवाख्यसूरिस्ततः
सर्वांगीणगुणौघरत्नजलधिः श्रीसर्वदेवाह्वयः ॥ १ ॥

एतस्मा[ज्]जयसिंहसूरिरखिलाचार्यावलिग्रामणी–
र्जज्ञे धर्मविधेः प्रबन्धनिपुणश्रेष्ठो विशिष्टाशयः ।
दीप्यद्दीपशतैरिवामलहरैं रत्नैरिवार्णोपते–
र्यस्मादु[ज्]ज्वलशिष्यरत्नविरहैर्भूयोभिरभ्युद्गतम् ॥ २ ॥

शिष्यास्तस्य तरोरिवायतचतुःशाखोपमाना इमे
श्रीचंद्रप्रभू(?भ)सूरिरित्यघरथश्रेणीच्छिदां कुञ्जरः ।
श्रीभद्रेश्वरसूरिरद्भुतगुणश्चारित्रिणामग्रणी[:]
श्रीमच्छीलगणप्रभुर्गणधरः श्रीपद्मदेवाभिधः ॥ ३ ॥

तत्राद्यः कलिकालकुञ्जरकराक्रान्तागमैका स्थितिः
क्षोणीपालसुतप्रपालनपटुः श्रीचंद्रसूरिप्रभुः ।
रत्नाधारतयात्मनि प्रमुदिता धात्री क्षितीशाग्रतो
यद्वादीन्द्रजयक्षणेऽङ्कुरमिषादुर्वासु रोमांचिता ॥ ४ ॥

तत्पट्टे च युगप्रधानगणभृच्चूडामणेर्विश्रुतः
स्या[द्वा]दीन्द्रविचित्रदुष्करतपश्चारित्रपूतात्मनः ।
स्मृत्वा तं जयसिंहभूपतिरहो यस्यांह्रिपद्मद्वयीं
दुःखादुद्धृतवानभूदिह विभुः श्रीधर्मघोषाभिधः ॥ ५ ॥

पूज्यः श्रीजयसिंहनामगणभृत्पट्टप्रतिष्ठोदयाः
श्रीमच्चन्द्रकुलावचूलसुहृदः सौहार्दलीलाभुवः ।
सश्रीकः प्रभुपद्मदेवगुरवो यन्नाम संस्मर्यते
मन्त्रादप्यतिशायिपर्वणि जनैर्दुःखासिकायामपि ॥ ६ ॥

तत्पट्टप्रथितोदयाः समुदिताः श्रेयःपरिस्फूर्तये
जायन्ते च यशस्विनः कलियुगश्रीगौतमस्वामिनः ।
श्रीदेवप्रभसूरिपूज्यचरणा येषां चरित्रावलीं
श्रुत्वा कम्पयते न मस्तकमहो कस्को जनः क्ष्मातले ॥ ७ ॥

पद्मदेवाभिधाः पूज्या द्वादशांगीप्रकाशकम् ।
विवेकमञ्जरीसूत्रं सूत्रयामासुरु[ज्]ज्वलम् ॥ ८ ॥

श्रीदेवप्रभसूरिभिर्विवरणग्रन्थेऽर्द्धनिर्मापिते
स्वर्गं प्राप्नुवतां च तत्रभवतां तेषां समादेशतः ।
सश्रीकैरकलंकदेवमुनिपैः पूज्यप्रसादादयं
चिन्तारत्नसहोदरैः शुभकृते निष्ठां परां लम्भितः ॥ ९ ॥

अद्वैतश्रुतवैभवव्यतिकरै[:] श्रीमन्महेन्द्रप्रभा-
चार्यैः शोधित एष निर्मलतमप्रज्ञाविलाशै(सै)स्तथा ।
श्रीशान्तिप्रभसूरिभिश्च यदिह स्याद् दुष्टमज्ञानत-
स्तत् सर्वं परिसो(?)शोधयन्तु सुधियः सिद्धान्तशुद्धाशयाः ॥ १० ॥

सुविनीतभक्तवाचकविशालकीर्त्तिगणिसाधुशिष्यस्य ।
एकान्तिकसांनिध्याद् ग्रन्थोस्माभिः समाप्तोयम् ॥ ११ ॥

पण्डितहेमप्रभगणिशोधन-लिखनाद्यनेकसाहाय्यात् ।
अन्त्यसहश्रा(?स्रा)श्चाष्टौ रचिता दिव्येन सौख्येन ॥ १२ ॥

श्रीमद्विक्रमभूपतेरतिगते लेश्याजगत्सौगता
भिप्रेतायतनप्रमाणसमये (१६१६) ? संघप्रसादादयम् ।
शुक्ले कार्त्तिकमासि मूलतरणौ सत्पंचमीवासरे
लक्ष्मीवत्यणहिल्लपाटकपुरे प्राप्तः प्रतिष्ठां पराम् ॥ १३॥

इति श्रीविवेकमञ्जरीवु(?वृ)त्तवृत्तिः संपूर्णा ।

स्त०आदिः— श्रीमत्पार्श्वजिनं नत्वा श्रीगोडि(डी)श्वरसंज्ञकम् ।
श्रीविवेकमञ्जरीग्रंथस्यार्थोऽयं लिख्यते मया ॥ १ ॥

स्त०अन्तः— श्रीमान् विक्रमादित्य राजा थकी गयें थके छ लेश्या जगत् बौध-दर्शनें मान्या जे चरनां (?) प्रमाण संख्यनें समयें संवत् १६१६वर्षे(?) श्री चतुर्विधसंघना महिमाथी ग्रंथ उज्ज्वल पक्षें कार्त्तिकमासें रविवारें भली पंचमीने दिवसें संपदावंत जे अणहिल्लपाटकनगरने विषें पाम्यो संपूर्णता उत्कृष्टी प्रतें सर्व पूरो थयो ॥ १३ ॥

ए रीते श्रीविवेकमञ्जरीसूत्रनें वृत्ति संपूर्ण थयुं ।

श्रीपण्डितश्री१०८ श्रीमंत पं० नेमविजयगणि–तत्शिष्यपण्डित-प्रवरश्री१०५ श्रीपं०ज्ञानविजयगणि–तत्शिष्यपं०भक्तिविजयपं०चतुर्विजय-

मु॰मोतीविजय भ्रणे मली ए पुरुं कर्युं छइं । श्रीव्हाणसमामध्ये श्रीमहेवाजी-प्रसादात् मंगलमालिका वृत्तिः संपूर्णाः संवत् १८५४ मा वर्षे शाके १७१९ प्रवर्त्तमानें मासोत्तममासे शुक्लपक्षे कार्तिकसुदि २ दिनें सनिवारे श्रीव्हाणसमामध्यें संपूर्ण कर्युं छे ।

[2837] **अन्तः—** इति अढारशीलांगरथः संपूर्णः ॥

संवत् १७६५ वर्षे कार्त्तिकमासे सितपक्षे नवमीकर्म्मवाट्यां कुजवारे सकलपण्डितशिरोमणिश्रीराकापक्षराजीवविबोधनप्रभापतिसमानपण्डितश्री१९ श्रीमहिमाप्रभसूरि–शिष्यसकलविद्यानिधानपं॰भावरत्नचरणाब्जचंचरीकेण मुनिहेमचंद्रेण लिखितोयं श्रीमत्पत्तनपत्तने ॥

[2913] **स्त॰अन्तः—** इति श्रीसंबोधसत्तरि संपूर्णम् ॥

संवत् १८९४ रा मिति ज्येष्ठ वदि १४दिने लिपीकृतं श्रीविक्रम-पुरवरे ग्रंथाग्रंथ ९०८।।श्रीः ॥

[2933] **अन्तः—** सोहं वृत्तिं प्रगुरुभिरिमां कर्तुमारब्धमात्रां
तत्पादाब्जस्मरणसहसा मुग्धधीरप्यकार्षम् ।
तद् यत् किञ्चिद् रभसवशतो दृब्धमस्यामशुद्धं
तत् संशोध्यं मयि कृतकृपैः सूरिभिस्तत्त्वविद्भिः ॥ १० ॥

वृत्तिं रचयता चैतां सुकृतं यन्मयार्जितम् ।
भवे भवेहं तेन स्यामर्हद्धर्म्मैकलालसः ॥ ११ ॥

शतद्वादशकेब्दानां गते विक्रमभूभुजः ।
इयं विनिर्ममे वृत्तिः सप्तसप्ततिवत्सरे(१२७७)॥१२॥

अष्टावेव सहस्राणि(८०००) तिष्ठन्त्यस्यामनुष्टुभाम् ।
प्रत्यक्षरेण संख्यानादिति निश्चितवानहम् ॥ १३ ॥

यावद् विजयते तीर्थं श्रीमद्वीरजिनेशितुः ।
तावदेषा मरालीव खेलतात् कृतिमानसे ॥ १४ ॥

एकोप्यनेकतां धर्मो यदागमभटोद्भुतः ।
जयत्येकांतलीलामप्यन्यान् वीरः स वः श्रिये ॥ १ ॥

विद्याधरश्रेणिधरो धरो यद्गुणः क्षमाभृद्गुणवर्णनीयः ।
पूर्वापराम्भोधिरमकम(?)श्रीः श्रीमालवंशो रजताद्रिरस्ति ॥ २ ॥

छाडाभिधस्तत्र कीर्त्या विशालः आसीन्न्यासीकृत्य पुण्यं स्ववित्तम् ।
सप्तक्षेत्र्यां सर्वलोकप्रसिद्धं चापल्यांकं यः प्रमार्ष्टि स्म लक्ष्म्याः ॥ ३ ॥

बभूव तस्यामितसंगतांगलावण्यलीलाजितकामकान्ता ।
सती प्रिया रांभलीनामधेया ध्येयार्हदंह्रिद्वयपद्महंसी ॥ ४ ॥

गुणैरुदारः सुकृतावतारःपरोपकारव्रतभारसारः ।
तदंगजो भक्तिभरावनम्रो सिंहाभिधानो जयति पृथिव्याम् ॥ ५ ॥

कुलद्वयानंदकरी बभूव तत्प्रेयसी प्रेमवती गुणाढ्या ।
सदा सदाचाररता प्रवीणा सिंगारदेवी जिनधर्मसी(शी)ला ॥ ६ ॥

श्रुत्वा गुरोर्वेलिगसाधुरेवं स्वोपात्तवित्तं सफलं चिकीर्षुः ।
सम्यक्त्ववृत्तेः सुकृतप्रवृत्तेः प्रदीपिका [स्याद्] लघुपुस्तिकेयम् ॥ ७ ॥

कर्णातिथीकृत्य जिनागमस्य रहस्यमुच्चैस्तरभावशुद्धया ।
सद्धर्मतत्त्वार्थनिरूपणाय व्यधापयत् पुस्तकवाचनं सः ॥ ८ ॥

संवत् १४९१ वर्षे आषाढशुदि ८ अष्टम्यां तिथौ सोमवासरे अद्येह श्रीस्तंभतीर्थपुरवास्तव्यश्रीश्रीमालज्ञातीय०सिंघाभार्याश्रा०हेबू-तयोः सुत-ठ० वेलाकेन श्रीसम्यक्त्वप्रकरणवृत्तिपुस्तकं लिखाप्य श्रीश्रीपूर्णिमापक्षीय-श्रीमुनिशेखरसूरितत्पट्टालङ्करणगच्छनायकश्रीश्रीसाधुरत्नसूरीणां निजगुरूणां प्रदत्ता। अद्येह स्तंभतीर्थे वास्तव्यलेखककामदेवेन लिखितम् ॥

[2934] **मू०आदिः—** पत्तभवन्नवतीरं दुहदवनीरं सिवंबतरुकीरं ।
कंचणगोरसरीरं नमिऊण जिणेसरं वीरं ॥१॥

वुच्छं तुच्छमईणं अणुग्गहत्थं समत्थभव्वाणं ।
सम्मत्तस्स सरूवं संखेवेणं निसामेह ॥२॥

वृ०आदिः— यद्वक्त्राम्भोजवाप्याः स्फुटवचनघटीयन्त्रधारेण निर्यत्-
सूरिश्रेणिप्रणालीप्रणयिगुरुगुणप्रोच्छलच्छीकरौघः ।
तत्त्वाम्भोद्यापि सिंचन् सफलयतितमां शासनोद्यानमेतत्
तं भक्त्या नौमि नम्रत्रिजगदधिपतिं श्रीजिनं वर्द्धमानम् ॥१॥

श्रुतसारस्य सम्यक्त्वग्रंथस्यार्थगरीयसः ।
सुबोधां वृत्तिमाधास्ये मुक्त्वा संक्षेप-विस्तरौ ॥२॥

किन्तु ग्रन्थेष्वभिज्ञाः शृणुत शुभधियः सावधानं विधाय
स्वान्तं तत्त्वप्रकाशो भवति गुणवति श्रोतरि श्राव्यमाणे ।
तत्त्वाभ्यासानुरागा विरचयितु मां मे मतिः संप्रवृत्ता
कश्चिद् भव्योपकारो यदि परमपरा सा भवेत् पुण्यसिद्धिः ॥३॥

यद्वौतामुपकारिणीं न कलयाम्याश्रित्य बुद्ध्याधिकान्
स्पर्द्धां बन्धभृतो बुधान् सममतीनुद्दिश्य आलापिकः(?) ।
ये मात्रापि जना विहीनमतयः किं तैः पुनर्ज्ञास्यते
तां वृत्तिं गुणिनोधुना रचयितुं संदेग्धि तन्मे मनः ॥४॥

किन्तु— श्रीचं[द्र]प्रभ[सूरि]गुम्फितगिरामर्थे क्षणे तत्परं
चेतः किञ्च वचस्तदर्थभणनात् पूतात्म संपत्स्यते ।
कार्यस्तस्य विलेखनेन भविता व्यापारसारस्ततः
सिद्धं मे परमार्थतः फलमिदं सत्कर्मलोमात्मनः ॥५॥

वृ०अन्तः— इति पूज्यश्रीचक्रेश्वरसूरिप्रारब्धायां तत्प्रशिष्यश्रीतिलकाचार्यनिर्वाहितायां सम्यक्त्ववृत्तौ समर्थितं पञ्चमं तत्त्वतत्त्वम् ॥
तत्समाप्तौ च समाप्ता सम्यक्त्वप्रकरणवृत्तिरिति ॥श्रीः ॥

तीर्थे वीरविभोः सुधर्मगणभृत्संतानलब्धोन्नति-
श्चारित्रोज्ज्वलचन्द्रगच्छजलधिप्रोल्लासशीतद्युतिः ।
सम्यक्त्वाभिधशास्त्रसूत्रनगरीसंसूत्रणासूत्रभृत्
श्रीचन्द्रप्रभसूरिरद्भुतमातर्वादीभसिंहोभवत् ॥१॥

तत्पट्टलक्ष्मीश्रवणावतंसाः श्रीधर्मघोषप्रभवो बभूवुः ।
यत्पादपद्मे कलहंसलीलां दधौ नृपः श्रीजयसिंहदेवः ॥२॥
तत्पट्टोदयशैलशृङ्गमभजत् तेजस्विचूडामणिः
श्रीचक्रेश्वरसूरिरित्यभिधया देवस्त्विषामीश्वरः ।
यः सम्यक्त्वसरोजकोरकममुं नेतुं विकासश्रियं
व्याख्या[ता]पि विनेयषट्पदमुदे व्यापारयामासिवान् ॥३॥

प्राप्ताचार्यपदैश्वर्याः षड्विनेयाः स्वदीक्षिताः ।
भूषयन्ति स्म तत्पट्टं साम्राज्यमिव षड्गुणाः ॥४॥
तेष्वादिमः सुमतिसिंहगुरुर्बभूव दिक्कूलमुद्वहयशस्तटिनीगिरीन्द्रः ।
विद्यावधूवदनकैरवपूर्णचन्द्रश्चन्द्रोज्ज्वलस्वगुरुगच्छधरावराहः ॥५॥
श्रीबुद्धिसागरगुरुः प्रथितो द्वितीयः श्रीमांस्तृतीयगणभृत् त्रिदशप्रभाख्यः ।
श्रीतीर्थसिंह इति सूरिवरश्चतुर्थः प्रज्ञातिरेककुलिशक्षतवादिशैलः ॥६॥
श्रीमान् शिवप्रभः सूरिः समजायत पञ्चमः ।
परं कुतूहलमिदं यन्न रागाधिभूरभूत् ॥७॥
कीर्त्तिप्रभाभिधानश्च षष्ठोभूद् गणभृद्वरः ।
निःशेषं वाङ्मयं व्याप यस्य सूक्ष्मापि शेमुषी ॥७॥
श्रीशिवप्रभसूरीणां शिष्यलेशोस्मि मन्दधीः ।
नाम्ना श्रीतिलकाचार्यः श्रुताराधनगृद्धिभाक् ॥९॥
सोहं वृत्तिं प्रगुरु० ।

इति श्रीसम्यक्त्वरत्नमहोदधिः संपूर्णः ॥

संवत् १५०४ वर्षे आसो सुदि १० सोमवारे साधुपूर्णिमागच्छे चन्द्रप्रभसूरिसंताने भ० श्रीपुण्यचन्द्रसूरि–शिष्यगणिवरजयसिंहगणिना राणपुरनगरे सम्यक्त्वरत्नमहोदधिग्रन्थपुस्तकं लिखितम् ॥

संम(व)त १९५७ मीती माहा सुदी ९ ग्रन्थाग्रन्थम्-९००० ॥श्री॥

[2935] वृ० आदिः—चञ्चच्चन्द्रमरीचिचारुरुचिरा विश्वंभरा राजते
कीर्तिर्विष्टपचन्द्रशेखरशशी(शि)शीतांशुशीतत्विषम् ।
यः शुद्धाशयशुद्धबुद्धिविभवो धीरो विनीत्युद्भवं
वीरं नौमि नमत्सुरासुरशिरो घृष्टांह्रिविश्वाग्रणीः ॥१॥

येषामास्यारविन्दागमसुपरिमलास्वादशिष्यालिमाला
मत्ता मूकापि धत्ते मधुरमुखरतामेवमंहिप्रसादः ।
चञ्चत्स्वर्गापवर्गप्रभवसुसुखदो देहिनां मानवो ये
भासन्ते चारुगोभिस्त्रिभुवनमखिलं लीलया कामदाभिः ॥२॥

तेषां परमगुरूणां नत्वा पदपंकजं स्फुटां वक्ष्ये ।
वृत्तिं दर्शननाम्नः शास्त्रस्य हितां सुखबोधाम् ॥३॥

सुगृहीतनामधेयो भगवान् श्रीचंद्रप्रभसूरिर्दर्शनशुद्धिनामकं शास्त्रं चिकीर्षुर्मंगलसंबन्धाभिधेयप्रयोजनप्रतिपादनप्रतिबद्धमादाविदं गाथाद्वयमाह—पत्तभवं० ।

वृ० अन्तः— संप्रति पुनरपि शास्त्रगतोपदेशमाह—
एयं दंसणसोहिं सव्वे भव्वा पढंतु निसुणंतु ।
जाणंतु कुणंतु [ल]हंतु सिवसुहं सासयं झत्ति ।

अस्या व्याख्या—एतां दर्शनशुद्धिं सर्वेपि भव्याः पठन्तु सूत्रतो निश्रृण्वन्तु अर्थतः जानन्तु पुनः पुनरभ्यासतः ।

यः कन्दर्प्पतरोः कुठारललितो लीलाजितेभ्यः प्रभु-
र्यस्याशेषसुरासुरेन्द्रशिरसा पादद्वयं घृष्यते ।
हेलान्दोलितमन्दि(न्द)रो जिनपतिः श्रीवर्द्धमानोनघ-
स्तीर्थस्यास्य विभुर्जगन्नयनतो जीयाज्जगद्भास्करः ॥१॥

स्यात् तस्याथ भवाटवीसुगहने नानाकुतीर्थिव्रजो-
त्सर्प्पत्श्वापदभीतिके कटुरटन्मेहोग्रघूकाकुले(?) ।
नानाजीवमहीतले तव गणोत्सर्प्पत्कुजौघाकरे
व्याध्यादि[सु] महातिदुःखगहना मोल्लासितापोषिकम् ॥२॥

शीलोत्तुंगविशालपालिकलितं सच्छ्रावक-श्राविका-
नानावृक्षवृतं समस्तसुतपःस्वाध्यायनीराकरम् ।
नानालब्धिरथांगपक्षिनिवहोल्लासिप्रकोलाहलं
प्राणित्राणदतीर्थचारुसुसरस्तस्थोग्रसदर्प्पणम् ॥३॥

तस्मिन्नुप्रविशालशीलकलितस्वाध्यायध्यानोद्यतो-
त्सर्प्प[च्]चारुतपःसुसंयमयुतः श्रेय[:]सु[सा]ध्वालयः ।
सल्लीलांगदल[त्]कलंकविकलो ज्ञानादिगन्धोद्धुरः
सेव्यादेव नृपे द्विरेफसुततेः श्रीचन्द्रगच्छेऽम्बुजः ॥४॥

तस्मिंस्तीर्थविभूषकेभवदथ श्रीसर्वदेवः प्रभुः
सूरिः शीलनिधिर्धियार्जितमरुत्सूरिः सतामग्रणीः ।
तस्याप्युद्गतचारुचम्रदमलोत्सर्प्पद्गुणौघास्पदं
स्याच्छिष्यो जयसिंहसूरिरमलस्तस्यापि भूभूषणम् ॥५॥

हेलानिर्जितवादिवृन्दकलिकालाशेषलुसमता-
चारोत्सर्प्पितसत्पथैककदिनः सिंहः कुमार्गद्विपे ।
चञ्चच्चञ्चलचित्तवृत्तिकरणग्रामाश्व घातो बभूः (?)
श्रीचन्द्रप्रभसूरिचारुचरितश्चारित्रिणामग्रणीः ॥६॥

ज्ञानादित्रयरत्नरोहणगिरि[:] सच्छीलपाथोनिधि-
र्धीरो श्रीधनसाधुसंहतिपतिः श्रीधर्मभृद्धारकः ।
स्यात् सिद्धांतहिरण्यघर्षणकृते पट्टः पटुः शुद्धधीः
शिष्यो गच्छपतिः प्रतापतरणिः श्रीधर्म्मघोषप्रभुः ॥७॥

तच्छिष्यविमलगणिना कृतिना भ्रात्रानुजेन शास्त्रस्य ।
अस्योच्चैर्वृत्तिरियं विहिता साहाय्यतः सुधियाम् ॥८॥

निजशिष्यविजयसेनाभिधगणिविहिताद्विधाय मय्यासु(शु) ।
करुणामतिगीतार्था विशोध्य विस्तारयन्त्वेनाम् ॥९॥

श्रीवटपद्रकपत्तनविहितावासेन चतुरशीत्यधिकैः ।
एकादशैः शतैर्गत(ताद्) विक्र[म]कालात् तथा चैत्रे ॥१०॥

वदिपक्षचतुर्दश्यां विहितेयं वृत्तिरमलबोधा ।
यस्याः स्तुत्यार्जितपुण्यं भव्यासुमतां ममापीह ॥११॥

या विश्वाशेषवस्तुप्रकटनकरणे भातु तुल्या सुपुंसां
यस्याः संपर्कमात्राद् सुखममलं लीलयासादयन्ति ।
यामाराध्यातिमूर्खा अपि जननिवहाः पण्डिता विश्ववन्द्या
जायन्ते तां नमामि त्रिभुवनविनुतां भारतीं भावतोहम् ॥१२॥

यस्याः प्राप्य प्रसादं जडमतिविभवेनासुवृत्तिः प्रशस्ये-
दक्षा विद्वज्जनानाममलसुमनसां मोददा चित्तवृत्तेः ।
नानाविद्याप्रपञ्चप्रगुणगुणाशेषलब्धे प्रकाशे
जीयाज्जैनैः शशाङ्कः प्रथमरुहकृते भारतीबीजकल्पाः(?) ॥१३॥

यावद् पाथोधयोऽयं सुरगिरिरखिललोकलोकोदरस्थो
यावद् द्वीपोथ जम्बूस्त्रिभुवनतिलकः पूर्णचन्द्राकृतिश्च ।
यावज्जैनोऽत्र धर्म्मः प्रभवति शशी भूतलं तावदेनां
भव्याः शृणवन्तु श्रव्यां विषयविमुखतापादिकां बोधिकां च ॥१३॥

संवत् १९५९ वर्षे फाल्गुणे मासे ती(ति)थौ वदी १२ मंगल-
वार लिपीकृतं मया कीसनकरण-पुत्ररीद्धोकरणका नागोरमा रहीश ॥

[2936] कृ०आदिः— सच्चामीकरबन्धुरोद्धुरतरस्कन्धस्फुरद्दोर्लतः
प्रोद्यत्कुन्तलकान्तकान्तिलहरीस्वच्छाश्मगर्भच्छदः ।
दन्तोद्द्योतसुजातमौक्तिकसुमः स्वेच्छानुरूपं फलन्
कल्पद्रुर्वृषभप्रभुर्विजयते व्याख्यासु साक्षादिव ॥१॥

उर्व्यामुर्व्यस्ति भीतिर्मम मृगपतितस्तत्किमाकाशदुर्गे
चन्द्रं सेवे न तत्रापि हि भयमधिकं सिंहिकेयग्रहान्मे ।
इत्थं ध्यात्वा मृगो यत्क्रमकमलयुगं स्वान्यरक्षातिदक्षं
कक्षीचक्रेऽङ्कदम्भात् स भवतु भविनां शान्तये शान्तिनाथः ॥२॥

यावाकर्णनमात्रतोऽप्यरतिदौ वर्गान्तसंस्थौ न-मौ
वर्णौ वीक्ष्य कृपावशादतितरां तद्गौरवाय क्रमात् ।
कृत्वा यौ स्वरसंयुतौ विनिहितौ स्वीयेऽभिधानेऽनघे
स श्रीनेमिजिनेश्वरो भवभृतां देयादमन्दां मुदम् ॥३॥

सिद्धान्तोन्नतिशालिनो नयचयप्रोर्जस्विगर्जाजुष-
श्छन्दो-व्याकरण-प्रमाणसुमहःसौदामिनीमालिनः ।
सिन्चन्तो निखिलं धरित्रिवलयं व्याख्यामृतोद्वर्षणैः
श्रीमन्तो गुणशेखराख्यगुरवो नन्दन्तु मेघा इव ॥७॥

ढिल्ल्यां साहिमहम्मदं शककुलक्ष्मापालचूडामणिं
येन ज्ञानकलाकलापमुदितं निर्म्माय षड्दर्शिनी ।
प्राकाश्यं गमिता निजेन यशसा साकं स सर्व्वागम-
ग्रन्थज्ञो जयताज्जिनप्रभगुरुर्विद्यागुरुर्नः सदा ॥८॥

एतेषां गुणशालिनां पदपयोजन्मद्वयी सेवनात्
संजाताधिगमः स संघतिलकाचार्यो जडोऽप्यंजसा ।
पूर्वाचार्यकृतेर्विचारचतुरज्ञातार्थसार्थोद्गतेः
सम्यक्त्वाप्रसप्ततेर्विवरणं कर्त्तास्मि संक्षेपतः ॥९॥

सू० अन्तः— अत्र शिवशब्दोपादानं सूत्रयता सूत्रकृता शास्त्रप्रांते मंगलसूचा कृता, यतो मंगलादीनि मंगलमध्यानि मंगलावसानानि शास्त्राणि विदुषामुपादेयानि निःश्रेयसः साधकानि च भवन्तीति गाथार्थः ॥

या श्रीजिनेन्द्रसमयाम्बुधितो गृहीत्वा
सम्यक्त्वतत्त्वमणिसप्ततिका व्यधायि ।
पूर्वैर्मुनीश्वरवरैरधुना मया तु
सोत्तेजिता विवृतिशाणकयन्त्रयोगात् ॥१॥
जैनं वाक्यमनन्तार्थं शेमुषी त्वतिदुर्बला ।
अत उक्तं यदुत्सूत्रं तन्मिथ्या दुष्कृतं मम ॥२॥

इति श्रीरुद्रपल्लीयगच्छगगनमण्डनदिनकरश्रीगुणशेखरसूरि-पट्टावतंसश्रीसंघतिलकसूरिविरचितायां सम्यक्त्वसप्ततिकावृत्तौ तत्त्वकौमुदीनाम्न्यां सम्यक्त्वस्थानषट्कस्वरूपनिरूपणो नाम द्वादशमोऽधिकारः समाप्त. । ग्रन्थाग्रम् ५३६, अ० २५ । समाप्ता चेयं सम्यक्त्वसप्ततिकावृत्तिस्तत्त्वकौमुद्यभिधाना ।

अथ प्रशस्तिः—

श्रीवीरशासनमहोदधितः प्रसूतः
प्रोद्यत्कलाभिरभितः प्रथितः पृथिव्याम् ।
मायन्महःप्रसरनाशिततामसोस्ति
श्रीचन्द्रगच्छ इति चन्द्र इवाद्भुतश्रीः ॥१॥

तत्रासीद् धरणेन्द्रवन्द्यचरणः श्रीवर्द्धमानो गुरु-
स्तत्पट्टे च जिनेश्वरः सुविहितश्रेणीशिरःशेखरः ।
तच्छिष्योऽभयदेवसूरिरभवद् रञ्जनवाङ्गीमहा-
वृत्ति-स्तम्भनपार्श्वनाथजिनराड्मूर्तिप्रकाशैककृत् ॥२॥

तत्पट्टपूर्वाचलचूलिकायां भास्वानिव श्रीजिनवल्लभाख्यः ।
सच्चक्रसंबोधनसावधानबुद्धिः प्रसिद्धो गुरुमुख्य आसीत् ॥३॥

तच्छिष्यो जिनशेखरो गणधरो जज्ञेतिविज्ञाग्रणी-
स्तत्पादांबुजराजहंससदृशः श्रीपद्मचन्द्रप्रभुः ।
तत्पट्टाम्बुधिवर्द्धनः कुवलयप्रोद्यत्प्रबोधैकधीः
श्रीमान् श्रीविजयेन्दुरिन्दुवदभूच्छश्वत्कलालंकृतः ॥४॥

पट्टे तदीयेऽभयदेवसूरिरासीद् द्वितीयोपि गुणाद्वितीयः ।
जातो यतोयं जयतीह रुद्रपल्लीयगच्छः सुतरामतुच्छः ॥५॥

तत्पादाम्भोजभृङ्गोजनि जिनसमयोम्भोधिपाथोधिजन्मा
सूरीन्द्रो देवभद्रोनुपशमरमारामवमेघोपमानः ।
तस्यान्तेवासिमुख्यः कुमतमतिलमश्चण्डमार्तण्डकल्पः
कल्पद्रुः कल्पितार्थप्रवितरणविधौ श्रीप्रभानन्दसूरिः ॥६॥

ज्योतिस्तोमैरमानैः प्रतिहतजगतीवर्तितेजस्वितेजः-
स्फूर्त्ती तत्पट्टपूर्वाचलविमललसन्मौलिमौलीयमानौ ।
श्रीमान् श्रीचन्द्रसूरि-विमलशशिगुरुश्चाप्रमेयप्रभावौ
जातौ श्रीराजहंसाविव भविकजनव्यूहबोधैकदक्षौ ॥७॥

आकाश्मीरमरीणचारुधिषणान् वादीन्द्रवृन्दारकान्
माद्यद्वादविधौ विजित्य जगति प्राप्तप्रतिष्ठोदयाः ।
सूरीन्द्रा गुणशेखराः स्मयहराः शृङ्गारचन्द्रक्षमा-
नाथाभ्यर्च्यपदाम्बुजाः समभवंस्तत्पट्टशृङ्गारिणः ॥८॥

श्रीसंघतिलकाचार्यास्तत्पदाम्भोजरेणवः ।
सम्यक्त्वसप्ततेर्वृत्तिं विदधुस्तत्त्वकौमुदीम् ॥९॥

अस्मच्छिष्यवरस्य सोमतिलकाचार्यानुजस्याधुना
श्रीदेवेंद्रमुनीश्वरस्य वचसा सम्यक्त्वसत्सप्ततेः ।
श्रीमद्विक्रमवत्सरे द्विनयनांभोधिक्षपाकृत्(१४२२)प्रमे,
श्रीसारस्वतपत्तने विरचिता दीपोत्सवे कुर्वता ॥१०॥

सा सोमकलशवाचकवरानुजैरत्र विहितसाहाय्यैः ।
प्रथमादर्शे लिखितोपाध्यायश्रीयशःकलशैः ॥११॥

मेधामान्द्यात् प्रमादाच्च यदवद्यमिहाजनि ।
तत् प्रसद्य महाविद्याः शोधयन्तु विशारदाः ॥१२॥

द्वादशात्मैव सद्वारैर्द्वादशात्मेव बोधकृत् ।
इयं सम्यक्त्वतत्त्वानां कौमुदी द्योततां भुवि ॥१३॥

प्रशस्तिश्लोक २५ अ०२२ । अथ सकलं ग्रन्थमानम्-

प्रत्यक्षरं निरूप्यास्या ग्रन्थमानं विनिर्मितम् ।
रुद्राद्रिमुनि(७७११)संख्याका[:]श्लोकाः सचतुरक्षराः ॥१॥

अनेन श्लोकेन सह ग्रन्थमानम् ७७११ अक्षर ४॥

अथ संवत्सरेऽस्मिन् श्रीविक्रमादित्यराज्ये १४८९ वर्षे पौषसुदि ३॥

[2940] मू० अन्तः— इति दर्शनसप्ततिका समाप्ता । लिखिता श्रीसोमजयसूरिशिष्येण श्रीपत्तन-
नगरे ॥

अव० अन्तः—इति सम्यक्त्वसप्ततिकावचूरिः ॥ पत्तननगरे लिखिता ॥
पं० आनन्दसहजगणिलिखिता ॥श्री॥

[2941] अन्तः— शशि-रस-मुनि-रसवर्षे(१६७६) पौषे शुक्ले त्रयोदशीदिवसे ।
सुरतिबंदिरमुख्ये परमार्हतसंघरमणीये ॥१४॥

इति रत्नचन्द्रनामा चकार बालावबोधमतिसुगमम् ।
सम्यक्त्वसप्ततिवरप्रकरणतत्त्वार्थबोधकरम् ॥१५॥

सूर्याचन्द्रमसौ यावत् यावत् सप्त धराधराः ।
यावत् तपागणस्तावदयं जयतु पुस्तकः ॥१६॥

इति श्रीसम्यक्त्वसप्ततिकाबालावबोधः संपूर्णः ॥

संवत् १८१८ वर्षे कार्तिकशुदि पंचमीदिने चन्द्रवारे पूर्वाषाढनक्षत्रे भ०श्रीविजयलक्ष्मीसूरीश्वरविजयमानराज्ये भट्टारकश्रेष्ठ भ० श्रीसौभाग्यसूरीश्वर-शिष्य पं० जीवविजयकस्यार्थे सम्यक्त्वसप्ततिकाभिधानं लिखितमिदं पुस्तकं पं० श्रीयशविजयगणि-तत्शिष्य पं० श्रीमोहनविजय[ः] श्रीस्तम्भतीर्थ(र्थे) लिखितः ॥

[2942] अन्तः— इति श्रीसम्यक्त्वप्रकरणस्य सम्यक्त्वरत्नप्रकाशबालावबोधबीजकं उपाध्यायश्री-रत्नचन्द्रगणिभिः कृतं संपूर्णमस्तु ।

संवत् १७८८ सत्तरअट्ठासीआना वरषे वइशाख मासइ शुक्लपक्षइ ३-तृतीयदिने रवेउ वारे लषितं श्रीपाटणमध्ये संघवी फतेचन्द सूरसंघः श्री-कल्याणमस्तु ॥

[2943] बा० आदिः—नत्वा श्रीपार्श्वमर्हन्तं स्मृत्वा च श्रुतदेवताम् ।
श्रीमत्सम्यक्त्वसप्तत्याः कुर्वे बालावबोधनम् ॥१॥

बा० अन्तः— इति श्रीतपागच्छालंकारसारभट्टारकश्रीहीरविजयसूरीश्वरपट्टालंकारहारसार-भट्टारक श्री ५ विजयसेनसूरीश्वर-पट्टप्रभाकरभट्टारकश्री ५ श्रीविजयदेवसूरीश्वर-विजयमानराज्ये महोपाध्यायश्रीसकलचंद्रगणि-शिष्योपाध्यायश्रीशान्तिचन्द्रगणि-शिष्यउपाध्यायश्रीरत्नचन्द्रगणिभिः श्रीसम्यक्त्वरत्नाधिष्ठान-श्रीसुरतिबंदिरादिचतुर-संघस्य चतुर्दश्यष्टम्यादिपर्वसु अप्रमत्ततया पौषधप्रतिपालनार्थं वाचनार्थं विरचिते श्रीसम्यक्त्वरत्नप्रकाशनाम्नि श्रीसम्यक्त्वसप्ततिकाप्रकरणबालावबोधसम्यक्त्व-स्थानषट्कस्वरूपनिरूपणो नाम द्वादशोधिकारः समाप्तः ।

तत्समाप्तौ श्रीसम्यक्त्वसप्ततिकाप्रकरणस्य सम्यक्त्वरत्नप्रकाशनामा बालाव-बोधः समाप्तः ॥

अथ प्रशस्तिर्लिख्यते—

श्रीवीरपट्टांबुजभास्कराभः श्रीमत्सुधर्मा गणभृद् बभूव ।
अद्यापि वाणी प्रसरीसरीति यस्य प्रभोः पंडितचक्रवाचा ॥१॥

बभूव तत्पट्टपरंपरायां सूरिर्जगच्चन्द्र इति प्रसिद्धः ।
लेभे तपागच्छ इति प्रसिद्धिं यस्माद् गणोयं प्रथितावदातः ॥२॥

परम्परायामपि तस्य जातः साधुक्रियामार्गविकाशभास्वान् ।
आनन्दपूर्वो विमलाग्रसूरिर्जगज्जनानन्दकरः प्रतीतः ॥३॥

तस्यापि पट्टे विजयाग्रदानः सूरिर्बभूव प्रबलप्रतापः ।
राशिं गुणानां किल यस्य वारांराशेः समानीकुरुते कवीन्द्रः ॥४॥

बभूव सूरिः किल तस्य पट्टे श्रीहीरपूर्वो विजयोर्जितश्रीः ।
लेभे प्रतिष्ठां किल भूयसीं यो नरेन्द्रलक्ष्मी(दिवे_न्द्र)कृतामजस्रम् ॥५॥

तस्यापि पट्टेजनि सूरिराजः सेनोत्तरश्रीविजयो यशस्वी ।
ततार जैनागमवारिराशिं नावा स्वबुद्धयोत्तमभाग्यभाग्यः ॥६॥

विजयते किल तत्पदसेवया सुलभसूरिपदः प्रणयी गुरौ ।
विजयदेवगुरुर्गरिमाम्बुधिस्तपगणे गगने किमु चन्द्रमाः ॥७॥

श्रीआनन्दविमलगुरुशिष्याः श्रीसहजकुशलनामानः ।
लुम्पाकमतमपास्याङ्गजमलमिव निर्मला जाताः ॥८॥

तेषां च शिष्यमुख्या वाचकवरसकलचन्द्रनामानः ।
चन्द्रा इव वचनसुधां वव्रुपुर्ये विबुधवरपेयाम् ॥९॥

श्रीशान्तिचन्द्रा वरवाचकेन्द्रास्तेषां च शिष्या बहुशिष्यमुख्याः ।
बभूवुरुद्दामगुणैरुपेताः प्रभावकाः श्रीजिनशासनस्य ॥१०॥

श्रीमज्जम्बूद्वीपप्रज्ञप्तेर्वृत्तिविरचनाचतुराः ।
येषां बुद्धिं सुरगुरुरपीहते विश्वगेयशुभयशसाम् ॥११॥

—गीतार्या ॥

तेषां गुरूणां गुणसागराणां प्रसादलेशं समवाप्य चक्रे ।
अनेकशास्त्रार्थविचारसारः परोपकृद् वाचकरत्नचन्द्रः ॥१२॥

सम्यक्त्वसप्तत्यमलप्रबोधं बालावबोधं पटुधीसुबोधम् ।
सम्यक्त्वरत्नप्रवरप्रकाशनामानमेनं समयानुसारात् ॥१३॥ युग्मम् ॥

रस-मुनि-रस-शशि(१६७६)वर्षे पौषशुक्ले त्रयोदशीदिवसे ।
वर्षे पौषशुक्ले १३ सुरतिबंदिरमुख्ये परमार्हतसंघरमणीये ॥१४॥

इति रत्नचन्द्रनामा चकार बालावबोधमतिसुगमम् ।
सम्यक्त्वसप्ततिवरप्रकरणतत्त्वार्थबोधकरम् ॥१५॥

सूर्याचन्द्रमसौ यावत् यावत् सप्त धराधराः ।
यावत् तपागणस्तावदयं जयतु पुस्तकः ॥१६॥

इति श्रीसम्यक्त्वसप्ततिकाप्रकरणबालावबोधः संपूर्णः । सा० अमरसी-
पठनार्थम् ॥श्रेयोस्तु ॥

[2949] (अन्यदीयहस्तेनोल्लिखितः)—

अन्तः— संविग्नसाधुमणिमंडितश्रीमाणिक्यसागरगणिप्रवरस्य शिष्यः ।
श्रीवीरसागरगणिप्रवरस्तदर्थं धर्म्मक्रियोपनिषदद्भुतमस्तु शास्त्रम् ॥१॥

श्रीविक्रमाद् गज-रस-क्षितिपांकितेब्दे(१६६८)
जीवे तृतीयतिथिगे सहमासि शुक्ले ।
पक्षेऽलिखद् द्विजजलेखक उद्धवाख्यः
पुस्तं चिरं जयति सत्सुकृतोपयोगि ॥२॥

[2950] आदिः— भत्तिभरनमिरसुरनरसिरिसेहरयणकिरणसस्सिरियं ।
नमिउं सिरिवीरपयं वुच्छं सुयहीलणुप्पत्तिं ॥१॥

अन्तः— इय सुयहीलुप्पायणफलं जणा जाणिऊण अन्नेवि ।
जसभद्दे जिणवयणे दढचित्ता होह पइदियहं ॥९॥

इय सुयहीलुप्पत्तीअज्झयणं सम्मत्तं ॥

संवत् १५८१ संवत्सरप्रवर्त्तमाने उत्तरायणे ग्रीष्मऋतौ आषाढशुदि-
१४ भौमे लिषापितम् । श्रीअणहिल्लपुरपत्तने लिषापितम् ॥

[2953] अन्तः— इति श्रीज्ञानार्णवे योगप्रदीपाधिकारे आचार्यश्रीशुभचन्द्रविरचिते मोक्षप्रकरणं समाप्तम् ॥

ज्ञानार्णवस्य माहात्म्यं चित्रं को वेत्ति तत्त्वतः ।
यद् ज्ञानात् तीर्यते भव्यैर्दुस्तरोपि भवार्णवः ॥

ग्रंथाग्रं श्लोकसंख्या २७८० । यादृशं० ।

सं० १४८५ वर्षे० कार्त्तिकसुदि ११ सोमदिने निजप्रतापप्रभावपराकृत-तरुणतरणिमंडलान् नयविनयविवेकसौराज्यरञ्जिताखण्डलानां महा[राजा]धिराज-श्रीमोकलदेवराज्यप्रवर्त्तमानानां त्रिदिवपतिपत्तनसमृद्धिस्पर्द्धिश्रीकान् श्रीमति देव-कुलवा(पा)टके श्रीनेमिनाथचैत्यालये श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे नन्दिसंघे श्रीकुन्दकुन्दाचार्यान्वये अनेकपट्टावलीविराजमाने श्रीशुभकीर्त्ति-देवपट्टान्वये धवलयशधवलमहाधवलामहासिद्धान्तसुकण्ठीकृतरायराजगुरुपोषित-जिनमतश्रीधर्मचन्द्रदेवाः तत्पट्टे उपशमसेतुचाल्यमाणेन समवसरणेन सह विराज-मानान् भट्टारकश्रीरत्नकीर्त्तिदेवाः तत्पट्टे संस्थितवान् महाराजाधिराजसुरत्राण-महम्मदसाहि-अनुरञ्जितचित्तान् तत्पट्टराजावलीसंस्थित-सुरत्राणपेरोजसाहि-अनुरञ्जितचित्तान् अनेकम्लेच्छसंस्तुतचरणकमलान् षट्तर्कचक्रवर्त्तिनिर्जितपरमत-पाषण्डिनां कृतगर्वोपहारान् भट्टारकश्रीप्रभाचन्द्रदेवान् तत्पट्टे संस्थितवान् अष्टव्याकरणीयरहस्यरञ्जितविद्वज्जनचित्तान् भट्टारकपद्मनंदिदेवान् तच्छिष्य-पाण्डित्यकमलाकमलिनीकमलबन्धून् निश्चयरत्नत्रयतन्निष्ठान् मुनिश्रीदेवेंद्रकीर्त्ति-देवान् तद्दीक्षिततपोधनउत्तमक्षमादिदशलक्षणो धर्मोद्धरप्रकटनसमर्थान् मुनिश्री-

विद्यानन्दिदेवोपदेशात् हूंवडान्वयः अनुव्रतादिद्वादशव्रतभारभरणोपेतः निर्म्मल-श्रीजिनेन्द्रचरणसरोजराजीराजहंसान् वात्सल्यदशविधवैयावृत्यकरणैकतत्परान् सा जैना-तज्जाया सम्यक्त्वगुणगणशालिनी साल्ह तयोः पुत्र सकलशास्त्रविशारदान् निजसौजन्य(? न्ये)न श्री(? स्वी)कृतशत्रुमित्रान् दानैकमहीतले कल्पवृक्षान् परोपकारकरणपरायणान् अखिलमहीतले प्रसिद्धान् साहुभोजा-भार्यावसु तयोः पुत्र धरणउ भोजाभ्राता दु(द्वि)तीय जिनचरणाराधनतद्गतचित्तान् देवपूजादि-षट्कर्म्मनिरतान् साहुगोसल-भार्याकरमी एतेषां मध्ये साधु जेजा ज्ञाना-वरणीयकर्म्मक्षयार्थे ज्ञानार्णवग्रन्थ लिक्षापि(लिखाप्य) दत्तं मुनिश्रीविद्यानंदी(दि) देवयोग्यम् ।

ज्ञानवा[न्] ज्ञानदानेन निर्भयो जयदानतः ।
अन्नदानात् सुखी नित्यं निर्व्याधिः भेषजो भवेत् ॥१॥

अपरस्मिन् भवे जीवो बिभर्त्ति सकलं श्रुतम् ।
मोक्षसौख्यमवाप्नोति शास्त्रादानफला[न्] नरः ॥२॥

लिषित्वा लेखयित्वा यः साधुभ्यो दीयते श्रुतम् ।
व्याख्यायतेथवा तेन शास्त्रदानं तदुच्यते ॥३॥

वर्द्धतां जिनशासनम् ॥

सं० १४८५ वर्षे० कार्त्तिक सुदि ११ सोमवासरे रुद्रपल्लीयगच्छे वाचनाचार्यश्रीनरचन्द्रशिष्य धीमा लि(षि)तम् । मुनिविद्यानन्दलिषितं पठनार्थम् । आचन्द्रार्कं चिरं नन्द्यात् । श्रीदेवगुरुप्रसादात् ।

(एतदनन्तरं अग्रष्टायां पङ्क्तावपि एतान्यक्षराणि पठयन्ते)—

आ० श्रीगुणचन्द । श्रीपालस्येदं पुस्तकं पं० नयाख्येन दत्तम् ॥ ग्र० सामलपठनार्थम् ॥

[2954] अन्तः— इति ज्ञानार्णवे योगप्रदीपाधिकारे आचार्यश्रीशुभचन्द्रविरचिते मोक्ष-प्रकरणं संपूर्णम् । इति श्रीशुभचन्द्रविरचितं ज्ञानार्णवग्रन्थः संपूर्णः ॥

सून्य बहू वसु हंसधर(१८१०)अस्विन वदि रविवार ।
तिथ एकादशी जानिये लिख्यो ग्रन्थ सुभ सार ॥१॥

अंबहटानगर सुभ थानिमें ज्ञानार्णव यह सार ।
लिष्यो चित्तकी उमगसों आको अत विस्तार ॥२॥

सोरठाः— पढत सुनत सुख उपजै पावत पदनिर्वान ।
अर्थसहित याको पढे उपजे अद्भुत ज्ञान ॥३॥

अडिल्लः— आचारज वधमान सुगुन अतिही भयों ।
ताको शिष्य महासिंध आचारजपद धर्यो ॥

ताको शिष्य जैगुपाल सुपदधारी भए ।
ता शिष्य मूला नामदास पद सो लए ॥४॥

[2956] आदिः— ॐ नमो वीतरागाय ॥

करणक्रमनिःक्रान्तं कर्तृ-कर्म्मादिवर्ज्जितम् ।
ध्यातृ-ध्येयपथातीतं प्रत्यग्ज्योतिरुपास्महे ॥१॥

अन्तः— इति ध्यानसारः समाप्तमिति ॥

[2960] आदिः— ॐ नमो वीतरागाय ।

सद्योगचिन्तामणितोनणीयो येनाधिजग्मे जगतः पतित्वम् ।
स योगिवृन्दारकवन्दनीयोवतादवद्यानि घनं जिनो नः ॥१॥

सुधाविन्दोरिवानन्दममन्दमुपबिभ्रतः ।
योगबिन्दोः समासेन वृत्तिरेषा विधीयते ॥२॥

गुरूपदेशो न च तादृगस्ति मतिर्नैवा काचिदुदाररूपा ।
तथापि योगप्रियतावशेन यत्नस्तदाभ्यासकृते ममायम् ॥३॥

तस्य चेदमादिसूत्रं–नत्वेत्यादि श्लोकद्वयं०

अन्तः— समाप्ता चेयं योबिन्दुप्रकरणवृत्तिः ॥ ग्रंथाग्रथम् ३५००॥ संवत् १९४४ रा फाल्गुनशुदि १५ शुभदिने लिषितम् ॥४॥

[2972] अन्तः— इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्रविरचिते अध्यात्मोपनिषन्नाम्नि संजातपट्टबन्धे श्रीयोगशास्त्रे द्वादशप्रकाशे चतुर्थप्रकाशस्य विवरणं समाप्तमिति ।

अष्टव्याकरणेषु तत्त्वमखिलं व्याचक्षते ये क्षणात्
षट्तर्कैः परितर्कयन्ति विदिता[न्] निःशेषवादिव्रजान् ।
छन्दोलंकृतसारशास्त्रनिपुणाः प्राप्तप्रतिष्ठा[ः] क्ष(क्षि)तौ
श्रीपद्मप्रभसूरयः सुगुरवोऽभूवन् भुवो [भू]षणम् ॥१॥

तेषां पदट(?ट्टे) महातेजा[ः] प्रभासनविभाकरः ।
अमरप्रभसूरीन्द्रो विजय(?यी) विनयी नयी ॥२॥

तेन श्रीयोगशास्त्रस्य वृत्तितो हृद्यगद्यकम् ।
पाहंर(?) नवैश्चारुगद्यैर्विवरणं लघुम् ॥३॥

प्रदाय वाचनाचार्यदेवसुन्दरकारिणे ।
तदिदं शास्त्रं दोषज्ञैः सो(?शो)ध्यतां मुन(?नि)पुंगवैः ॥४॥

संवत् अठरासय सताई(१८२७) मार्ग्गशिरमासे कृष्णपक्षे तिथौ द्वितीयायां सोमवासरे लिष(खि)तं स्वस्तिश्रीश्रीपूज्यसदारंगपट्टे तच्छिष्यविसपराज-त(न्)पट्टे

तच्छिष्यजेठमल्ल-तत्‌शिष्यमनोहरदासजी-तत्‌शिष्यसुन्दरदासजीतत्‌शिष्यसदान-न्दजी-तच्छिष्यजसवन्तजी – तत्‌शिष्यवर्द्धमानजी-तत्‌शिष्यमहासिंघजी-तत्‌शिष्य-श्रीपूज्यआचार्य्यजयगोपालस्वामिजी-तत्‌शिष्यपगरजपगधूर(ऋ)षि(श्री)पूज्यमूला-ऋषजी ।

दुहाः— श्रीपूज्यके शिष्यने पुस्तक लिषी प्रधान ।
पढत सुणत गुण उपजे थानेसरनगर सुथान ॥

लेषि(ख)कपठनार्थं आत्मार्थं शुभं भवतु लेषक-पाठकयोर्मि(रि)ति । मंगलं भवति कल्ला(ल्या)णं भवति ॥

[2975] बा० आदिः— श्रीवीतरागाय नमः ॥

सिद्धार्थक्षितिपालसूनुममलध्यानेन रम्यं परं
सर्वज्ञं सुरसिद्धसेवितपदद्वन्द्वं सुसिद्धिप्रदम् ।
वन्दे ध्येयसमेकममलं सद्व्यापकं सर्वगं ।
संसारार्णवपारगं भयहरं श्रीवर्द्धमानं जिनम् ॥१॥

श्रीमत्खरतरगच्छे धरणीतलशुभे पवित्रतरे ।
षट्त्रिंशद्‌गुणसहिताः श्रीमज्जिनभद्रसूरयोऽभूवन् ॥२॥

तत्पट्टे धरणिपतिसेवितचरणा विजयिनः सन्ति ।
नानालब्धिसमेताः श्रीमज्जिनचन्द्रसूरयो गुरवः ॥३॥

तेषां गुरूणां जितमन्मथानामादेशमासाद्य तु मेरुसुन्दरः ।
श्रीयोगशास्त्रस्य करोति बालावबोधनं मंगलसिद्धिकारणम् ॥४॥

बा० अन्तः— श्रीचौलुक्यकुमारपालस्याभ्यर्थनादाचार्येण श्रीहेमचन्द्रेण गिरां पथि अस्मिन् योगशास्त्रे निवेशिता० ॥

गच्छे वरे खरतरेऽतुलनामधेये सद्योगिभूपचयसेवितपादपद्माः ।
श्रीसंयुता विजयिनो जिनचन्द्रसूरिपादा नयन्ति जितमन्मथरोषदर्पाः ॥१॥

तेषां गुरूणामासाद्य प्रसादं सुखकारणम् ।
श्रीवाचनाचार्यवररत्नमूर्त्तिगणिप्रभोः ॥२॥

तत्श(च्छि)ष्यो वाचनाचार्यमेरुसुन्दर आदरात् ।
श्रीयोगशास्त्रस्य बालावबोधनमचीकरत् ॥३॥

इति परमार्हतश्रीकुमारपालभूपालशुश्रूषिते आचार्यश्रीहेमचन्द्रविरचिते अध्यात्मोपनिष[द्]नाम्नि संजातपट्टबन्धे श्रीयोगशास्त्रे द्वादशप्रकाशे श्रीखरतर-गच्छे भट्टारकश्रीजिनचन्द्रसूरिविजयिवाचनाचार्यश्रीरत्नमूर्त्तिगणिशिष्य-वा० मेरुसुन्दरगणिविरचिते श्रीयोगशास्त्रबालावबोधे द्वादशप्रकाशः समाप्तः ॥ ग्रन्थ० २५८८ ॥

[2986] अन्तः— संवत् १७०८ वर्षे कार्त्तिकशुद्ध(दि) १३ शुक्रे श्रीमूलसंघे सरस्वतीगच्छे बलात्कारगणे श्रीकुन्दकुन्दाचार्यान्वये भट्टारकश्रीरामकीर्त्तिस्तत्पट्टे भ०श्रीपद्मनन्दि-तत्पट्टे भट्टारकश्रीदेवेन्द्रकीर्त्तेरुपदेशात् मुनिश्रीधर्म्मभूषण–तच्छिष्यब्रह्मवाघजी(जि)-ष्णुना ब्रह्मलालजी–तच्छिष्य ब्रह्मसंघजिब्रह्मलाख्यकेभ्यः दत्ता त्रिभंगीकर्मक्षयार्थम् ॥

[2989] आदिः— ॐ सर्वज्ञाय नमः ॥

वन्दे देवेन्द्रवृन्दार्च्यं नाभेयं जिनभास्करम् ।
येन ज्ञानांशुभिर्नित्यं लोकालोकौ प्रकाशितौ ॥१॥

संस्तवीमि क्रमद्वन्द्वं शेषाणां तु जिनेशिनाम् ।
यत्(ज्)ज्ञानांभोधिमध्यस्थं त्रैलोक्यं पद्मसंनिभम् ॥२॥

विदधातु मम प्रज्ञां जैनशास्त्रावबोधिनीम् ।
श्रीमज्जिनमुखाम्भोजनिर्गता श्रुतदेवता ॥३॥

सिद्धान्तवारिधेश्चन्द्रं नेमिचन्द्रं नमाम्यहम् ।
यस्य प्रसादतो विश्वं हस्तस्थामलकोपमम् ॥४॥

विभाति विशदा कीर्त्तिर्यस्य त्रैलोक्यवर्त्तिनी ।
नमस्तस्मै मुनीन्द्राय श्रीमत्त्रैलोक्यकीर्त्तये ॥५॥

आकरः सर्वविद्यानां धर्म्ममार्गदिवाकरः ।
धर्म्माकार इति ख्यातः स मुनिः स्तूयते मया ॥६॥

वीरदृष्ट्यादिसेनास्यं मिथ्यात्वायरिसंहृतौ ।
अतोऽसौ वीरसेनाख्यो जीयादागमपारगः ॥७॥

पुरवाटवंशभूषणज्ञोमनतनयस्य नेमिदेवस्य ।
अभ्यर्थनयारब्धो ग्रन्थोयं भव्यबोधाय ॥८॥

अथ पञ्चगुरून् नत्वा वक्ष्ये संस्कृतभाषया ।
त्रैलोक्यसारमालोक्य ग्रन्थं त्रैलोक्यदीपकम् ॥९॥

अनन्तदेशमाकाशमनन्तं स्वप्रदेशकम् ।
तन्मध्येऽणुरिवाभाति लोकोऽसंख्यप्रदेशकः ॥१०॥

लोक्यते यत्र संघातो द्रव्याणां पृथगात्मनाम् ।
स लोकः कथ्यते सद्भिर्लोकज्ञानविदांवरैः ॥११॥

अन्तः— किं चन्द्रः किमु भास्करः किमथवा मेरुः किमम्भोनिधिः
किं धात्री सुखवर्म किं किमथवा कल्पद्रुमो विश्रुतः ।
एकैकेन गुणेन विश्रुतिपथप्रस्थायिनस्ते स्वयं
नैते शेषगुणाकरास्त्रिभुवने त्रैलोक्य[व]र्ती स्वयम् ॥४५६॥

अस्त्यत्र वंशः पुरवाटसंज्ञः समस्तपृथ्वीपतिमाननीयः ।
त्यक्त्वा स्वकीयां सुरलोकलक्ष्मीं देवा अपीच्छन्ति हि यत्र जन्म ॥४५७॥

तत्र प्रसिद्धोजनि कामदेवः पत्नी च तस्याजनि नामदेवी ।
पुत्रौ तयोर्जोमन-लक्ष्मणाख्यौ बभूवतू राघव-लक्ष्मणाविव ॥४५८॥

रत्नं रत्नखनेः शशी जलनिधेरात्मोद्भवः श्रीपते-
स्तद्वज्जोमनतो बभूव तनुजः श्रीनेमिदेवाह्वयः ।
यो बाल्येपि महानुभावचरितः सज्जैनमार्ग्गे रतः
शान्तश्रीगुणभूषणक्रमनतः सम्यक्त्वचूलांकितः ॥४५९॥

'यस्त्यागेन जिगाय कर्णनृपतिं न्यायेन वाचस्पतिं
नैर्मल्येन निशापतिं नगपतिं सत्स्थैर्यभावेन च ।
गाम्भीर्येण सरित्पतिं मलततिं सद्धर्म्मसद्भावनात् ।
स श्रीमद्गुणभूषणोन्नतिनतो नेमिश्चिरं नन्दतु ॥४६०॥

तत्सत्कारपुरस्कृतेन सततं तज्जैनतादर्शनात्
संतुष्टेन तदार्थवादिसुगुणैर्हृष्टेन पुष्टेन च ।
तस्य प्रार्थनया सुसंस्कृतवचोबन्धेन संनिर्म्मितो
ग्रन्थोयं त्रिजगत्स्वरूपकथनः सत्पुण्यनिर्मापणः ॥४६१॥

वंशे नैगमसंज्ञकेऽजनि सुधीजने प्रतिष्ठाविधा-
वाचार्यो जिनभक्तितत्परमना यो वामदेवाह्वयः ।
तेनालोक्य समस्तमागमविधिं त्रैलोक्यदीपाभिधो
ग्रन्थः साधुकृतो विशोध्य सुधियस्तनुंतु(स्तन्वन्तु) पृथ्वीतले ॥४६२॥

वक्तृ-श्रोत्र्यनुमन्त्री(त्रि)णां विशदं जैनशासनम् ।
भव्यानामर्हतां भूयात् प्रशस्तं सर्वमंगलम् ॥४६७॥

इतीन्द्रवामदेवविरचिते पुरवाटवंशविशेषकश्रीनेमिदेवस्य यशः-प्रकाशके त्रैलोक्यदीपके ऊर्ध्वलोकआ(व्या)वर्ण्णनो नाम तृतीयोधिकारः संपूर्णः ॥३॥

अथ संवत् १६८४ वर्षे ज्येष्ठमास वदिद्वितीयायां तिथौ रविशुभवासरे स्थानेश्वराख्यनगरे सुविविख्यातकुरुक्षेत्रोपकण्ठे साहसलेमीजहांगीरराज्ये श्रीमत्-खरतरमहामुनिगच्छे तत् शिष्यः श्रीरायमल्लाभिधामस्तदन्तेवासी श्रीकर्पूरचन्द्र-मुनिस्तच्छिष्योस्ति श्रीनिहालचन्द्रमहर्षिस्तच्छिष्योस्ति लखकमुनिस्तदन्तेवासिना मुनिमोहनाख्यलेखकेन व्यलीलिखत् त्रैलोक्यसाराभिधानं ग्रन्थम् ।

[2991] **अन्तः**— इति श्रीपद्मप्रभसूरि-शिष्यश्रीदेवानन्दसूरिविरचितायां स्वोपज्ञसंस्कृत-क्षेत्रसमासटीकायां कालोदधिनामा चतुर्थोधिकारः ।

[2997] **मू०आदिः**— महोपाध्याय श्री ५ कनकविजयगणिगुरुभ्यो नमः ।

वृ०आदिः— नत्वा श्रीवीरजिनं संदर्शितविश्वविश्ववस्तुचयम् ।
श्रीक्षेत्रसंग्रहण्या वृत्तिं कुर्वे यथाशक्ति ॥

मू०अन्तः— इति श्रीजम्बूद्वीपसंग्रहणी समाप्ता। संवत् १६७५ वर्षे फा० वदि ७ दिने सीरोहीनगरे लिखिता।

वृ०अन्तः— नित्यं श्रीहरिभद्रसूरिगुरवो जीयासुरत्यद्भुत-
ज्ञानश्रीसमलंकृताः सुविशदाचारप्रभाभासुराः।
येषां वाक्प्रपया प्रसन्नतरया शास्त्राम्बुसंपूर्णया
भव्यस्येह न कस्य कस्य विदधे संतापलोपोऽवनौ ॥१॥

वित्ते(चैत्रे) श्रीकृष्णगच्छे श्रव(म)णपरिवृढः श्रीप्रभानन्दसूरिः
क्षेत्रादेः संग्रहिण्या अकृत समयगैः संवदन्तीं सदार्थैः।
एतां वृत्तिं ख-नन्द-ज्वलन-शशि(१३९०)मिते विक्रमाब्दे चतुर्थ्यां
भाद्रस्य श्यामलायामिह यदनुचितं तद् बुधाः शोधयन्तु ॥२॥

इति क्षेत्रसंग्रहणीवृत्तिः समाप्ता।

[3010] आदिः— श्रीवीरजिनवरेन्द्रं सर्वैकान्ततमोरविम्।
नत्वा नव्यवृहत्क्षेत्रसमासो ह्यवचूर्ण्यते ॥ १ ॥

ऐदंयुगीनान् जनान् संक्षिप्तरुचि(ची)नपेक्ष्य भगवद्भिः।
श्रीसोमतिलकसूरीश्वरैर्विदधेऽमदार्थैः ॥२॥

अन्तः— स्फूर्जद्गुणप्रकरवासितविष्टपानां
श्रीदेवसुन्दरमहत्तमसूरिराजाम्।
शिष्योऽवचूर्णिमकारोद् गुणरत्नसूरिः
संस्कारबोधविधये स्वपरार्थमेताम् ॥१॥

श्रीवर्द्ध(वृहत्)क्षेत्रसमास-क्षेत्रसमासलघुवृत्ति-बृहद्वृत्तीर्विलोक्य भट्टार[क]-प्रभुश्रीज्ञानसागरसूरिपादकृतावचूर्णिः विरचितेयम् ॥

इति श्रीसोमतिलकसूरिविरचितस्य नव्यबृहत्क्षेत्रसमासस्यातिगंभीरार्थस्य कण्ठपीठलुठिता चातुर्विधभट्टारकप्रभुश्रीज्ञानसागरसूरिपादकृतावचूर्णिर्विरचितेयम्।

इति श्रीगुणरत्नसूरिपादविरचिताऽवचूर्णिः समाप्ता।

[3015] आदिः— संप्रतिधातकीखण्डवक्तव्यतामाह ॥

(मू०) चत्तारिसयसहस्सा धायइखण्डस्स होइ विक्खंभो।
चत्तारि य से दारा विजयाई मुणेयव्वा ॥१॥

अन्तः— अधुना क्षेत्रसमासप्रकरणे पठनाय श्रवणाय च प्रवृत्तानामुत्तमफलसंप्राप्ति-विषयमाशीर्वादमाह—

(मू०) समयखित्तसमासं जो पढइ यज्जोयणं(?) निसामेइ।
तेसिं सुयंगदेवी उत्तमसुयसंपयं देउ ॥

योऽमुं क्षेत्रसमासं सम्यग्भावसारं पठति यश्च निशामयत्याकर्णयति तेभ्यः श्रुतांगदेवी द्वादशांगश्रुतरूपिणी उत्तमां श्रुतसंपदं ददातु ।

जिनवचनगतं विषमं भावार्थं यो विवेच्य शिष्येभ्यः ।
इत्थमुपादिशदमलं परो[प]कारैककृतचेताः ॥१॥

तं नमत बोधजलधिं गुणमन्दिरमखिलवाग्मिनां श्रेष्ठम् ।
चरणश्रियोपगूढं जिनभद्रगणिक्षमाश्रमणम् ॥२॥

वाचः क्व तस्य गम्भीराः परभागमुपागताः ।
क्व चाहं जडधीरेष स्वल्पशास्त्रकृतश्रमः ॥३॥

तथापि गुरुपादारविन्दद्वन्द्वप्रसादतः ।
जातकिञ्चिन्मतिस्फूर्तिरेनां टीकां व्यधामहम् ॥४॥

यद्गदितमल्पमतिना जिनवचनविरुद्धमत्र टीकायाम् ।
विद्वद्भिस्तत्त्वज्ञैः प्रसादमाधाय तच्छोध्यम् ॥५॥

इममतिगम्भीरतरं क्षेत्रसमासं विवृण्वता कुशलम् ।
यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥६॥

अर्हतः शरणं सिद्धान् शरणं संयतानपि ।
शरणं जिननिर्दिष्टं धर्मं शरणमाश्रिताः ॥७॥

अर्हन्तो मंगलं सिद्धमंगलं मम साधवः ।
मङ्गलं मङ्गलं धर्मस्तान्मंगलमशिश्रियम् ।

इति श्रीमलयगिरिविरचिता क्षेत्रसमासटीका पारमुपागमदिति ॥

इति वृहत्क्षेत्रसमासवृत्तिः संपूर्णमिति ॥

(अन्य हस्ताक्षरोल्लेखः–) रायकंवरकी ॥

[3024] आदिः— प्रणिपत्य परमभक्त्या चतुर्विधातिशयसंयुतं वीरम् ।
वक्ष्ये सुखावबोधां क्षेत्रसमासस्य वृत्तिमहम् ॥१॥

अन्तः— इति क्षेत्रसमासवृत्तिः समाप्ता । विरचिता श्रीहरिभद्रसूरिभिः ॥

पंचाशीते वर्षे विक्रमतो व्रजति शुक्लपञ्चम्याम् ।
शुक्रवारसौम्ये पुष्ये शस्ये च नक्षत्रे ॥१॥

लघुक्षेत्रसमासस्य वृत्तिरेषा समासतः ।
कृता विबुधबोधार्थं श्रीहरिभद्रसूरिभिः ॥२॥ युग्मम् ।

सूत्रं सुखाद् बोधयन्ती वृत्तिरेषा तु सत्फला ।
आचन्द्रार्कं श्लोकस्यैकादशपंचशतीमिति ॥३॥

अंकतो ग्रंथा० ५०११ ॥

[3038] **अन्तः—** श्रीधर्मघोषगच्छे भट्टारकश्रीश्रीनन्दिवर्द्धनसूरीणां शिष्यपाठकगुणरत्नोपदे- शेन नाहरगोत्र सं० पद्दा-तत्पुत्र सं० पासा तत्पुत्रसं०लाषण तत्पुत्र सं० खीमसिंघेन प्रतिरियं लेखिता ।

मू० अंतः— इति कतिचि(द्)द्वीपोदधिविचारलेशस्य विवरणं सूरिः ।
श्रीरत्नशेखराख्यः शास्त्रादुद्धृत्य लिखति स्म ॥१॥

यद्गाढं मूढधिया मयाप्यदो विवरणं किमपि लिखितम् ।
तत्र सकलप्रसादाट्टीकाकारस्य मलयगिरेः ॥२॥

मलयगिरिवचनचंदनतर्वनुभावेन विवरणं ह्येतत् ।
गौरवपदं भविष्यति निम्बकदम्बादितुल्यमपि ॥३॥

इह यत्किञ्चिदसु(?शु)द्धं शास्त्रविरुद्धं च लिखितमस्ति मया ।
संसो(?शो)ध्यं (श्री)सूरिविरैः प्रसादमाधाय तत् सर्वम् ॥४॥

अर्हत्सिद्धाचार्योपाध्यायाः साधवश्च सु(?शु)द्धदृशः ।
सज्ज्ञानाः सच्चिरित्रा(?ताः) सत्तपसः श्रेयसे सन्तु ॥५॥

इति लघुक्षेत्रसमासविवरणं समाप्तमिति ॥

[3040] **स्त० आदिः—**श्रीवीतरागाय नमः ॥

निश्शेषज्ञानविज्ञानदायिनं वर्धमानमानम्य ।
स्वपरोपकृतये कुर्वे क्षेत्रसमा[स]स्य सुखबोधम् ॥

मू० अन्तः— इति समाप्तं क्षेत्रसमासम् ।

स्त०अन्तः— संवद्रससाधयन्तस्कन्दाननकुमुदबान्धव(१६२६)प्रमिते ।
इषशुदिविजयदशम्यामुदयपुरे नियतसुविदिते ॥१॥

श्रीमत्खरतरगच्छे स्वच्छे श्रीसाधुधर्मगणिमुख्याः ।
तच्छिष्यसहजरत्ना जयन्तु शरदः शतं जगति ॥२॥

तस्याश्रवेषु मुख्यो नाम्नोदयसागरः श्रताधारात् ।
क्षेत्रसमासप्रकरणबालविबोधं सुसंक्षिप्तम् ॥३॥

गंगाजलनिर्मलया संवृताकारया तपस्विन्या ।
मन्त्रिधनराजसुतया सुगंगयाभ्यर्थितो व्यदधत् ॥४॥

मतिमान्द्यतः प्रमादात् समयविरुद्धं च लिखितमत्र मया ।
संशोध्यं श्रुतवद्भिः प्रसादमाधाय तत् सर्वम् ॥५॥

पञ्चभिः संबन्धकुलकम् ।

बाहु-मुणी-रस-चन्द्रे(१६७२)कार्तिकमासे शुक्लपक्षे द्वा(द)श्यां भृगुवासरे ॥

संवत् १६८८ वर्षे आसोमासे सुकुल(शुक्ल)पक्षे पंचमीतिथे(थौ) रविवारे । सेरपुरे लिषितं ऋषिश्री५लक्ष्मीदास–तत्शिष्येन षीजजी लिपीकृता इयं पुत्रका(पुस्तिका) स्वयं वाचनार्थम् ।।

[3041] **मू० आदिः**—ऐँ नमः ॥ ॐ नमस्तत्त्वदर्शिने परमेष्ठिने वीतरागाय ।

वीरं जयसेहरपयपइट्ठियं पणमिऊण सुगुरुं च ।
मंदोत्ति ससरणट्ठा खित्तवियाराण वोच्छामि ॥१॥

मू० अन्तः— सूरीहिं जं रयणसेहरनामएहिं अपच्छमेव रइयं नरखित्तविक्खं ।
संसोहियं पयरणं सुयणेहिं लोए पावेउ तं कुसलरंगमयं पसिद्धम् ॥२६२॥

इय खित्तसमासपक[र]णस्स छट्ठो अहिगारो सम्मत्तो ॥१॥

संवत् १७०६ वर्षे वदिदशम्यां गुरुवासरे कडीनगरे ऋषिश्री५ झूरराज–तत्शिष्य ऋषिश्री ५ वीराजी–तत्शिष्येण विष्णुदासेन व्यालेखि स्वात्मपठनार्थम् ।

बा० आदिः—ऐँ नमः ॥ ॐ नमस्तत्त्वदर्शिने वीतरागाय श्रीं नमः ॥

निश्शेषकर्मदलनं श्रीदेवार्य प्रणम्य सद्भक्त्या ।
स्वपरोपकृतये कुर्वे क्षेत्रसमासस्य सुखबोधम् ॥१॥

ग्रंथनी आदिं मंगलाचरणनी गाथा कहइ छई ॥ वीरं जय० ग्रंथनउ करणहार श्रीरत्नशेखराचार्य इम कहइ छइ ।

[3042] **सूचनम्**— प्रशस्तिस्तावत् No 3040 वद् ज्ञेया ॥

[3044] **सूचनम्**— प्रशस्तिः No. 3040 वद् ज्ञेया । विशेषस्तावदयमेव—

श्रीपूज्यके शिष्यने पुस्तक लिषी प्रधान ।
पढत सुणत गुण उपजै अम्बालानगर सुथान ॥
जा(या)दिशम्० ॥

संवत् अठारासय छव्वी भाद्रवमासे शुक्ले पक्षे तिथौ पडवां शुक्रवारे लिषाप्तं श्रीपूज्य आचार्य जयगोपालस्वामिजी लिषाप्तं पगधूर मूलाऋष आत्मार्थे पठनार्थम् ॥

[3045] **आदिः**— ...इ गच्छि भट्टारकश्रीजयतिलकसूरिनइ पाटि गच्छनायकभट्टारक श्रीरत्नसिंहसूरिनइं सानिध्यइं प्रसादि श्रीजयतिलकसूरिनुं शिष्य पंडित दयासिंहगणि बालावबोध वार्त्तारूपपणइं लिखइ छइ नवुं करइ छइ सुखावबोधपणानइ काजिइं गच्छनायकभट्टारकश्रीरत्नसिंहसूरि सद्गुरुनइं उपदिसनइं करी ॥

[3046] **आदिः**— अर्हमिति ब्रह्मपदं परमेष्ठिवाचकं सिद्धम् ।
ध्यायामि धवलममलं मूलं सकलार्थसिद्धीनाम् ॥१॥

अर्हं-अर्हमिति ब्रह्मपदं ध्यायामि हूं ब्रह्मज्ञाननु पद पंचपरमेष्ठिनि ध्याउं.........

तपापक्ष वडोपोसालश्रीरत्नाकरसूरिनि गच्छि भट्टारकश्रीजयतिलकसूरिनुं शिष्य पंडितदयासिंहगणि बालावबोध वार्त्तारूपपणि लिषि छि नवूं करि छि सुखावबोधपणानि कार्जि०......

अन्तः— इति श्रीक्षेत्रसमास श्रीरत्नशेखरसूरिकृत सूत्रनउ बालावबोधः समाप्तः ॥ अक्षरांकगणवि श्लोकसंख्या ४११७ एकचत्वारिंशदशसताधिकानि ॥

संवत् १७४३ वर्षे शाके १६०८ प्रवर्त्तमाने कार्त्तिकमासे शुक्लपक्षे-९ तथौ भृगुवासरे लिखितमिदं पुस्तकं स च वाच्यमानः श्रीर्भवतु ॥ ग्रन्थाग्रम् ४११७ यंत्रना हूआ श्लोक ७५ ॥

[3047] मू० अन्तः – इति श्रीलघुक्षेत्रसमास संपूर्ण लिखितं संवत् १८५५ ना वर्षे माहासुदि १३ दिने । सकलभट्टारकश्री१०००८वारश्रीजीविजयजिनेन्द्रसूरीस्व(श्व)रजी चिरंजीवी घणी हुज्योजी दासानुदास पं०कांतिविजयग०लिपीकृत्तां(तम्) ।

स्त० अन्तः—इति श्रीलघुक्षेत्रसमास संपूर्णम् ।

हवें एहनो कर्त्ता कहें छइं श्रीपूज्य पार्श्वचंद्रसु(सू)रीश्वरकृतं प्रतिबिम्ब विलोक्य श्रीराजचंद्रसूरीविजयमाने ऋषिश्रीश्रवणसुशिष्येन वाचकमेघराजेन किंचित् विशेषतो वार्त्तिको विहित[:] संशोधनीयोयं ध्यायनें ल०पं०कांतिविजयेन ।

सं० १८५६ ना वर्षे आसोसुदि ११ दिने बुधवासरे पोलीयामध्ये ।

[3060] आदिः— अनंतज्ञानकलितं हृतदोषं महोदयम् ।
त्रैशलेयजिनेन्द्रस्य नत्वा पादाम्बुजद्वयम् ॥१॥

श्रीविमलहर्षवाचकचरणानभिवंद्य कल्पतरुसदृशान् ।
रचयामि लोकनालेस्तनुधीर्बालबोधममुम् ॥२॥

बा० अन्तः— श्रीमत्तपागच्छसुधापयोधौ राकाशशांकस्य तुल्यां(लां) श्रयन्ति ।
जगत्प्रभानेदिपदं जयन्ति ते सूरयः श्रीविजयादिसेनाः ॥१॥

तथौवराज्यस्थितिचारुचन्द्रिकावधूतनिश्शेषजनौघतापाः ।
समग्रसज्ज्ञानरसाश्च सूरयो जयन्तु [ते] श्रीविजयादिदेवाः ॥२॥

राज्ये तदीये सकलार्थसिद्धौ विराजमाना महनीयमूर्त्तयः ।
जयन्तु सिद्धांतपयोधिचन्द्रास्ते वाचकाः श्रीविमलादिहर्षाः ॥३॥

तद्गुरुलब्धमहिम्नाश्चकार बालावबोधमतिरुचिरम् ।
स्वार्थाय लोकनालेर्जसविजयाह्वः प्रतनुधिषणः ॥४॥

इति श्रीलोकनालिबालावबोधः संपूर्णः । ग्रंथ उभय मीलने २८४ ॥

[3063] बा० आदिः—श्रीमदाप्तौ(प्तं) प्रणम्यादौ जगतः स्थितिदर्शकम् ।
वक्ष्ये लोकविचारस्य वार्त्तिकं समयानुगम् ॥१॥

वा० अन्तः— श्रीमदा(ता) प्रोक्तविधिना लोकनालस्य वार्त्तिकम् ।
श्रीमित्रधनराजस्य गंगाख्यतनुजा कृतम् ॥१॥

श्रीमत्सहजरत्नेन व्याख्यातमुदयाच्चिना ।
असंगतं यदुक्तं तद् विशोध्यं धीधनैर्भृशम् ॥२॥

इति श्रीलोकनालद्वात्रिंशिकावार्त्तिकं कृता(तं) पूर्णा(र्णम् ॥)

[3065] स्त० अन्तः—लोकभिरावृत्तिरियं (?) विनिर्मिता लोकनालिसूत्रस्य ।
वाचकधनविजयेन स्वपरकृते राजवरनगरे ॥१॥

श्रीविजयदेवसूरीश्वरराज्ये विजयसिंहसूरियुते ।
शशि–वारिधि–शशिसंख्ये वर्षे वरभाद्रपदमासे ॥२॥

ग्रन्थाग्रं सूत्रार्थसहितम् २०१ सही ।

[3071] अन्तः— इति श्रीसंग्रहिणी समाप्ता ॥

श्रीमति पूर्णिमापक्षे प्रधानसा(शा)खायां श्रीअणहल्लपत्तनढंढेरपाटकभूभूषणशाखायां श्रीपूज्यपादैर्नवीननिर्मितायां कृतचातुर्मासकायां भट्टारकश्रीमहिमाप्रभसूरी(रि)–तत्पट्टे श्रीभावप्रभसूरी(रि)शिष्य प्रेमचन्द लिखितम् ॥

[3077] अन्तः— इति श्रीसंग्रहिणी समाप्ता ॥१॥

श्रीमति पूर्णिमापक्षे प्रधानसा(शा)खायां श्रीअणहलपत्तनढंढेरपाटकभूभूषणशाखायां विशालायां श्रीपूज्यपादैर्नवीनर्निर्मितायां कृतचातुर्मासकायां भट्टारक श्री ५ श्रीमहिमाप्रभसूरीश्वरचरणसरोजरजोजनितानुभावलब्धसेवशिष्यभावरत्नेनेयं लिखी(पी)कृता लघुशिष्यतेजसीपठनहेतवे । संवत् १७६४ वर्षे प्रौष्ठपदामार्त्तंडदिने ॥

[3087] वृ० आदिः—अत्यद्भुतं योगिभिरप्यगम्यं विधूतनिःशेषतमोवितानम् ।
अचिन्त्यमाहात्म्यमजं निरञ्जनं ज्योतिर्जयत्येकमनन्तमव्ययम् ॥१॥

यस्यामृतैर्वचोभिर्जीवत्यद्यापि भव्यलोकोयम् ।
स जयत्यागमजलधिर्जिनभद्रगणिक्षमाश्रमणः ॥२॥

प्रसन्नगम्भीरपदाहितक्रमा मिताक्षरा वर्जितपौनरुक्तया ।
यैर्निर्मिता संग्रहणीयमद्भुता नमो नमस्तत्पदपंकजेभ्यः ॥३॥

वृ० अतः— तदेवं व्याख्याता ।

चतुर्विंशतिद्वारात्मिका गाथाद्वयप्रमाणा संक्षिप्ततरा संग्रहणी तद्व्याख्यामाच श्रीहर्षपुरीयगच्छालंकारमलधारिश्रीमदभयदेवसूरि-पट्टरत्नश्रीहेमचन्द्रसूरि-शिष्य-

श्रीचन्द्रसूरिचरणाम्बुजचञ्चरीकेण श्रीमुनिचन्द्रसूरिभ्यो लब्धप्रतिष्ठेन श्रीदेवभद्रसूरिणा विरचिता स्वगुरुप्रणितसंग्रहण्या वृत्तिः समर्थिता ॥

अंगान्युपांगानि तथापराणि विलोक्य शास्त्राणि गुरूपदेशतः ।
विनिमिता वृत्तिरियं तथापि शोध्यं यदि स्याद् विबुधैर्विशोध्यम् ॥१॥
निजगुरुपदभक्तेः कुर्वतो वृत्तिमेनां मम समजनि पुण्यं यत् ततो भव्यलोकः ।
जिनपतिमतपोतोत्तीर्णसंसारसिन्धुर्व्रजतु शिवमनन्तज्ञानदृग्वीर्यसौख्यम् ॥२॥

प्रत्यक्षरगणनातो ग्रन्थमानं विनिश्चितम् ।
पञ्चत्रिंशच्छतान्यत्र श्लोकानां सर्वसंख्यया ॥३॥

इति श्रीसंग्रहिणीवृत्तिरियम् ॥ ग्रन्थाग्रम् ३५०० ॥

संवति १६८७ प्रमिते श्रीस्तंभतीर्थवेलाकूले फाल्गुनशुदि-द्वितीयायां भृगुवारे पंडितश्रीजयरत्नगणि-विनेयगणिराजरत्नेन लिखिता स्ववाचनाय ।

[3100] बा०आदिः— नत्वा श्रीवीरजिनं संग्रहणीसूत्रविवरणं किञ्चित् ।
बालानां बोधार्थं वक्ष्येहं लोकभाषाभिः ॥१॥

बा०अन्तः— ... ...

संवत् चऊदससत्ताणवइ द्वितीयाश्रावणसुदि चऊदसि शुक्रवासरि तिणि दिवसि तपागच्छि भ०रत्नसिंहसूरिशिष्यइं पण्डितदयासिंहगणिए बालावबोध रचिउ समस्त मांगलिकमइं विषइं हुइं संग्रहणीबालावबोधसप्तदशशतपंचाशत् श्लोकसंख्या समाप्ता ॥

संवत् १६१० वर्षे पोसवदि ७ गुरौ लिखितो(तः) पत्तनमहानगरे ।

[3101] (अन्यदीयहस्ताक्षरेणोल्लेखः—)

अन्तः— श्रीजिनचन्द्रसूरिराज्ये आज्ञावल्लरिगणिनीपठनार्थं लिषापिता सा च श्रीजिनभद्रसूरिसंतानीये वा०हर्षविजयगणिवराणां प्रदत्ता ।

संवत् १६७९ वर्षे आसकात्तिकशुदि ३ दिने आसपुरानइ संघि परति वहरावी ।

[3105] बा०आदिः— श्रीपार्श्वनाथं फलवर्धिकाख्यं गुरूंश्च श्रीमज्जिनदत्तसूरीन् ।
गीर्देवताभाष्यसुधासमुद्रं क्षमाश्रयं श्रीजिनभद्रनाम्ना ॥१॥

निर्मथ्य जैनागमवारिराशिं प्रकाशिता यैरियमप्रपंचा ।
श्रीचन्द्रसूरीन् प्रणिपत्य सम्यक् करोमि तां संग्रहणीं स्फुटार्थाम् ॥२॥ युग्मम् ।

श्रीहर्षसारगुरुराजहितप्रसाद-
माधाय चेतसि चिदर्थकृतेऽप्रमादः ।
तस्माद् विसु(शु)द्धवचनो विगतावसादो
व्याख्यां स्फुटां शिवनिधानगणिर्वितेने ॥३॥

इहां शास्त्रनी आदिइं शिष्टाचार पालिवा भणी विघ्न निवारवा भणी मंगल करइ।

अन्तः— दिट्ठी दंसणनाणे जोगुवओगोववायचवणठिइं।
पज्जत्ति किमाहारे सन्नी गई आगइ वेए ॥१॥

[3109] **स्त०अन्तः—**मलधारगच्छे श्रीहेमचन्द्रसूरि तेहनइं शिष्यइं लेसै विरची कीधी सम्यग् प्रकारइं संघयणरत्नशास्त्र समृध(द्धि)वंत थाओ जां लगइं श्रीमहावीरनो तीर्थ प्रवर्त्तइं तां सीम नंदउ कृता धर्ममेरुनावचूरिः गाथार्थ ४०० ॥

इति श्रीसंघयणसूत्रटबार्थसंपूर्णम् ॥

सं० १८११ वर्षे शाके १७५७ प्रवर्त्तमाने मासोत्तममासे उत्तममासे कृष्णपक्षे पंचमतिथौ भृगुवासरे तृतीय पोहरै अमृतवेलायां समये लिखित्वा सकलपण्डितशिरोमणीपण्डितजी श्रीयुक्तिहंसजी शिष्य-अंतेवासी पं०तिलोकहंस तत्शिष्य मुनिकपूरहंस लिपि(लिपी)कृत्वा(तः) श्रीआउपुरनगरे।

[3115] **अन्तः—** इति श्रीत्रैलोक्यदीपिकानाम संग्रहणी संपूर्णम्(र्णा) ॥

संवत् १८७८ वर्षे ज्येष्ठमासे शुक्लपक्षे १५ तिथौ मंगलवासरे भट्टारक श्रीश्री१००८श्री विजयउदयसूरिजी तत्शिष्यश्री१०८श्रीपं०श्रीगुलाब(? ल)विजयजी मु०हेमविजय पं०श्रीगौतमसत्कलिखिता मु०हेमने स्वार्थे।

उत्तम जनने बाँचवा वली करवा पर उपगार।
पढे गुणे जे सांभले तस घर मंगलमाल ॥१॥

श्रीसाणंदनयरे श्रीअमिझरापार्श्वप्रसादात् सही।

[3119] **मू० अन्तः—** इति श्रीत्रैलोक्यदीपिकानाम्नी मध्यसंग्रहणी संपूर्णा। संवत् १७६६ वर्षे माहावदि १३ बुधे लिखितमिदं सदारुचिगणिना।

स्त० अन्तः— इति श्रीत्रैलोक्यदीपिकानाम्नी मध्यसंग्रहणी संपूर्णा।

लिखितमिदं सकलपंडितशिरोमणिपंडितश्री५श्रीश्रीपुण्यरुचिगणि-तत्शिष्य-सकलपंडितोत्तमपंडितश्री५जीवरुचिगणि-तत्शिष्यसकलपंडितश्री५श्रीनित्यरुचि-ग०-शिष्यसदारुचिगणिना संवत् १७६६ वर्षे फागुणसुदि ४ दिने मध्याह्न-समये त्रैलोक्यदीपिका नाम्नी मध्यसंग्रहणी टबार्थः संपूर्णः श्रीगौडीपार्श्वप्रसादात् ॥

[3125] **अन्तः—** बाहलबाईवाचनाय॥

[3138] **अन्तः—** सप्ततिकावचूरिः समाप्ता। तदेवं कर्मग्रंथषट्कस्यापि समर्थितावचूरिः॥ सं०१५०७ व० श्रावण व०९।

(पश्चात्कालीनोल्लेखः)—

श्रीमत्तपोगणनभोगणभानुकल्पश्रीदेवसुन्दरयुगोत्तमपादुकानाम् ।
शिष्यैर्जिनागमसुधांबुधिमग्नचित्तैः श्रीज्ञानसागरगुरूत्तमनामधेयैः ॥१॥

कर्मग्रन्थविचारावचूर्णिरेषा परोपकारार्थं ।
निधि-वह्नि-मनुमितेऽब्दे(१४३९)परिस्फुटार्था कृता जयतात् ॥२॥

[3139] अन्तः— श्रीमत्तपागणनभोऽर्कयुगोत्तमाभश्रीदेवसुन्दरगुरूत्तमपादुकानाम् ।
शिष्यैर्जिनागमसुधाम्बुधिलीनचित्तैः श्रीसूरिराजगुणरत्नमुनीन्द्रचन्द्रैः ॥५१॥

नन्देषु-मनुमिते(१४५९)ऽब्दे कर्मग्रन्थावचूर्णिरियम् ।
श्रीदेवेन्द्रगणेश्वरकृतविवृतैः स्वात्महितहेतोः ॥

इति सप्ततिकावचूरिः संपूर्णा परमगुरुश्रीमुनिसुन्दरसूरिः ॥

[3145] स्त० आदिः—शारदां वरदां स्मृत्वा नत्वा हीरगुरोः पादौ ।
कल्याणगुरुशिष्येण धननाम्ना विधीयते ॥१॥

कर्म्मग्रन्थस्य षट्कस्य व्याख्यानमिषतो मया ।
लोकभाषानुसारेण निश्छद्मशिशुचापलम् ॥२॥

स्त० अन्तः—इति सत्तरी संपूर्णा ॥ ग्रन्थाग्रं सूत्रटबासहित पानां ४० ग्रन्थाग्रनो १११९ ।
इति कर्मग्रन्थषट्कसूत्रं समाप्तं टबो संपूर्ण ॥

संयमशतमितवर्षे माघे मासे सिताभिधे पक्षे ।
श्रीवीरगणिमिततिथौ नगरे स्तंभनकपार्श्वयुते ॥१॥

श्रीविजयदेवसूरीश्वरराज्ये प्राज्यपुण्यपुण्यतिथौ ।
कर्मग्रन्थव्याख्या लोकगिरा किन्तु लिखिते ॥२॥

सकलागमकषपट्टश्रीमत्कल्याणविजयशिष्येण ।
वाचकधनविजयेन परोपकारादिपुण्यकृते ॥३॥

औत्सुक्यवशान्मतिमांद्यतश्च वितथा यदत्र लिखितं स्यात् ।
गीतार्थैः संशोध्यं मयि हितहेतुं समुद्दिश्य ॥४॥

[3152] अन्तः — भट्टारकश्रीआणंदविमलसूरिस्तत्पट्टे भट्टारकश्रीविजयदानसूरिस्तत्पट्टे जगद्गुरुभट्टारकश्रीहीरविजयसूरिस्तत्पट्टे संप्रतिविजयमानपातसाहदत्तबहुमानभट्टारकश्रीविजयसेनसूरिस्तच्छिष्यपंडितश्रीशान्तिविजयगणिना कर्म्मग्रन्थबालावबोधः कृतः स्ववाचनकृत्(ते) ॥ श्रीसूरतिबन्दिरे ।

संवत १६७८ वरषे(वर्षे) अहम्मदाबादमध्ये लिखितम् । कुंअरजी देवदासलिपि(पी)कृतं झाजापटेलप्रपाटके ॥

(अन्यदीयाक्षरैर्लिखितमिदम्—)

सांबलीवास्तव्य सं० अबजीमाता श्राविका लाडकी पं० शांतिविजयगणिनी बहिनि तेणीइ ए परति लिखावी ॥

[3157] **मू० आदिः**—सकलपंडितप्रवरपंडितश्री ५ श्रीखीमविजयगणिचरणसरोरुहेभ्यो नमः ॥

बा० आदिः—प्रणम्य श्रीमहावीरं बालानां ज्ञानहेतवे ।
कर्मग्रन्थस्य सूत्रार्थो लिख्यते लोकवार्त्तया ॥१॥

तत्र प्रथम कर्मग्रन्थसूत्रनो बालावबोध लिखिइं छइं । तत्र प्रथम गाथा० ।

बा० अन्तः— इति चतुर्थकर्मग्रन्थबालावबोधः समाप्तः इति भद्रं भूयात् ।

श्रीतपगणसुरसिन्धुरबन्धुरकुम्भस्थलैकसुरपत्यः ।
अभवन् भुवनख्याताः श्रीविजयानन्दसूरिवराः ॥१॥

तत्पट्टोदयगिरिवरशिखरालंकारचित्रभानुनिभाः ।
श्रीविजयराजमुनीन्द्रा राजन्ते चन्द्रकीर्त्तिधराः ॥२॥

तेषां श्रीमति गच्छे वाचकनृपचक्रचक्रवर्त्तिनिभाः ।
श्रीमदकब्बरभूपप्रतिबोधने विख्याताः ॥३॥

श्रीशत्रुंजयगिरिवरकरमोचनमुख्यचारुसुकृतकराः ।
श्रीभानुचन्द्रसंज्ञाः सद्ज्ञाना वाचका आसन् ॥४॥

तत्पदपंकजमधुकरसदृशोपाध्यायहीरचन्द्रेण ।
कर्मग्रन्थस्यार्थो लिखितोयं लोकभाषाभिः ॥५॥

बह्व्योपि टीका यदि सुन्दरार्थाः सन्त्यस्य शास्त्रस्य तथापि नूनम् ।
शीघ्रार्थसिद्ध्यै किल बालकानां बालावबोधो लिखितो मयैषः ॥६॥

इह सिद्धान्तविरुद्धं यल्लिखितं मन्दबुद्धिभावेन ।
कृत्वा कृपां विशोध्यं त्यक्त्वाऽऽलस्यं तकं प्राज्ञैः ॥७॥

श्रीमद्राघवजीकेन स्तंभतीर्थनिवासिना ।
वाचितो ज्ञानवृद्ध्यासौ चिरं नन्दतु भूतले ॥८॥

सकलपंडितमंडलाखंडलायमानपंडितश्री ५ श्रीखीमविजयगणि-शिष्यगणि-हेमविजयेन लिखितेयं प्रतिर्विद्यापुरे ॥

[3169] **बा० अन्तः**— परमगुरु गच्छाधिराज शिथलाचारनिवारक तपा-बिरुदधारक भट्टारकश्री-१९ श्रीजगच्चन्द्रसूरीश्वरपट्टप्रभाकरश्री ५ देवेन्द्रसूरीश्वरइं तपागच्छनायकइं ए गाथा ६१ मीनउ अरथ थयउ ॥ ... ...

कर्मविपाक–टबार्थोन्वर्थः प्रार्थ्योर्थिभिः स्वगुरुभक्त्या ।
प्रथमादर्शे लिखितो मुनिना कल्याणसोमेन ॥ ४ ॥

इति प्रथमकर्म्मग्रन्थबालावबोधः सम्पूर्णः ॥

[3170] **मू०अन्तः—** जिणपूयाविग्घकरो हिंसाइ परायणो जयइ विग्घं ।
इइ कम्मविवागोऽयं लिहिओ देविंदसूरीहिं ॥६२॥

बा०अन्तः— देवनी पूजा तेहनउ विघ्न करइ हिंसादिकनइ विषइ परायण एह्नुं विघ्न कर्म बांधइ ए कर्मविपाक श्रीदेवेन्द्रसूरि कहिउ ॥

[3172] **स्त०अन्तः—** श्रीतपागच्छाधिराजभट्टारकश्रीजगच्चन्द्रसूरिपट्टोदयाचलसहस्रकिरणभट्टारक-श्रीदेवेन्द्रसूरिः ॥६३॥

श्रीवाचकाग्रसरधर्म्मसागरक्रमाब्जभृंगश्रुतसागराणाम् ।
श्रीवाचकानां शिशुः शांतिसागरकः सत्कर्मविपाकमर्थतः ॥१॥

इति श्रीप्रथमकर्मग्रन्थसूत्रार्थः संपूर्णः ।

. संवत् १८७८ ना वर्षे आसोमासे शुक्लपक्षे १२ सोमे लि०मु० रूपविजय ।

इति श्रीप्रथमकर्मग्रन्थसूत्रार्थः संपूर्णः ॥

संवत् गजाद्रि–वसु–चन्द्राब्दे (१८७८) शाके वह्नयब्धि-मुनिशशि-प्रमितेब्दे (१७४३) अश्विनमासे शुक्लपक्षे द्वादश्यां कर्मवाढी(टयां)कुमुदनीवासरे श्रीमद्राजनगे नागोरीसरे वास्तव्यः तपागच्छे श्रीपं० खुशालविजयग० शिष्य मु०रूपविजयेन लिषितोयम् ॥ श्रीशंखेश्वरप्रसा(सा)देन चिरं निं(नं)-दन्तु आचन्द्रार्क भु(भू)यात् । इदिं(यं) पुस्तिका पठनार्थं स्वयम् ।

[3183] **बा०आदिः—** त्रिजगत्सृष्टिस्थितिनाशत्रयावस्थितिम् ।
दिशत्यै समाहित्यै त्रिपद्यै हृद्यहृच्छ्रियै ॥१॥

[3207] **बा०आदिः—** ऐन्द्र श्रीकरपीडनविधिसिद्धिं ध्वस्तकर्मशलभभरम् ।
कल्याणसिद्धिकरणं जैनं ज्योतिर्जयतु नित्यम् ॥१॥

बा० अन्तः— सूरतबन्दिरे। संवत् १९११ कार्तिकशुदि ४ चार रवौ संपूर्णम् ।

भू–मही–नव–चन्द्राब्दे रस–मुनिन्यद्रिभूशाके ।
शितगतिथौ ऊर्जे मासे ... ...

सं०१९११ कार्त्तिकशुद्धद्वितीया संपूर्ण श्रीराधिकापुरे लि०व्यास व्रजेराम पठनार्थं साधवी चन्दणसरीजी ।

[3208] **बा०आदिः** - दृष्ट्वा येन भवांकुरकरं दुःकर्मबीजं पुरा
जीवानां बहुदुःखदग्धवपुषां नाशाय तस्य स्वतः ।
निर्दिष्टं कृपयार्थसिद्धिवरदं रत्नत्रयं सादरं
सोयं वो दुरितं लुनातु सततं त्रैलोक्यनाथो जिनः ॥१॥

नत्वा गोपालनामानं गुरुं गुरुगुणालयम् ।
स्वल्पोपि शतकस्यार्थो मतिचन्द्रेण लिख्यते ॥२॥

बा० अन्तः— इति श्रीमदंचलिकगच्छीयमतिचन्द्रमुनिविरचितशत[क]बालावबोधः ॥

स्वान्ययोरुपकाराय मतिचन्द्रेण धीमता ।
अर्थदः शतकशास्त्रस्य सुबोधोयं विनिर्ममे ॥१॥

सिंधुदेशनदा रम्ये सामुहानगरे सुधीः ।
आद्यो गुर्ज्जरमल्लोभूत् सदध्यात्ममतानुगः ॥२॥

पाठनाय मया तस्य वृत्तिं विलोक्य सादरम् ।
अगम्यार्थमिदं शास्त्रं कृतं गम्यार्थपद्धतिम् ॥३॥

संवत् १७६५ वर्षे मगशिरशुद्ध ६ रवौ वा श्रीसुमतिहंसगणिशिष्य मु०लक्ष्मीहंसलिखितं । श्रीयं(श्रिये) भूयात् । लिखितं गूढामध्ये ॥

[3209] अन्तः— श्रीमत्पाठकराजसारकृतिनां शिष्या जिनाज्ञापराः
श्रीमत्पाठकज्ञानधर्मप्रवराः सद्दीपचन्द्राह्वयाः ।
अर्हत्मार्गसुपाठका गुणलयाः तद्वाक्यसेवानुगः
सूत्रार्थं गणिदेवचन्द्रमतिमान् संदर्शयन् सो(शो)भते ॥१॥

इति श्रीपंचमटबार्थ[:] संपूर्णः ।

संवत् १८८० माघवदि १३ शुक्रे ॥

[3216] बा०अन्तः— सत्यवचूर्णिमिमां शिष्यः श्रीसूरसुन्दरगुरूणा ।
रस-शशि-तिथि(१५१६)मितवर्षेऽलिखत् पुरे वीरमग्रामे ॥१॥
स्वपरोपकारहेतोर्मपिरसमां (?) समयमाणिक्यः ॥

[3224] चू०आदिः— सिद्धिविबंधणबंधुदयसंतखवणविहिदेसओ सिद्धो ।
भगवं भव्वजणगुरू विक्खायजसो जयइ वीरो ॥

एक्कारस वि गणहरा सव्वे वइगोयरस्स पारगया ।
सव्वसुयाणं पभवा सुयकेवलिणो जयंति सया ॥

अन्तः— जो जत्थ त्ति जो अत्थो बंधोदयसंतेसु, अपडिपुण्णो खण्णो जाओ अप्पागमेण बद्धो त्ति आगमो सुत्तं अप्पो आगमो जस्स सो तहा तेण अप्पागमेण बद्धो त्ति काउं तं खमिऊण बहुसुता तं अवराहं खमिऊण दोसं अघेत्तूण बहुसुता दिट्ठिवायण्णे पूरेऊण परिकहेतुं त्ति तं विगलं अत्थं पूरेऊण सगलं करेत्तु परिकहित्तु भणंतु त्ति ॥७१॥

समासचुण्णिया सित्तरी समत्ता ॥

[3225] **अन्तः**— सिरिकमलसंजमोवज्झाएहिं अत्थविवरणं कयं ।
कम्मत्थवस्स विहियं भव्वा जाणंतु निसुणंतु ॥११॥

इति कर्म्मस्तवप्राकृतविवरणं कृतं च ।

सं० १५३४ श्रीपंचम्यां श्रीजिनभद्रसूरि-शिष्यश्रीकमलसंयममहोपाध्यायैः शिष्य वा०मुनिमेरुमुखेनेति भद्रं भूयात् पाठक-पठकानाम् । संघस्य कल्याणमस्तु ॥

[3229] **टी०अन्तः**— इति श्रीमलयगिरिविरचिता कर्मप्रकृतिटीका समाप्ता ॥

संवत् १६६१ वर्षे भाद्रवावदि ७ शनौ लिखितम् ॥ ग्रन्थाग्रम् ८००० लिषापिता च श्रीमत्तपागच्छनभोनभोमणिश्री १९ श्रीविजयसेनसूरिराज्ये पं०श्री आनन्दविजयगणिसाहाय्यात् जेसलमेरुवास्तव्यको० ताल्हण-को०हेपा-मांडण-मानाप्रमुखश्रीसंघेनेति । श्रीश्रमणसंघेन वाच्यमाना चिरं जीयात् ॥ गणिबुद्धिविमलेन शोधिता ।

[3231] **टी०अन्तः**—ज्ञात्वा कर्मप्रपंचं निखिलतनुभृतां दुःखसंदोहबीजं
तद्विध्वंसाय रत्नत्रयमयसमयं यो हितार्थी दिदेश ।
अन्त[:]संक्रांतविश्वव्यतिकरविलसत्कैवलैकात्मदर्शः(र्शः)
स श्रीमान् विश्वरूप[:] प्रतिहतकुमतः पातु वो वर्द्धमानः ॥१॥

सूरिश्रीविजयादिदेवसुगुरोः पट्टांबराहर्मणौ
सूरिश्रीविजयादिसिंहसुगुरौ शक्रासनं भेजुषि ।
सूरिश्रीविजयप्रभश्री(?श्र)तवति प्राज्यं च राज्यं कृतो
ग्रन्थोयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥२॥

सूरिश्रीगुरुहीरशिष्यपरिषत्कोटीरहीरप्रभाः
कल्याणाद् विजयाभिधाः समभवंस्तेजस्विनो वाचका[:] ।
तेषामन्तिषदश्च लाभविजयाः प्राज्ञोत्तमाः शाब्दिक-
श्रेणिकीर्त्तितकार्त्तिकीविधुरुचिप्रस्पर्द्धिकीर्त्तिप्रथाः ॥३॥

तच्छिष्याः स्म भवन्ति जीतविजयाः सौभाग्यभाजो बुधाः
भ्राजन्ते सनयाः नयादिविजयास्तेषां सतीर्थ्या बुधाः ।
तत्पादांबुजभृङ्गपद्मविजयप्राज्ञानुजन्मा बुधा-
स्तत्त्वं किंचिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥४॥

इदं हि शास्त्रं श्रुतकेवलिस्फुटाधिगम्यपूर्वोद्धृतभावपावनम् ।
ममेह धीर्वामनयष्टिवद् ययौ तथापि शक्त्यैव विभोरियद्भुवम् ॥५॥

प्रास्तनार्थलिखनाद् वितन्वतो नेह कश्चिदधिको मम श्रमः ।
वीतरागवचनानुरागतः पुष्टमेवं सुकृतं तथाप्यतः ॥६॥
इति श्रीकर्मप्रकृतिः ॥

[3232] **आदिः**— सिद्धाण नमुक्कारो अट्ठकम्माण पयडियविबुद्धं ।
जीवाण बोहणत्थं सव्वे दुक्खाण उद्धरणं ॥१॥

अन्तः— इति कम्मपयडिवत्तीसी समाप्तं संपूर्णम् ॥ श्री ॥

[3246] **आदिः**— यस्यान्तःसभमायतांसलभुजास्तन्वंश्वतस्रः समं
भान्ति स्म च्युततान्तिकान्तिलहरीलोलत्त्रिलोकश्रियः ।
शङ्के वल्गदुदग्रविग्रहभवोपग्राहिकर्मद्विषा–
ऽमा स्यूता विजिगीषया भगवता पायात् स वीरो जिनः ॥१॥

इह हि भगवदागमेषु बहुधा निर्णीतमायतनानायतनविभागं धीशतया यथावदधिगामुका अप्यधीशतया कदभिनिवेशास्कन्दितमानसा मानसानुमानच्छल-राधिरोहप्ररोहदुच्चावचवचनाडम्बराः केचित् सिताम्बरा आयतनमेवार्हद्विम्बं न तु कथंचिदनायतनमनीति बाहुदण्डमुद्धृत्य मुग्धेभ्यः प्रतिदिशमनिशमुपदिशन्तः श्रीगूर्जरत्रोदरे श्रीमदाशापल्लीपुरेऽसंख्यसंख्यावन्मुख्यस्वपक्षपरपक्षसामाजिक-समाजसमक्षं बहुशो निःप्रश्नव्याकरणीकृत्यास्माभिः सिद्धान्तरहस्यसुधारसं पायिता अपि भाग्यविपर्ययात् तमुद्वम्य स्ववसतिकोणके प्रविश्य प्रतिपदमसभ्यवाग्वर्षणेन स्वयमेव प्रकृतप्रमेयस्य सभानर्हतां सूचयन्त आजन्मप्रगीतोत्सूत्रसूत्रणविषोद्गारप्रकारं प्रेक्षावतामनुपादेयं प्रमेयं चिकीर्षन्तः प्रकृतिस्वच्छस्य कज्जलसन्निधेः कालिमा-वभासिनः स्फटिकस्येव निसर्गायतनस्य पार्श्वस्थादिपरिग्रहेणानायतनतया प्रतिभा-स्वरस्यापि तस्यायतनत्वसिद्धयेऽनुमानप्रमाणमेवमुपन्यस्यन्ति आशापल्लीवदनतिल-कायमानोदयनविहारान्तर्वर्तिन्यर्हद्विम्बानि यतिगृहिणां वन्दनीयानि, परतीर्थिका-ऽपरिगृहीतत्वे सति श्वेताम्बरयतिप्रतिष्ठितार्हद्विम्बत्वात् यदेवं तदेवं यथोभय-वादि संप्रतिपन्नमनिश्राकृतं, तथा चैतानि, तस्मात् वन्दनीयानि इति ।

अन्तः— अतो गीर्वाणप्रगुणेत्यादि त्वद्वाक्यमुत्तानवावदूकप्रलापकल्पं तदेवमलमेभिर्भव-त्प्रयुक्तैर्जात्युत्तरैरुन्मत्तप्रलापैरिव बालकेलिकारैः यच्च सोऽयमभञ्जि सभासदम् । समक्षमिति स्वयं स्वावदातोत्कीर्तनं तद्यदाशापल्ल्यां तदान्यदुपासकदण्डनायकश्रीअभ-यडप्रभृतिसभासदां समक्षं यदभूत् तत् सर्वत्र गूर्जरत्रायां प्रतीतम् । अथ स्ववसति-कोणके तदा स्वस्य गेहे नर्दिता प्रकाशनमात्रमेव । यदपि पितुः प्रबोधविधये इत्यादि तत्रायं पुण्यात्मा विधिचैत्यादिविचारसारक्षोदकोविदशिरःशेखरः सा० क्षेमं-धरः सकलपवित्रगोत्रपरिवारेण सह प्रभुश्रीजिनदत्तसूरियुगप्रधानप्रकाशितविधि-मार्गप्रतिबाधबन्धुरः एवेति स्वकृतप्रकृतवादस्थानकमसिद्धसाध्यत्वान्न सम्यक् साधनमिति भवता स्वयमेव सूचितं सम्यक् साधनं हि स्वसाध्यं साधयत्येवेति । यत् त्वस्मिन् वादस्थले भवतामामूलपर्यन्तमस्मात् प्रतिपदमसभ्यगीर्वाणासारवर्षणं त[त्] कुलव्रतमेतत् । पूर्ववंश्यक्रमो हि तच्चरितमनुवर्त्तमानैः पाश्चात्यैर्भवादृशै-रवश्यं प्रत्युपेक्षणीयः तदुपेक्षणे तदन्तेवासिता प्रवासप्रसंगादिति तदेवं विपक्ष-पक्षणेन(?) नानासिद्धान्तसंवादपूर्वकमनिश्राकृतानायतनरूपं चैत्यत्रयं व्यवस्थापितम्, ततश्च—

उद्धृत्य श्रुतवारिधेर्निरवधेः प्राक्सूरिवृन्दारकै-
न्यस्ताशस्य रहस्यसंहतिसुधासद्ग्रन्थकुण्डे त्वियम् ।
तामेतां प्रसमान उद्धततमोरूपो निरूप्यैषको
निष्कण्ठः कठिनेतराद्भुतगिरा चक्रेण चक्रे बुधः ॥१॥

पूज्यश्रीजिनवल्लभप्रभुपदाध्यारुरोहद् यशः
सूरिश्रीजिनदत्तदत्तपदवोराजीविनीभास्वतः ।
शिष्यः श्री[जिनचन्द्रसूरिसुगुरोर्विद्यामरस्वानिति
व्यध्वध्वंस(?)विधेर्व्यधाज्जिनपतिः सूरिः प्रबोधोदयम्] ॥२॥

इति श्रीखरतरखरतरगणोदयगिरिदिनमणिश्रीजिनपतिसूरिविरचितोद्भूत पयोनिधिप्रबो[धो]दयनामा वादस्थलग्रन्थः समाप्तः । ग्रन्थाग्रन्थम् २४२५ श्लोकप्रमाणे अखेर ३५ ॥

जलाद्रक्षं मलाद्रक्षं तथा मूषकराजतः ।
तलबिंदोः पुनः कुर्याद् रक्षामग्नेः सकाशतः ॥

संवति बाणाङ्क-चन्द्राष्टक इति शाके(१८९५), ख-गुणाऽष्ट-रात्रि-(१८३०)प्रमिते सिंहमासेऽसितपक्षे चतुर्दश्यां मंगलवासरे इदं पुस्तकम् ।

[3247] **आदिः**— ऐन्दवमंडलनिर्मलकेवलकमलाविलासपरिकलितम् ।
त्रिदशाधिपतितिनिस्तुतमिद्धगिरं वीरमभिगम्य ॥१॥

चतुरधिकारनिबद्धं सुतर्कभाषासमृद्धशुद्धवचः ।
वक्ष्येऽञ्चलमतदलनाप्रकरणमन्योपकाराय ॥२॥

अन्तः— अविधिमतविषौषधामेतत् प्रकरणमन्यगुणोपकारहेतुः ।
व्यरचि तत् ख-वसु-देव-भूमितेऽब्दे पुरवरकर्पटवाणिजे च लासे ॥१॥ (१४८०)

सुसाधवः साधु विशोधयन्तु शुद्धाशया ग्रन्थममुं च सम्यक् ।
जीयात् त्वयं वैबुधवाच्यमानः श्लोकः सहस्रेण विशिष्टमानः ॥२॥

इह किंचिदनागमं वचो यदनाभोगवशादिह नोदितम् ।
तदनर्घ्यगुणास्पदं बुधा मम मर्षन्तु सहर्षभूषणाः ॥३॥

इति श्रीतपागच्छनायकप्रभुश्रीसोमसुन्दरसूरिगुरु-शिष्यश्रीमुनिसुन्दरसूरि-क्रमाम्भोरुहभृंग-पं०हर्षभूषणगणिविरचितेऽञ्चलमतदलनप्रकरणे प्रत्यनुमाने द्वितीया-दिदशदृष्टान्तशुद्धिरूपश्चतुर्थोऽधिकारः ।

इति अविधिमतविषौ(षधा)पराह्वयं, प्रकरणं ग्रन्थाग्रम् १००० । संवत् १४८० पुष्यार्के समर्थितः कर्पटवाणिज्ये लासे च ।

अथ गुर्वावली—

श्रीवर्द्धमानविभुशिष्यश्रीगौतम-सुधर्मस्वामिसन्ताने गुरुपरंपराया द्वादश-वर्षावध्याचाम्लतपस्करणेन तपोगच्छप्रवर्त्तकाः श्रीजगच्चन्द्रसूरयो बभूवांसस्त-

दनुक्रमेण श्रीदेवसुन्दरसूरिगुरवो बभूवुस्तच्छिष्या महोक्षागुरुज्ञानसागरसूरिपितृ-धर्मगुरुश्रीकुलमण्डनसूरि-श्रीगुणरत्नसूरि-श्रीसोमसुन्दरसूरि-श्रीसाधुरत्नसूरयश्चक्षुः-प्रत्यक्षा एव, तेषु तत्पट्टधरा श्रीसोमसुन्दरश्रीगुरवस्तपागच्छाधिराजाः संप्रति विजयन्ते। तच्छिष्याः श्रीमुनिसुन्दरसूरिश्रीजयचन्द्रसूरि-श्रीभुवनसुन्दरसूरि-श्रीजिन-सुन्दरसूरयश्च जगदुद्बोधकास्तत्र नैकप्रासादपद्मचक्र-षट्कारक-क्रियागुप्तक-तर्कप्रयो-गादि नैकचित्रैकाक्षर-द्व्यक्षर-पंचवर्गपरिहारादिनैकस्तवमयसुरतरंगिणीविज्ञप्तिनामधे-याष्टोत्तरशतहस्तमितचित्रठकप्रणेतृचातुर्वैद्यवैशारद्यश्रीसमलंकृतश्रीमुनिसुन्दरसूरिक्रम-कमलमरालेन श्रीगुरूक्तसकलसामाचारीप्रवर्त्तकनिरंतरनिरीहतपः-स्वाध्यायपरपरम-हर्षीभूतपितृपूज्यहर्षसेनगणिप्रसादसंपन्नस्वकर्मलाघवानुरूपसंयमसुकृतभूषणेन हर्ष-भूषणेन श्रीगुर्वादिमनीषिकया ग्रन्थोऽयमलेखि पुराभिरामवृद्धग्रामवासिना प्राग्वाट-ज्ञातीयमुकुटेन श्रीदेवगुरुभक्तेन व्य० हरियाकेन भा०हीरादे-पुत्रपाल्हा-पौत्र-साजण-पुत्रीसरमू-स्नुषामाधूप्रभृतिधर्मकुटुम्बयुतेन स्ववित्तसाफल्यकृते-प्रतिदशकं लेखयता प्रतिरियमलेखि।

संवत् १७६७ वर्षे मागशिरवदि ९ रविवासरे तद्दिने श्रीपूर्णिमापक्षे प्रधानशाखायां सकलभट्टारकशिरोमणिभट्टारकपुरन्दरभट्टारकश्री५महिमाप्रभु(भ)सूरि-तत्शिष्यसुविनेयी मुनिलालजीकेनेदं पुस्तकं लिपीकृतम्।

[3248] **सूचनम्**— अस्याः प्रशस्तिः No.3247 वद् ज्ञातव्या।

[3255] **आदिः**— इन्द्रवृन्दनतं नत्वा सर्वज्ञं सर्वदर्शिनम्।
ज्ञातारं विश्वतत्त्वानां वक्षे(? क्ष्ये) शास्त्रानुसारतः ॥१॥

कस्मिन् तिथिक्षये जाते का तिथिः प्र(? परि)पाल्यते।
वृद्धौ सत्यां च का कार्या तत् सर्वं कथ्यते मया ॥२॥

अन्तः— उमास्वातिवाचः प्रघोषश्चैवं श्रूयते—

क्षये पूर्वा तिथि[:] कार्या वृद्धौ कार्या तथोत्तरा।
श्रीवीरज्ञाननिर्वाणौ कार्यौ लोकानुगैरिह ॥१॥

इति श्रीश्राद्धविधौ प्रतिपादितमस्ति। तस्मात् कदाग्रहं त्यक्त्वा यथावदागमानुसारेण पूर्वाचार्यपरंपरया च प्रवर्त्तितव्यं परं कदाग्रहेण कृत्वा कुमार्ग-प्रवर्त्तनं न कार्यं उत्सूत्रप्ररूपणेनानन्तसंसारवृद्धिः तस्मात् सिद्धं चैतत् पूर्णि-मामिवृद्धौ त्रयोदशीवर्द्धनम् लि०पं०देवेन्द्रेण ॥१॥

[3257] **आदिः**— निर्ल्लोठितशठकमठं त्रैलोक्यप्रथितचारुकारुण्यम्।
प्रणिपत्य श्रीपार्श्वं तपोटमतकुट्टनं वक्ष्ये ॥१॥

अन्तः— इति जिनप्रभसूरिकृतं तपोटमतकुट्टनममत्सरः भवति।
सूक्ष्मधिया परिभावयन् बुधजनो विधिमार्गविचक्षणः ॥९९॥

इति तपोटमतकुट्टनशतं समाप्तम् । ग्रंथाग्रम् ११० श्लोकाः ॥
श्रीपूर्णिमापक्षीय भ०श्रीमहिमाप्रभसूरीशक्रमाब्जसेविभावरत्नेनालेखि ।

[3263] **मू०आदिः—** श्रीमहिमाप्रभसूरिसद्गुरुभ्यो नमः ॥

लक्ष्मीपुण्यगृहेऽणहिल्लपुरके श्रीपत्तने पत्तने
याथार्थ्यं दधतीह रत्नखनितो ढंढेरके पाटके ।
श्रीवीरः कलिकुण्डपार्श्वभगवान् प्रौढिं गतश्श्यामलः
पार्श्वो नाथ इति त्रयो जिनवराः कुर्वन्तु वो मंगलम् ॥१॥

नित्यं स्नात्रमहैरिहैव भविकैः पुष्पादिभिः पूजितः
सद्भिः साधुगणैर्हृदंबुजपदे संस्थापितो भावतः ।
श्रीपंचासरपार्श्वनाथ इति यः प्रासिद्ध्यमग्रे गतः
सोयं वो विदधातु वांछिततर्तिं चिंतामणीतोधिकः ॥२॥

ध्यात्वा सारस्वतं तेजो महिमाप्रभचित्पदम् ।
पूर्णिमीयगणाधीशश्रीभावप्रभसूरिभिः ॥३॥

प्रतिमाशतकग्रंथेर्वृत्तिरोघत्पृथक् कृता ।
सूत्रमात्रार्थदा शिष्यज्योतीरत्नस्य हेतवे ॥४॥

मू०अन्तः— इति श्रीप्रतिमाशतकं समाप्तम् ॥

संवत् १७९३ मिते माघमासे शुक्लपक्षे सप्तम्यां तिथौ गुरुवारे पूर्णिमागच्छीयभ०श्रीश्रीभावप्रभसूरिभिर्लिखितम् ॥

वृ०अन्तः— जयति सुरनतः श्रीवर्द्धमानो जिनेंद्रो
ददद‌भिमतमत्र प्राणिनां कल्पकल्पः ।
जगति जनितसौख्यं शासनं वर्त्तते सद्-
विमलमिह यदीयं गाढमिथ्यात्वभेदि ॥१॥

तत्पट्टाम्बुजभास्करो गणधरः स्वामी सुधर्माऽभवत्
तस्मात् सूरिवराः क्रमात् समभवंश्चारित्रभाजो बुधाः ॥
श्रीचंद्रप्रभनामसूरिरभवत् श्रीपूर्णिमागच्छराट्
तद्वंशे विदितोथ सूरिरिह यो विद्याप्रभो [नाम] जित् ॥२॥

तदनु वाग्विजितामरसूरयः समभवल्ललितप्रभसूरयः ।
अजनि सूरिवरो विनयप्रभः प्रवरतत्पदभूषणसन्निभः ॥३॥

प्रविलसन्महिमण्डलकीर्तयश्चरणशुद्धिविराजितमूर्त्तयः ।
सुगुरवो महिमाप्रभसूरयः शुभतदीयपदे गुणभूरयः ॥४॥

तदीयपादांबुजचंचरीकस्तदीयया सत्कृपया सुखाढ्यः ।
ख्यातोस्ति भावप्रभनामसूरिः सतीर्थ्यशिष्यादिगणैः समेतः ॥५॥

श्रीश्रीमालिसुवीरवंशकमले श्रीराजहंसोपमो
रामाकुक्षिसमुद्भवो जयतसीदेहांगजो दीप्तिमान् ।
जातो योऽखिलसाधुकारतिलकः श्रीतेजसीश्रेष्ठिराट्
तेन श्राद्धवरेण यत्पदमहो द्रव्यव्ययैर्निर्मितः ॥६॥

सूरिभावप्रभेणास्यां तेनानाभोगतो मया ।
वृत्तौ पृथक्कृतायां यत् तच्छोध्यं विबुधैरसत् ॥७॥

त्र्यंकाश्व-भूमिते (१७९३) वर्षे माघशुक्लाष्टमीतिथौ ।
वारे देवगुरौ जाता पूर्णेयं वृत्तिरुत्तमा ॥८॥

इति श्रीमत्पूर्णिमागच्छीयभट्टारकश्रीभावप्रभसूरिसमुद्धृता प्रतिमाशतक-लघुवृत्तिरियं शिष्यउद्योतीरत्नस्य हेतवे संपूर्णा ॥

[3266] **आदिः—** सुधर्म्मस्वामिनं नत्वा तदीयवचनानुगम् ।
विशेषशतकं वक्ष्ये शिष्यप्रश्नोत्तरप्रदम् ॥१॥

अन्तः— श्रीमत्खरतरगच्छे श्रीमज्जिनसिंहसूरिगुरुराज्ये ।
साम्राज्यं कुर्वाणे युगप्रधानाख्यबिरुदधरे ॥१॥

विक्रमसंवति लोचन-मुनि-दर्शन-कुमुदबांधव(१६७२)प्रमिते ।
श्रीपार्श्वजन्मदिवसे पुरे श्रीमेडतानगरे ॥२॥

युगप्रधानपदवी श्रीअकब्बरसाहिना ।
येभ्यो दत्ता महाभाग्याः श्रीजिनचन्द्रसूरयः ॥३॥

तेषां शिष्यो मुख्यः स्वहस्तदीक्षश्च सकलचन्द्रगणिः ।
तत्शिष्यसमयसुन्द[र]सुपाठकैरकृत श[त]कमिदम् ॥४॥

इति श्रीसमयसुन्दरोपाध्यायविरचितं विशेषशतकं संपूर्णम् ॥

(सं०१६८७वर्षीयगूर्जरदेशाधिकृतदुष्कालवर्णनम्-)

मुनि-वसु-षोडशवर्षे(१६८७) गुर्जरदेशे च महति दुःकाले ।
मृतकैरस्थिग्रामे जाते श्रीपत्तने नगरे ॥१॥

भिक्षुकभयात् कपाटे जटिते व्यवहारिभिर्भृशं बहुभिः ।
पुरुषैर्माने मुक्ते सीदति सति साधुवर्गेपि ॥२॥

जाते च पंचरजतै[रू] धान्यमणे सकलवस्तुनि महर्घ्ये ।
परदेशगते लोके मुक्त्वा पितृ-मातृ-बन्धुजनान् ॥३॥

हाहाकारे जाते मारिकृतानेकलोकसंहारे ।
केनाप्यदृष्टपूर्वे निशि कोलिककुंटिके नगरे ॥४॥

तस्मिन् समयेस्माभिः केनापि च हेतुना च तिष्ठद्भिः ।
श्रीसमयसुन्दरोपाध्यायैर्लिखिता च प्रतिरेषा ॥५॥

मुनिमेघविजयशिष्यो गुरुभक्तो नित्यपार्श्ववर्ती च ।
तस्मै पाठनपूर्वं दत्ता प्रतिरेष पठतु मुदा ॥६॥

प्रस्तावोचितमेतत् तु श्लोकषट्कं मया कृतम् ।
वाचनीयं विनोदेन गुणग्राहृविदां वरम् ॥७॥

ग्रन्थ १८५० ॥

[3268] आदिः— स्याद्वादामृतसंसिक्ताः कदाग्रहविषापहाः ।
वन्दे जैनेश्वरीर्वाचः परास्तसुमनःशुचिः ॥

इह केचिज्जिनपतिमतानुसारिणोऽप्यपारतमतमःस्तोमास्तसमस्तशेमुषीविशेषास्तत्तत्कदाग्रहग्रहिलतया सकर्णाभ्यर्णप्रचारपरिहारपरवचःप्रपंचचातुरीधुरीणतया च जनितसज्जनमनोविश्लेषाश्चतुस्त्रिंशदतिशयवतां भगवतामर्हतामपि श्वेतांबरयतिप्रतिष्ठितास्वपि प्रतिमास्वनाभिवन्दनीयतामुपदिशन्ति तान् प्रतीदमनुमानमुपन्यस्यते ।

औष्ट्रिकमतकालकूटकुम्भो भुवनातङ्कनिमित्तमत्र योभूत् ।
उपपत्तिपरंपराप्रहारैः सोयमभञ्जि सभासदां समक्षम् ॥१॥

आसीत् चर्वितवादिगर्वगरिमा श्रीदेवसूरिप्रभु-
स्तत्पादाब्जमधुव्रतः समजनि श्रीमन्महेन्द्रप्रभुः ।
शिष्यस्तस्य पितुः प्रबोधविषये सिद्धान्तसिंधोः सुधा-
मुद्धृत्यास्खलिते विचारमचिरात् प्रद्युम्नसूरिर्व्यधात् ॥२॥

[3269] अन्तः— इति श्रीसंदेहशतकं संपूर्णम् ॥

श्रीसंडेरगच्छे उपाध्यायश्रीधर्म्मसागर–शिष्यवा०श्रीदयासागर–शिष्यमु० गुणसागर-मु०वीरसागर–मु०चारित्रसागरलिखतं योधपुरदुर्गे ॥

[3270] आदिः— सद्भूतभावि प्रविकाशनैकभानुप्रभं वीरजिनं प्रणम्य ।
सम्मील्यसंदेहपदानि वक्ष्ये क्रियन्त्यपि प्राकृतबोधहेतोः ॥१॥

अन्तः— श्रीवृद्धगच्छाम्बुधिपूर्णचन्द्रश्रीदेवसूरिः सुगुरुर्बभूवे ।
काष्ठाम्बरं यः कुमुदं विजित्य श्रीसिद्धराजं स्ववशं वितेने ॥५॥

तस्यान्वये यस्य बभूव साक्षात् सरस्वतीति प्रथितः पृथिव्याम् ।
सूरीश्वरः श्रीजयमंगलाख्यस्तच्छिष्यवर्योऽमरचन्द्रसूरिः ॥६॥

श्रीधर्मघोषसूरिस्तत्पट्टे सुरगुरोः समप्रतिमः ।
यः कुम्भयोनिमुनिरिव शास्त्रार्णवमापपावचिरात् । ॥७॥

श्रीधर्मतिलकसूरेर्गुरुबन्धुर्ज्ञानकलशनामास्ति ।
विहितस्तेन परेषां संदेहसमुच्चयो ग्रन्थः ॥८॥

श्रीसूरिभिः प्रसादं विधाय संशोधनीय एष तराम् ।
यस्माज्जैनमुनीनामुपयोगस्त्वत्र बहुलोऽस्ति ॥९॥

यावन्मेरुर्धरा यावत् यावत् चन्द्र-दिवाकरौ ।
तावद् विजयतामेष वाच्यमानो विचक्षणैः ॥४१०॥

सारग्रन्थः समाप्तः ॥

[3271] **आदिः—** श्रीगुरुभ्यो नमः । भट्टारकश्रीविजयदानसूरये नमः । भट्टारकश्रीहीरविजयसूरये नमः । भट्टारकश्रीविजयसेनसूरये नमः । संप्रतिविजयमानगच्छाधिराजभट्टारकसार्वभौमसौभाग्यभाग्यवैराग्यादिगुणगणातिशायियुगप्रधानसमानभट्टारकश्रीविजयदेवसूरये नमः । पूर्वं श्रीविजयदानसूरीणां वचनोत्थापकं० ।

अन्तः— संवत् १६७७ वर्षे भाद्रपदशुक्लत्रयोदशीदिने श्रीरानेरबन्दिरे उपाध्यायश्रीरत्नचन्द्रगणिभिः सागरकुमताहिविषजांगुलीत्यपरनामा हितोपदेश इति प्रसिद्धनामा ग्रन्थः कृतः संपूर्णः ॥

वाच्यमानः श्रूयमाणः पठ्यमानश्च सादरम् ।
लेख्यमानः पुस्तकेषु ग्रन्थोयं मे प्रवर्त्तताम् ॥१॥

सूर्याचन्द्रमसौ यावद् यावत् सप्त धराधराः ।
यावत् तपागणस्तावदयं जयतु पुस्तकः ॥२॥

इति श्रीकुमताहिविषजांगुलीमंत्रनामकं शास्त्रं संपूर्णम् ।

प्रशस्तिः— संवत् १६८२ वर्षे भाद्रपदवदि ११ दिने गुरुवासरे श्रीसांतलपुरनगरे सं०धूला-सं०वरकम-सं०धरमण-सं०गोकुलप्रमुखोत्तमकुलराजमाने उपा० श्रीरत्नचन्द्रगणिभिर्लिखितं चिरं जयतु ।

इति श्रीकुमताहिविषयजांगुलीमन्त्रनामग्रन्थः संपूर्णः ॥

संवत् १६८१ वर्षे कार्त्तिकवदिप्रतिपद्दिने रवौ भरण्यां व्यतिपातयोगे श्रीअहम्मदावादे श्रीविजयदेवसूरिभिर्मुक्तिसागरउपाध्यायपदग्रहणपूर्वकं तपागच्छान्निःसृतस्तस्मिन्नेव दिने सागरकुमतं प्रवृत्तम् । तत्र प्रथमं सागरकुमतमूलं मुक्तिसागरः श्राद्धश्च शांतिदासाख्यः । तदनु संवत् १६८१ वर्षे प्रथमचैत्रशुक्लनवमीदिने पुनर्वसुनक्षत्रे नवमरवियोगे गच्छभेददोषमपास्य श्रीअहम्मदावादे सकलवाचकप्रभृतियतिसमुदायेन सह सकलसंघेन सह महाडंबरपुरस्सरं अहं शिष्योस्मीति वदतः श्रीवि[ज]यदेवसूरीणां श्रीविजयानन्दसूरयः पादान् प्रणेमुः । अथ श्रीतपागच्छो दिनकरः सागरकुमतवार्दलपटलरहितोऽधिकतेजस्वितां प्राप्तश्चिरं जयतु ।

श्रीशत्रुंजययात्रार्थं समागतेन सीरोहीवास्तव्येन सा० तेजपालेनेदं यशस्तिलकं जगृहे ग्रन्थाग्रम् ५१८ ॥

[3274] **मू०आदिः—** हुंबडकी पचीसी(?) लिख्यते ॥

सिद्धांतः प्रतिपद्यते न भवता यः सांप्रतं वर्तते ।

मू०अन्तः— श्रीरानेरपुरस्थढुंढकगणैः सार्द्धं तु चर्चाऽभवत्
तत्प्रत्युत्तरयांचकार मतभित् शास्त्रार्थयुक्त्या पुनः ।
श्रीतेजोविजयाभिधो बुधवरस्तच्छिष्यसंख्याचणः
श्रीदानाद्विजयो रसर्द्विसमये श्रुत्यैश्चतुर्मासके ॥३६॥

इति ढुंबडछत्रीसी समाप्ता ॥

स्त० आदिः— ॥ दिगंबरनो सिद्धांत जिनप्रणीत नथी तेहनी युगति लिषीइं छइं ।

श्रीजिनमुखनिर्गताचारांगसूत्राणि विमुच्य कुन्दकुन्दाचार्यादिकृतप्रकरणानि सिद्धांततया मन्यन्ते तत्र युक्तिर्लिख्यते-

स्त०अन्तः— श्रीरानेरपुरवासी ढुंबड साध साथें चर्चा थई, तेहनो प्रत्युत्तर करतो हवो मत ६ भेदे परमतखण्डनयुक्ति अने शास्त्र करीने श्रीतेजविजयनो शिष्य-पण्डितदानविजय चर्चावादी ।

संवत् १७६२ वरषे काव्ये करीने चोमासामे प्रत्युत्तर दीधो ।

[3275] **आदिः—** श्रीजिनदत्तसूरिसद्गुरुभ्यो नमः ॥

प्रणम्य रम्यशर्मणां कारकं विघ्नवारकम् ।
श्रीवामादारकं पार्श्वं भुवनैश्वर्यसाधकम् ॥१॥

प्रौढप्रभावसद्भावाविर्भावकमनुत्तरम् ।
योगिनीनां चतु[:]षष्टेः साधकं निर्विबाधकम् ॥२॥

हृदि स्मृत्वा गुणान् धृत्वा स्फुटं विबुधभाषितान् ।
तस्यैव विविधान् श्रीमज्जिनदत्तगुरुं वरम् ॥३॥ युग्मम् ॥

तद्दूषकं वचोयुक्त्या विदूषकमिवोत्कटम् ।
दूषयामस्सतां दोषान् प्रणयन्तं मुधा मुदात् ॥४॥

अन्तः— पर्युषितपूपिकाग्रहणाधि०२८ । साधुसाध्वी सह विहारनिषेधादि०२९ । संगरबुब्बुलादीनां द्विदलत्वाधिकारा०३ । इत्युत्सूत्रखण्डनाधिकाराः ॥

संवत् १८६५ रा०मि० पोह बद १० शुक्रवारा ॥ याद्दशं० ।

जलाद्रक्षे मलाद्रक्षे तथा मूषकराजतः ।
तैलबिंदोः पुनः कुर्याद्रक्षामग्नेः सकाशतः ॥

सम्वति बाणाङ्क-चन्द्राष्टके(१८९५)रात्रिप्रमिते पोषकृष्णापक्षे १० ।

[3276] **आदिः—** ॐ श्रीविजयदानसूरिभ्यो नमः ॥

स्वस्ति श्रीमन्तमानन्दज्ञानामृतपयोनिधिम् ।
नत्वा संप्रति तीर्थेशं श्रीमद्वीरजिनेश्वरम् ॥१॥

दुर्मतहस्तिमृगग्रासमृगारिं मृगपुंगवम् ।
श्रीमद्विजयनामाङ्कं नत्वा सूरीश्वरं पुनः ॥२॥

कदाग्रहविमुक्तानां मत्सराग्रस्तचेतसाम् ।
अल्पसूत्रवतां किंचिदुपकारपरायणम् ॥३॥

खामुंडिकमतोत्सूत्रदीपिकां बोधहेतवे ।
यथागुरुवचःप्रीति प्रकुर्वे मृदुभाषया ॥४॥ चतुर्भिः कलापकम् ॥

अत्र औष्ट्रिकमतोत्सूत्रप्रदीपिकायां चत्वारोऽधिकाराः । तत्र प्रथमाधिकारे औष्ट्रिकमतनामव्यवस्थापना ।

अन्तः— श्रीविजयदानसूरीनापृच्छ्यापृच्छ्य शास्त्रसम्मत्या ।
औष्ट्रिकमतोत्सूत्रोद्धतांधकारप्रणाशपरा ॥१॥

श्रीवीरशासनस्नेहसिक्ता ह्याशासनस्थितिः ।
जीयाद् दुर्वाग्वन्चोवातैरक्षोभ्या दक्षहस्तगा ॥२॥

मुनीन्दु-षद्-क्षमावर्षे (१६१७) हर्षात् शोभालये पुरे ।
धर्मसागरसंज्ञेन निर्मिताशु प्रदीपिका ॥ ३ ॥ त्रिभिर्विशेषकम् ॥

इति श्रीमत्तपोगणनभोऽङ्गणनभोमणिश्रीविजयदानसूरीश्वरशिष्योपाध्यायश्रीधर्मसागरगणिविरचितायामौष्ट्रिकमतोत्सूत्रप्रदीपिकायामौष्ट्रिकमतोत्सूत्रस्यौष्ट्रिकसुखैर्व्यवस्थापनालक्षणश्चतुर्थोधिकारः ॥६॥

इति औष्ट्रिकमतोत्सूत्रप्रदीपिका ॥

[3277] मू० अन्तः— इत्यौष्ट्रिकमतोत्सूत्रोद्घाटनकुलकं संपूर्णम् । महोपाध्यायश्री६धर्म्मसागरगणिकृतम् ॥

अव०अन्तः— एवं प्रागुक्तप्रकारेण खामुण्डिकमतोत्सूत्रं खरतरमतोत्सूत्रं गुरुवचनं श्रीविजयदानसूरिवचनं लब्ध्वा अवाप्य मया धर्मसागरेण दर्शितं किमर्थं शीघ्रं निजबोधनार्थमात्मज्ञानार्थमिति ॥१८॥

इति कुलकावचूर्णिः संपूर्णा लिखिता गणिश्रीसौभाग्येण ॥

[3280] अन्तः— विक्क[म]संवच्छरये पनरसपणहुत्तरीसये वरिसे ।
भविआबोहणत्थं जिणपडिमाहुंडिया रइया ॥७॥

एए नाणइहगुणाइ सुआणुसारेण किंच विक्खाया ।
अरहंतसिवं जीवा थिरभूए[सु] संपन्ना ॥८॥

इति श्रीमत्तपागच्छाधिराजपरमगुरुश्रीहेमविमलसूरिपादपद्मभृंगेण श्रीसाधुक्रियोद्धरणधोरश्री...... ... .पवित्रचारित्रगुणविस्फुरत्सार्वत्रिकब्रह्मिमचंद्रश्रीआणंदविमलसूरिपादकमलसंसेवकेन महाविद्याविचारथप्रमाणियं श्रीकुशलमाणिक्य-

गणिहस्तप्राप्तचारित्रकुमतकुवादगजघटापंचाननविरुदस्कश्रीजिनप्रतिमाविचारविव-
रणकारिपंचकुमूर्त्ति पं०सहजकुसलगणिना द्वितीयनाम्ना पं०श्रीहानर्षिगणिना
श्रीजिनप्रतिमादिविचारयुक्तिहुंडिका विहिता ॥

इति श्रीहानऋषी(षि)कृता हुंडिका संपूर्णा ॥

[3282] **अन्तः**— एवं पज्जोसवणा संगइ जुत्ता चउत्थि तज्जुत्ती ।
सिद्धन्तधम्मसायर लिहिआ दसगाहसयगेण ॥११०॥

इति श्रीपर्युषणादशशतकं श्रीमत्तपागणनभोनभोमणिश्रीहीरविजयसूरीश्वर-
शिष्योपाध्यायश्रीधर्म्मसागरगणिविरचितमिति । संवत १९२२ ना आषाढ वदि
२ दिने सूर्यवारे लिखावितम् ॥ सा०रवचंद जयचंद श्रीराजनगरे वास्तव्य-
श्रीऋषभदेवजीप्रसादात् ॥

वृ० अन्तः— प्रकरणकर्त्तुर्नामापि सूचितं बोध्यमिति गाथार्थः ॥११०॥

इति श्रीश्रीमत्तपागणसुविहिताग्रणीहीरविजयसूरीश्वर-शिष्योपाध्याय-
श्रीधर्म्मसागरगणिविरचिता स्वोपज्ञपर्युषणादशशतकवृत्तिरियमिति ।

लिपिकृतं फतेविजेजी श्रीतपागच्छे ।

[3284] **आदिः**— ॐ नमः श्रीविजयदानसूरिगुरुभ्यो नमः ॥

प्रणम्य परमानंदकन्दं शक्रार्चितक्रमम् ।
श्रीमद्वीरजिनाधीशं विघ्नौघेभमृगाधिपम् ॥१॥

श्रीमद्विजयदानाह्वं नत्वा सूरिनतक्रमम् ।
स्वोपज्ञां विवृणोमि श्रीवीरद्वात्रिंशिकामहम् ॥२॥ युग्मम् ॥

अन्तः—इति श्रीविजयदानसूरीश्वर-शिष्योपाध्यायश्रीधर्म्मसागरगणिविरचितश्रीमहावीर-
विज्ञप्तिद्वात्रिंशिकावृत्तिः समाप्ता ॥

(अन्यदीयहस्ताक्षरेणोल्लेखः—)

श्रीमत्तपागणनभोङ्गणनव्यभानुश्रीसूरिराड्विजयदानगुरुक्रमाब्जम् ।
संसेव्य भव्यमतिपोतमवाप्य तीर्णे शास्त्रार्णवैस्सकलतार्किकसार्वभौमैः ॥१॥

वादैकलब्धजयवादजनप्रसिद्धाभिख्यैः कुपाक्षिकमतंगजसिंहनादैः ।
श्रीधर्म्मसागरसुवाचकशेखराख्यैर्द्वात्रिंशिका चरमतीर्थकृतः कृतासौ ॥२॥

श्रीविक्रमान्नवरस(२)रसराजवर्षे(१६६९)श्रीस्तम्भतीर्थनगरेऽनुपमश्रियाढ्ये ।
तद्वृत्तिरधुना विमलसागरसंज्ञितेन संशोधिताल्पमतिनापि मया स्वबोधम् ॥३॥

(त्रिभिर्विशेषकम् ।)

[3288] **वृ० आदिः**—प्रणम्य श्रीमहावीरं विश्वविश्वार्थदीपकम् ।
सर्वज्ञशतकं सम्यग् स्वोपज्ञं विवृणोम्यहम् ॥

[3290] अन्तः— विशेषणवती समाप्ता ॥

कृतिराचार्यजिनभद्रगणिक्षमाश्रमणस्येति । ग्रंथाग्रम् ४१४ ।

[3324] वृ०आदिः— प्रवचनसारोद्धारे विषमपदार्थावबोधमाचष्टे ।
श्रीउदयप्रभसूरिः श्रीपार्श्वाधीशमानम्य ॥१॥

वृ०अन्तः— समाप्तोयं प्रवचनसारस्य विषमपदार्थावबोध इति ।

सपादलक्षक्षोणीशसमक्षं जितवादिनाम् ।
श्रीधर्मघोषसूरीणां पट्टालंकारकारकाः ॥१॥

त्रिवर्गपरिहारेण गद्यगोदावरीसृजः ।
बभूवुर्भूरिसौभाग्याः श्रीयशोभद्रसूरयः ॥२॥

स्व-परसमयज्ञानप्रीतप्रकृष्टजगज्जना-
चतुरवचना मोदाघृष्टामरेशगुरुप्रभाः ।
अभिनृपसभं गंगागौरप्रनर्त्तितकीर्त्तय-
स्तदनु महसः पात्रं जाता रविप्रभसूरयः ॥३॥

एवं प्रवचनसारे तच्छिष्यलवश्चकार टिप्पनकम् ।
श्रीउदयप्रभसूरिर्विषमपदार्थावबोधाख्यम् ॥४॥

इह सन्ति तेपि सिद्धान्तसिन्धुपारीणबुद्धयः ।
सुधियः इत्यात्मभुवां कौस्तुभरत्नायते विभ्रम् ॥५॥

प्रवचनसारोद्धारश्रियः समस्तांगसंगसुभगानाम् ।
स्यात् तद्विचारा चर्चा तेषामेषा प्रमोदाय ॥६॥

प्रवचनसारं सारं विषयपदार्थावबोधतः सत्यम् ।
उदयात् सवितुर्बिम्बं विश्वमपि सजीवमाभाति ॥७॥

सर्वप्रकारसाहाय्यकारिणः क्षान्तिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥८॥

अवधानवन्ध्यबुद्धिर्यदत्र न समञ्जसम् ।
उक्तवानहमुत्सूत्रं तत्र मिथ्याकृतं मम ॥९॥

यद्वा यदत्र किंचित् तनुमतिभिर्दुष्टमुदितमस्माभिः ।
प्रीतास्तद्धीमन्तः सन्तः कुर्वन्तु निर्दोषम् ॥१०॥

ग्रन्थाग्रम् ३२०३ सर्वाग्रम् ॥

मुनिचन्द्रसूरि-पण्डितगुणचन्द्राभ्यां भरादिहोपकृतम् ।
प्रथमोत्साहन-वाचन-केखनकर्मप्रकर्षेण ॥११॥

आकाशकमलं यावन्मेरुनालं हरिद्दलम् ।
भानुर्विकाशयस्येष तावन्नन्द्यादसौ भुवि ॥१२॥

श्रीसिद्धान्तावचूरिः ॥.

[3334] वृ० आदिः— अथ प्रवचनसमयसारसिद्धान्तस्य बालावबोधटीका लिख्यते-

छप्पय छन्दः ।

स्वयं सिद्ध करतार करै, निज करम-सरमनिधि,
आपइ करण स्वरूप होइ साधन साधइ विधि ।
संप्रदानता धरइ आपकौं आप समप्पै,
अपादान आपतै आपकौं करि थिर थप्पै ।
अधिकं-णहे-आवी निज वरतै पूरण ब्रह्म पर,
मूढविधि कारकमय विधि रहित विविध एकविधि अज अमर ॥१॥

दोहरा ।

अमृतचन्द्रकृत संस्कृतटीका अगम अपार ।
तिस अनुसार कहौं कछुक सुगम अलप विस्तार ॥६॥

आगइ श्रीकुंदकुन्दाचार्य प्रथम ही ग्रन्थ आरम्भ विषइ मङ्गलाचरण-निमित्त नमस्कार करइ हइ ॥

वृ० अन्तः— दोहरा ।

मूल ग्रन्थ करता भए कुन्दकुन्द मतिमांन ।
अमृतचन्द्र टीका करी देवभाष परवांन ॥१॥

जैसा करता मूलकौ तैसौ टीकाकार ।
तातै अतिसुन्दर सरस वरतै प्रवचनसार ॥२॥

सकल तत्त्व परकासिनी तत्त्वदीपिका नांम ।
टीका सरसुतादेवकी यह टीका अभिराम ॥३॥

चौपाई ।

बालबोध यह कीना जैसें सो तुम सुनहु कहुं मैं तैसें ।
नगर आगरेमें हितकारी कौंरपाल ज्ञाता अविकारी ॥४॥

तिनी विचार जियमैं यह कीनी जो यह भाषा होइ नवीनी ।
अल्पबुद्धि ती अरथ बषानै अगम अगोचर पद पहिचानै ॥५॥

यह विचार मनमै तिन राषी पांडे हेमराज सौं भाषी ।
आगैं राजमल्लनै कीनी समयसारभाषा रस लीनी ॥६॥

अब जो प्रवचन कीहै भाषा तौ जिनधर्म वधै सौ साषा ।
तातैं कहहु बिलम्ब न कीजै परभावना अंगफल लीजै ॥७॥

दोहरा ।

अवनीपति वन्दिहिं चरण सुनयकमल विहसंत ।
साहजिहां दिनकर उदै अरिगणतिमर नसंत ॥८॥

दोहरा ।

सत्रहसे नवओतरा(१७०९) माघ मास सित पोष ।
पंचमि आदितवारकौं पूरण कीनी भाष ॥११॥

षट्सहस्र सत तीनि हैं संष्या सोय प्रवांन (६३००) ।
बिदुष विवेक विचारि करि सुनिज्यो पुरुष प्रवान ॥१२॥

इति श्रीप्रवचनसार–बालबोध पांडे हेमराजजीकृत समाप्त ॥

संवत् १७४५ वर्षे मिती वैशाष वदि ७ तिथौ गुरुवारे लिषतमस्ति । श्रीजेसलमेरुदुर्गे सा० तोडरमल्लजी पुत्र कचरमल्लपठनार्थम् ॥

[3341] आदिः— सिरिवद्धमाणसामियपयजुयलं नमिय सुद्धभावेन ।
वुच्छामि समासेणं गुरुवएसेण पगईणं ॥१॥

अन्तः— सिरिपल्लिगच्छिणायगसूरिमहेसरस्स भणिय सीसेण ।
अजियामरेण रविणा रईया छावत्तरी गाहा ॥७८॥

इति श्रीविचारप्रकीर्णं समाप्तम् ॥

[3342] अन्तः— जणविसए आ किज्जइ पाडलिपुत्ते पसिद्ध जो राया ।
नाणे जो पत्थिज्जइ तेसिं नामेण रइयमिणं ॥८३॥

मुणि–रस–दिणयरसंखे(१२६७) वरिसे विक्कमनिवाउ रइयमिणं ।
कत्तियसुद्धे तेरसि दिणंमि सुगुरुवएसेणं ॥८४॥

इति विचारसारप्रकरणम् ।

[3343] अन्तः— सिरिविक्कमकालाओ राम-तुरगेसु पंचभूमिसु(१५७३) ।
फग्गुणमासे रइयं पगरणमेयं मए विहिणा ॥८५॥

जं दिट्ठं सुयमज्झे संकलीय तह समासओ किंचि ।
सद्दापसद्दमेओ नायव्वो निउणबुद्धिहिं ॥८६॥

सिरिपल्लीगणाहिवेण सूरीसरेणावि महेसरेणेयं ।
कहियं वियारपइन्नं पढिज्जमाणं सुहं देउ ॥८७॥

इति श्रीमहेश्वरसूरिकृतं विचार[सार]प्रकीर्णकं समाप्तम् ।

लिखितं संवत् १६८८ वर्षे चैत्रवदि १३ दिने भट्टारकश्री७श्रीविजयानंदसूरिराज्ये श्रीश्रीआपुरे पण्डितश्री ५ श्रीमानविजयगणिशिष्यपं० अमृतविजयेन वाच्यमानं चिरं जयतु ।

[3345] आदिः— नमिऊण वद्धमाणं धम्मनिहाणं जिणागमं सोच्चा ।
बुच्छामि बोहणत्थं कंपि सरूवं जिणक्खायं ॥१॥

अन्तः— इति श्रीहेमसूरिकृतं विचारसार[प]य[र]णं समाप्तम् ।

[3346] अन्तः— सिरिपल्लीगणाहिवेण सूरिवरेणावि हेमसारेण ।
कहिअं विआरपइण्णं पढिज्जमाणं सुहं देउ ॥८७॥

इति श्रीहेमसूरिकृतंविचाररत्नं संपूर्णम् । मुनि कुंअरविजयपठनार्थम् ।

[3356] आदिः— वीरं गुरुंश्च वन्दित्वा बालबोधविधायिनः ।
वार्त्ताभिरेव लिख्यंते विचारा[:] कतिचिन्मया ॥१॥

दस चउदस जिणवरे चउदस गुणठाणए नमुं(मं)सित्ता ।
चउदस जीवसमासे समासओ अणुक्कमिंतस्स ॥१॥

दस अनइ चऊद जिणवर । एतलइं चउवीस तीर्थंकर । चऊदसमइ गुणठाणइ रहिया नमस्करीनइं चऊद जीवनां स्थानक ते मांहि तेरे जीवने स्थानके समासतउ संख्येपतउ अनुक्रमिइं बालावबोधपणइं बोलिसि ॥

अन्तः— एवं पंचेंद्रीना पांच भेद ॥ ३ तथा नार ... ...

[3358] आदिः— सिरिभद्दबाहुपाए कयप्पसाए नमित्तु सुत्ताए ।

अन्तः— इय तेसट्ठिसलायापुरिसवियारस्स सत्तरि पढओ ।
भविया सिद्धिसिरिहेमतिलयत्तणमुविंति ॥७५॥

इति सलाकासत्तरीप्रकरणं समाप्तम् ॥

[3365] आदिः – महोपाध्यायश्रीधर्मसागरगणिगुरुभ्यो नमः ॥

संपइ वट्टन्ताणं नामग्गहणं सुयं च कमजुयलं ।
किच्चा मच्चा णच्चा वुच्छागममिह परंपरया ॥१॥

अन्तः— वडगच्छसमाचारी पउमाहियइट्ठविमलगुरुद्धारो ।
सिरिभावसूरिप्पहाणमाहप्पधारंतो ॥३९॥

वट्टन्तेहिं तेहिं तेसिं विणयेण सीलदेवेण ।
एवं पगरणमेयं रइयं समत्तलाभाय ॥४०॥

इति श्रीविहरमाणएकवीसठाणु संपूर्ण ॥

संवत् १६३८ वर्षे श्रावणप्रथमवदि ८ दिने स्वर्णगिरी(रिमध्ये) लिषितमस्ति ।

[3377] अन्तः— सत्तरिसयठाण सम्मत्तं ।

संवत् १८११ वर्षे माघमासे कृष्ण १४ तिथौ शनिवासरे पूज्यप्रवर-पंडित सकलि(ल)गुणनिधान सकलि(ल)मुगटायमणि शुभोपमापूज्यजीश्री१०८श्री-जैसिंघजी ऋषि श्री ५ श्रीदेवीचन्दजी लषितं ऋ०भगवान ऋ०श्रीफताजी ऋ०उरजावैः वषता श्रीरस्तु समदडीनगरे ॥

[3382] मू०आदिः— ऐं नमः पार्श्वनाथाय विश्वभावावभासिने ।
यच्छिष्ययुक्तिमाकर्ण्य प्रबुद्धो यः प्रदेशिराट् ॥१॥

मू०अन्तः— गच्छेशश्रीविशेषे विजयप्रभगुरौ राज्यशोभां दधाने
क्षेत्रे क्षेत्रज्ञसत्ताप्रकटनपरमोद्दामधामञ्जानाम् ।
इत्थं केशिप्रदेशिप्रतिवचनमयं स्तोत्रमेतन्निबद्धं
राजप्रश्नीयमुत्रात् क० विनयविमलेनेदमानन्दकारि ॥३२॥

अन्तः— पं०श्रीविनयविमलग०–शिष्यपं०श्रीधीरविमलग०–शिष्यपं०नयविमलकवि-(वी)श्वरे आनन्दकारक कीधुं ॥३२॥

प्रदेशिनृपप्रश्नस्य वार्त्तिकं बालबोधकम् ।
कविनयविमलेनैतत् लिषितं कविधीरविमलकृते ॥१॥

इति बत्रीसीटबार्थः ॥

[3383] आदिः— क्रमनखदशकोटीदीप्रदीप्तिप्रदानै-
र्दशविधतनुभाजामुज्ज्वलं मोक्षमार्गम् ।
पृथगिव विदशनं पार्श्वमानम्य सम्यक्
कतिचिदबुधबुध्यै वच्म्यहं प्रश्नभेदान् ॥१॥

अन्तः— इति प्रश्नशतमेकषष्टियुतं वृत्तरूपं प्रकरणं सटीकं खरतरश्रीजिनवल्लभसूरि-विरचितं समाप्तमिति ॥

[3384] वृ०आदिः— शिरसि यस्य चकासति दीपिका इव फणामणिसप्तकदीप्तयः ।
निखिलभीतितमःशमनाय किं सपदि पार्श्वजिनं विनवीमि तम् ॥१॥

स जयताज्जगतीजनवल्लभः परहितैकपरो जिनवल्लभः ।
चतुरचेतसि यस्य चमत्कृतिं रचयतीह चिरं रुचिरं वचः ॥२॥

तद्विरचितविषमार्थप्रश्नोत्तरषष्टिशतकशास्त्रस्य ।
वितनोमि विवरणमहं सुगमं स्वपरोपकारकृते ॥३॥

मू० अन्तः— श्रीमज्जिनवल्लभखरतरपक्षशृङ्गारहारसुविहितविद्वज्जनचक्रचूडामणि-श्रीजिनवल्लभसूरिवराणां कृतिरियम् ॥

काव्ये मदीये चरितापशब्दे यो वेत्ति विद्वानपशब्दमात्रम् ।
तस्याहमाकल्पमनल्पबुद्धेः पादारविन्दं शिरसा नमामि ॥१॥

लिखितं पंडितश्रीकल्याणसागरमुनिवरैः ।

सू० अन्तः— इति श्रीखरतरगच्छाधिराजश्रीमदभयदेवसूरिपट्टालंकारश्रीजिनवल्लभसूरिविरचिता प्रश्नोत्तरकाव्यवृत्तिरियं समाप्ता ॥

आसीत् पुरा खरतराभिधगच्छनाथः
श्रीमान् जिनेश्वरगुरुः शुभशाखिपाथः ।
सूरिस्ततोपि जिनचन्द्र इति प्रतीतः
शीतद्युति प्रतिमचारुगुणैरुदीतः ॥१॥

तदनु कीर्त्तिभरैरविनश्वराः शुशुभिरेऽभयदेवमुनीश्वराः ।
विहितचंगनवांगसुवृत्तयः परहितोद्यतमानसवृत्तयः ॥२॥

तत्पट्टोदयशैलमौलितरणिः संविग्नचूडामणिः
सूरिः श्रीजिनवल्लभः सममवत् वादीभकुंभे सृणिः ।
तत्पट्टे जिनदत्तसूरिसुगुरुः सर्वाङ्गविद्यावधिः
शुद्धाम्नायविधिः सुधाविधुदधिप्रोद्यद्गुणाम्भोनिधिः ॥३॥

तत्संततौ समजनिष्ट गरिष्ठधामा सूरीश्वरः श्रुतधरो जिनभद्रनामा ।
श्रीजैनचन्द्रगणभृद् गुणरत्नराशेरब्धिस्ततो जिनसमुद्रगुरुश्चकाशे ॥४॥

तत्पट्टराजीवसहस्ररश्मयस्ततो बभुः श्रीजिनहंससूरयः ।
तेषां विनेयैर्विवृतिर्विनिर्ममे यत्नादियं पाठकपुण्यसागरैः ॥५॥

समर्थिता विक्रमसमरेसौ वृत्तिर्वियद्वार्द्धिरसेन्दु(१६४०)वर्षे ।
गुरौ शुभश्वेतसहो दशम्यां श्रीजैनचद्राभिधसूरिराज्ये ॥६॥

पद्मराजगणिसत्सहायतायोगतः सपदि सिद्धिमागता ।
वृत्तिकल्पलतिका सतामियं पूरयत्वभिमतार्थसंततिम् ॥७॥

अज्ञानतो भ्रमवशादविमर्शतो वा यत् किंचिदत्र विवृतं मयका विरुद्धम् ।
तत् शोधयतु सुधियो धृतसाधुवादाः कारुण्यपुण्यमनसो मयि सुप्रसादाः ॥८॥

इति श्रीविवरणकृत्कृतप्रशस्तिरियम् ॥ ग्रन्थाग्रम् १५०० ॥

संवति १६८६ वर्षे मार्गशीर्षमासे शुक्लपक्षेऽष्टमीदिने रविवासरे श्रीबृहत्खरतरगणोत्तमे श्रीजिनचन्द्रसूरिविजयिनि राज्ये श्रीजिनवर्द्धमसूरिसंताने श्रीजिनचन्द्रसूरिगणदन्तावलास्तेषां शिष्यवाचकश्रीखरलाभगणिस्तत्संतत्यनुक्रमे पं०क्षेमकलशगणयस्तदंतेवासिना कल्याणसागरमुनिना लिखितमिदं शास्त्रं स्वपठनकृते शिष्याय चेति श्रीरस्तु ॥

[3385] अन्तः— पं०श्रीजीवविमलगणिशिष्य—पं०जीतविमलगणिना प्रश्नषष्टिशतकमिदं लिखितं स्वस्मै । ग्रन्थाग्रयम् १७०० ॥

[3386] अन्तः— इति प्रश्नोत्तरमेकषष्टिशतं संपूर्णं लिखितमिदम् ॥

बृहस्पतिस्तिष्ठतु मंदबुद्धिः पुरंदरः किं कुरुते वराकः ।
मयि स्थिते वादिनि वादिसिंहे नैवाक्षरं वेत्ति महेश्वरोपि ॥१६३॥

सं० १५०१ माघशुदि ७ शुक्रे लिखितं वृद्धपुरे ॥

[3396] आदिः— श्रीनाभिभूर्जिनवरः कुशलाय वः स्याद् यस्यांसयोरुपरिकुन्तलभारदम्भात् ।
भव्यांगिनां भवसमुद्भवतापशान्त्यै कादंबिनी किमु समुन्नतिमाततान ॥१॥
विश्वप्रशस्यगुणरत्नसमुद्रहृद्यपल्लीयगच्छगगनांगणहीतभासः ।
चारित्रपात्रमतिमात्रशमैकसत्रं श्रीसंघपूर्वतिलका गुरवो जयन्ति ॥५॥

तत्पट्टांभोजतिग्मांशुः श्रीदेवेन्द्रमुनीश्वरः ।
भोला-खेताभिधभ्रातृयुगेनात्यर्थमर्थितः ॥६॥

प्रश्नोत्तररत्नमालां विमलाचार्यनिर्मिताम् ।
विवृणोति सुदृष्टांतैः सुपकारी सतां श्रमः ॥७॥ युग्मम् ॥

अन्तः— समाप्ता चेयं प्रश्नोत्तररत्नमालावृत्तिः ॥

भास्वद्भूरियशाः शशांकवदनः कन्दर्पदर्प्पापहः
श्रीजैनागमपारगः शुचिमतिर्वादीन्द्रचूडामणिः ।
विश्वानन्दकरस्तमस्ततिहरः कारुण्यपाथोनिधिः
सूरीन्द्रः स जयप्रभो विजयतां स्फूर्जत्प्रभावश्चिरम् ॥९॥

संवत् १५२३ वर्षे कार्तिकशुदि २ शुक्रे चाणसमानगरे चतुर्मासकस्थितेन पूर्णिमापक्षे भट्टा०श्रीजयप्रभसूरिभिः स्वयं लिखिता वृत्तिः ॥

[3397] अन्तः— श्रीवर्द्धमानजिनशासनमेरुभूषाभूते सुधर्मगणनायकभद्रशाले ।
श्रीकोटिकाख्यगणकल्पतरौ सुवज्रशाखोऽत्र गच्छ इव राजति चन्द्रगच्छः ॥१॥
तस्मिन् महोज्ज्वलफलोपमितं दधानः श्रीवर्द्धमान इति सूरिवरो बभूव ।
यस्याग्रतः समगृणोद्धरणोरगेन्द्रसूरीन्द्रमन्त्रविविधोपनिषत्प्रकारान् ॥२॥

ततोस्तदोषो नियतं विवस्वान् जिनेश्वरः सूरिवरः समासीत् ।
नोचेत् कथं श्रीधनपालचित्तान्महातमस्तोत्रमपाकरोद् गाम् ॥३॥

तस्मात् बभूवाभयदेवसूरिर्यः स्तंभनापार्श्वजिनेन्द्रमूर्त्तिम् ।
प्रकाश्य शस्याश्च नवांगीवृत्तिः(त्तीः) कृत्वा कृतार्थं स्वजनुस्ततान ॥४॥

तदनु जिनवल्लभाख्यः प्रख्यातः समयकनककषपट्टः ।
यत्प्रतिबोधनपटहोऽधुनापि दंध्वन्यते जगति ॥५॥

ततोजायत सद्विद्यः सूरिश्रीजिनशेखरः ।
यद्यशोहसितो नोष्णकैलाशं(?) शशिशेखरः ॥६॥

ततः प्रवादिव्रजपद्मचन्द्रः श्रीपद्मचन्द्रः समभून्मुनीन्द्रः ।
यः स्थापयत्येव तमोविवादं जगच्चकारास्ततमोविकारम् ॥७॥

तदनु विजयचन्द्रः सूरिरासीदतन्द्रः प्रवरसमयवाणीदृष्टिपीयूषवृष्ट्या ।
य इह जगति भव्यारामसारामिको वा वृषकिशलयमाकामाकिलं व्याततान ॥८॥

तस्मादासीत् प्रशमसुखगुणैरद्वितीयो द्वितीयः
षट्तर्कग्रन्थवेत्ताभयपदपुरतो देवनामा मुनीन्द्रः ।
तस्मात् प्रालेयशैलादिव भुवनजनव्रातपावित्र्यहेतु–
र्जज्ञे गंगाप्रवाहः स्फुरदुरुकमलो रुद्रपल्लीयगच्छः ॥९॥

ततो बभूव श्रीदेवभद्रः सूरीन्द्रशेखरः ।
यत्करांभोजसंस्पर्शो जज्ञिरे श्रीधरा नराः ॥१०॥

अभूत् ततः कृतानन्दः प्रभानन्दमुनीश्वरः ।
यत्र प्रभाप्रभाप्रज्ञाप्रभावाः प्रापुरुन्नतिम् ॥११॥

ततोऽभूच्चन्द्रसूरीन्द्रोभूत् स्वतोयं धियाधिकम् ।
विबुध्य धिषणाहीणो मीनाल्यमशिश्रियत् ॥१२॥

तदनुजो मनुजोत्तमवन्दितः समभवद् विमलेन्दुमुनीश्वरः ।
यदुपदेशगिरः परिपीय कैरमृतपानविधौ न घृणायितम् ॥१३॥

ततोजनि श्रीगुणशेखराख्यः सूरिः सुशर्माभिधपत्तने यः ।
श्रृङ्गारचन्द्रः शेत्तिमृश(?)सभायापत्रावलंबैः कुशलो जिगाय ॥१४॥

तत्पादांबुजराजहंससदृशः सिद्धांतपारागमः
श्रीमानन्दति सैष संघतिलकः सूरीश्वरः संप्रति ।
यो वादैर्विविधान् बुधानतिबुधान् बुद्धिप्रबंधैरलम् ।
जित्वा कीर्तिभरैः पिपर्त्ति भुवनं कर्पूरपूरप्रभोः ॥१५॥

तच्छिष्यः समभूत् सोमतिलकः सूरिनायकः ।
शीलोपदेशमालादिवृत्तयो येन निर्मिताः ॥१६॥

तस्यानुजेन देवेन्द्रसूरिणा विक्रमार्कतः ।
नन्द–युग्म–पयोराशि–शशांक(१४४९)प्रमावत्सरे ॥१७॥

प्रश्नोत्तररत्नमालाविवृतिर्विदधे मुदा ।
शोधिता च लसद्भाग्यैः श्रीमुनिभद्रसूरिभिः ॥१८॥ युग्मम् ।
यकाभ्यां कारयांचक्रे वृत्तिरेषा तयोरपि ।
पूर्वआख्याप्रकटने यत्नः संगतिमंगति ॥१९॥

तथाहि श्रीमदुकेशज्ञातिराभाति भूतले ।
या कल्पलतिकेवार्थिसार्थवांछितदा सदा ॥२०॥

तस्यामनुपमगुणगणसंपत्संपादितासुमत्प्रमदः ।
प्रसव इवास्ति श्लाघ्यो लिगाभिधानोन्वयो विबुधाम् ॥२१॥

फलोपमस्तत्र पवित्रबुद्धिर्व्यावर्णयामो[स्ति] गुणप्रकर्षः ।
बभूव पूर्वं हरिनामिधानः साधुर्जिनेन्द्रार्चनसावधानः ॥२२॥

तदंगजोऽभवद् वीरदेवो देवौपमर्द्धिकः ।
विश्वांगे नर्तीनर्त्ति यदीया कीर्त्तिनर्तकी ॥२३॥

तस्यादिमोऽजनि सुतो गजपालसंज्ञो धौयक्लृप्तशशिशुभ्रयशःप्रशस्तिः(?) ।
अन्यस्तु मिस्तुषगुणो गुणिषु प्रवीणो रीणोदयो धृतहंबी आनदेवनामा(?)॥२४॥

आद्यस्य पुत्रो सुकृतस्य सत्रं मांगाभिधानो भरहाभिधस्च ।
सैवासितं विश्वयदीयगुणौघकर्पूरभरेण विश्वम्(?) ॥२५॥

क्षेमंधरोजनितरां भरहात्तनुजः शश्वद्विनिर्मितजिनाधिपपादपूजः ।
तस्य प्रशस्यविनयादिगुणैर्गरिष्ठा जायाजनिष्ट कउडीति दयापदिष्टा ॥२६॥

तयोश्च नामा समजनि तनुजो हरिरिव स्फुरत्सत्यो विश्वावनिजनमनःप्रीतिजनकः(?) ।
तदीया जानगुणमाणिक्यवसतिः सुतेव क्षीराब्धेर्भरणिहिणिरिति क्षीणकलुषा(?)॥२७॥

तयोस्त्रयोंगजन्मा विजयंते गुणा इव ।
भोलीकः खेतसिंहाख्यो नृसिंहश्चेति विश्रुताः ॥२८॥

खेताकस्य सुता भांति खाहिकुक्षिसंभवाः ।
सत्यवीरः सहजाकः समराकश्च सद्गुणाः ॥२९॥

इत्यादिको लिगावंशो वंशवत्यर्चशालिनः ।
नन्ददाता जिनमतदिवाकरनिशाकरम् ॥३०॥

बुद्धिमांद्यान्ममात्रासन् या काश्चन वृथा गिरः ।
ताः शोध्याः साधुभिर्यस्माद् बद्धोत्राऽर्थे मयांजलिः ॥३१॥

एतद्वृत्तिविनिर्माणान्मया पुण्य[मु]पार्जितम् ।
तेनास्तु स्वस्तिदायी मे बोधिलाभो भवे भवे ॥३२॥

श्रीमत्प्रश्नोत्तररत्नमालिकाविवृतकल्पलतिकेयम् ।
अभयरत्नसंवमाजां भवतादभिमतफलाप्तिकृते ॥३३॥

संवत् १५०७ समये भाद्रसुदि ६ गुरुवासरे ।

[3398] मू० अन्तः—इति श्रीप्रश्नोत्तररत्नमालायां संक्षिप्ता वृत्तिः समाप्ता संपूर्णा ॥

वर्षे वारिधिकाषोडशमिते चैत्रस्य पक्षे सिते
हस्तर्क्षे शुभमे तिथौ हि नवमे वारे च प्रद्योतने ।
श्रीमद्वीरजिनेन्द्रतीर्थशिखरे संलेखिता सादरं
राज्यं कुर्वति रत्नसिंहगणभृत् चारित्रचूडामणौ ॥१॥

ओसवंशशुभाढ्येन वीरदासाभिधेन च ।
प्रश्नोत्तररत्नमालावृत्तिरियं लिपीकृता ॥२॥

यावन्नभसि चन्द्रार्का नन्दन्ति च ग्रहान्विताः ।
तावदियं विशिष्टार्था नन्दतु पाठकैः सह ॥३॥ इतिश्री ॥

शुभं भवतु कल्याणमस्तु लेखक-पाठकयोः । चिरं जीयात् ।
श्रीजेसलमेरमध्ये ऋषिश्री५ज्ञानजंताख्यपठनार्थं लिखितमिदं स्वहस्ते पुण्यार्थम् ।

[3401] मू० अन्तः—इति प्रश्नोत्तररत्नमाला संपूर्णा जाता । लिखिता शिष्यपासदत्तेन पं० वीरजीपठनार्थमिति ॥ श्रीसाकंभरीमध्ये लिपी(लिपिं) चकार । श्रीअन्तरीक्ष-पार्श्वनाथप्रसादात् सौख्यम् ।

स्त० अन्तः—इति प्रश्नोत्तररत्नमाला समाप्ता सूत्रार्थः कृतश्च श्रीखरतरगच्छाधिराजयुग-प्रधानश्रीजिनरंगसूरिकृतिरियम् ॥श्रीः॥

संवत् १७२० वर्षे माहवदि १२ दिने ॥ अन्तरेव पक्षे ॥

[3411] आदिः— मंगलार्थं नमस्कृत्य देव-सिद्धांत-सद्गुरून् ।
वक्ष्ये प्रश्नोत्तरं ग्रन्थं धर्म्मव्याजेन केवलम् ॥१०॥

अन्तः— उपासकाख्यो विबुधैः प्रपूज्यो ग्रन्थो महाधर्मकरो गुणाढ्यः ।
समस्तकीर्त्यादिमुनिश्वरोक्तः स पुण्यहेतुर्जयताद्धरित्र्याम् ॥४२॥

न कीर्तिपूजादिसुलाभलोभात् कृतः कवित्वायतिमानतो न ।
ग्रन्थोयमत्रैव हिताय स्वस्य परोपकाराय मया विशुद्धये ॥४३॥

अक्षरस्वरसुसंधिपदानि मात्रया रहितमुक्तमपीह ।
ज्ञानहीनत एव प्रमादतस्तत्र क्षमध्वमृषिनायका हि मे ॥४४॥

शून्याष्टाष्टद्वयकोटयः(२८८०) संख्या संमुनिनोदितः ।
नन्दत्वेषावनौ ग्रन्थो यावत् कालं तमेव हि ॥४५॥

इति प्रश्नोत्तरोपासकाचारे भट्टारकश्रीसकलकीर्त्तिविरचिते अनुमत्यादिप्रति-माद्वयप्ररूपको नाम चतुर्विंशतितमो परिच्छेदः ॥

(अन्यदीयहस्तेनोल्लेखः—)

संवत् १६५७ वर्षे माहमासे शुक्लपक्षे द्वितीयायां रविवासरे शतभिषानाम-नक्षत्रे श्रीमूलसंघे नंद्याम्नाये बलात्कारगणे सरस्वतीगच्छे भ०श्रीकुन्दकुन्दाचार्या-न्वये भट्टारकश्रीपद्मनन्दिदेवास्तत्पट्टे भ०श्रीशुभचन्द्रदेवास्तत्पट्टे श्रीजिनचन्द्रदेवा-स्तत्पट्टे भ०श्रीप्रभाचन्द्रदेवास्तत्पट्टे भ०श्रीचन्द्रकीर्त्तिदेवास्तदाम्नाये खण्डेलवाला-न्वये गोधागोत्रे अम्बावतीवास्तव्ये सा०पदाइण भा०पाटमदे तत्पुत्रौ द्वौ प्र० सा०नूना द्वि० सा० धूमा । सा० नूना-भार्या जीवणि तत्पुत्रा-श्चत्वारः । प्र० सा०वीरू-भार्या ल्होकन । द्वि० पुत्र सा०जिनदास-तद्भार्ये

द्वे प्र०स्वरूपदे, द्वि० ल्हौडी। तत्पुत्रसा०१सांगा-तद्भार्यासिंगारदे। तृती० सं० श्रीविमल । भा०संघविणिचतुरंगदे। तत्पुत्रास्त्रयः—प्र०सं०जीवा, द्वि०सं०डीडा, तृतीयसं०केशो । सं०जीवाभार्ये द्वे-प्र०प्रतापदे, द्वि०कुसुमदे । तत्पुत्रसा०दुर्गा, तद्भार्या दुर्गादे । सा०डीडाभार्ये द्वे-प्रथमसुहागदे द्वि०सिंगारदे। तत्पुत्रौ द्वौ प्र०रायमल भा०रयणादे। द्वि०साहिमल। तृ०केशो भा०कस्मीरदे। तयोः पुत्रौ द्वौ प्र० दमोदर द्वि०सुन्दर। तस्य चतुर्थसं०चतुर्भुज भार्ये द्वे प्र०चांदणदे द्वि० चतुरंगदे । तत्पुत्रौ द्वौ प्र०सा०कौजू भार्ये कौत्तिगदे द्वि०तत्पुत्रसा०नरहरिदास भा०नारिंगदे। द्वि०देवसी द्वि०विसलहदी। द्वि०सा०पूना-भार्याहरहा, तत्पुत्रौ द्वौ प्र०सा० मलिदास, द्वि०सा०कचरू। मल्लभार्यामहिमादे तत्पुत्राश्चत्वारः-प्र०सा० जादू भा०असमादे, तस्य पुत्रौ द्वौ०प्र०नरायण द्वि०नेमिदास द्वि०नेतसीभार्ये द्वे० प्र०नेतलदे, द्वि०ल्होबी, तृ०जिनदत्तभार्याजौणादे। प्र०वि०तेजसी द्वि०सा० कचरूभार्ये द्वे कौत्तिगदे द्वि०कौडिमदे-एतेषां मध्ये चतुर्भिर्वधूभिरिदं श्रावका-ध्ययनशास्त्रं कल्याणाय व्रतोद्यापनार्थं घटापितं उत्तमपात्राय दत्तम्। शुभं भूयात्॥

[3419] अन्त:— अथ ग्रन्थकृत्प्रशस्तिः—

श्रीवर्द्धमान इति चन्द्रकुलाम्बरार्कस्तस्माज्जिनेश्वरगणाधिप एष जज्ञे ।
रंगन्नवांगविवृतिप्रथनप्रसिद्धमाहात्म्यभूरभयदेवगुरुस्ततश्च ॥१॥

सूरिर्बभूव जिनवल्लभनामधेयस्तत्पादपद्ममधुकृज्जिनशेखराख्यः ।
पद्मेन्दुरिन्दुनिभकीर्त्तिभरो बभूव सूरिस्ततो यतिपतिर्विजयेन्दुनामा ॥२॥

तस्माद् बभूवाभयदेवसूरिर्विध्वस्तविस्तारिकुवादिगर्वः ।
श्रीदेवभद्रोथ कृतोरुभद्रस्ततः प्रभानन्दमुनीश्वरश्च ॥३॥

श्रीचन्द्रसूरिः सुगुरुस्तदीयपट्टावतंसप्रतिमोधुनास्ति ।
अस्य द्वितीयस्तु धियाऽद्वितीयो जज्ञे मुनीन्द्रो विमलेन्दुनामा ॥४॥

आचार्यधुर्यत्वमवापिताः श्रीश्रीचन्द्रसूरिप्रवरास्त्रयोमी ।
श्रीचारुचन्द्रो जिनभद्रसूरिर्गुणाम्बुधिः श्रीगुणशेखरश्च ॥५॥

एतैरेव वितीर्णोपाध्यायपदो मुनीश्वरोत्तंसैः ।
श्रीदेवभद्रयतिपतिशिष्यः श्रीश्रीतिलकनामा ॥६॥

गौतमपृच्छाप्रकरणविवरणमिदमल्पबुद्धिविभवोपि ।
भव्यजनोप्युपकृते कृतवानभ्यर्थितः कृतिभिः ॥७॥

छंदो-लक्षणमुख्यैर्दोषैर्यद् दुष्टमस्ति कमपीह ।
तदखिलमपि मदनुग्रहबुद्ध्या शोध्यं सुधीमद्भिः ॥८॥

गगनतले परिखेलति यावज्ज्योतिष्कचक्रमखिलमपि ।
नन्द्याद् गौतमपृच्छाप्रकरणविवरणमिदं तावत् ॥९॥

कल्याणाचलभूविकासिसुमनःश्रेण्याभितः संश्रितः
सेव्यः सर्वसुपर्वभिः स्फुटतमोजत्यः प्रसत्यद्भुतः ।
सच्छायाचयचारुरथ्यदसमप्रेक्षत्फलर्द्धि पदः
नन्द्याद् वस्तदनल्पकल्पितमहः श्रीसंघकल्पद्रुमः ॥१०॥

इति श्रीगौतमपृच्छाप्रकरणविवरणं संपूर्णमिति शुभम् ।
संवत् १६२० वर्षे कार्तिकशुदि १३ दिने लेखि ॥ ग्रन्थाग्रम् ६००० ॥

[3421] वृ०आदिः— वीरजिनं प्रणम्यादौ बालानां सुखबोधिका ।
श्रीमद्गौतमपृच्छायाः क्रियते वृत्तिम(र)द्भुता ॥१॥

वृ०अन्तः— अतः भव्यलोकैरियं गौतमपृच्छा पठनीया श्रोतव्या । एवम्—

श्रीजिनहर्षसूरीणां सुशिष्याः पाठका वराः ।
श्रीमत्सुमतिहंसाश्च तत्शिष्यैर्मतिवर्द्धनैः ॥१॥

पाठकपदसंयुक्तैः कृता चेयं कथानिका ।
श्रीमद्गौतमपृच्छायाः सुगमा सुखबोधिका ॥२॥

सिद्धौ राम-मुनौ चन्द्रे(१७३८)वर्षस्मिन् मार्गशीर्षके ।
श्रीमत्यां जगत्तारण्यां नगर्यां च शुभे दिने ॥३॥

इति श्रीगौतमपृच्छायाः सुगमा वृत्तिः संपूर्णा । ग्रन्थाग्रम् १६८३ ॥

[3424] आदिः— नत्वा वीरं जिनं देवं बालावबोधो लिख्यते ।
श्रीगौतमपृच्छाया वाचनार्थं विशेषतः ॥१॥

श्रीसोमसुन्दर-श्रीमुनिसुन्दर-सद्विशालराजेन्द्राः ।
श्रीसोमदेवगुरवो जयन्त्यमी कल्पवृक्षसमाः ॥२॥

अन्तः— श्रीसोमसुन्दराचार्य-मुनिसुन्दरवाक्सुधाम् ।
पीत्वा विशालराजेन्द्रः सुधाभूषणसेविना ॥

श्रीगौतमपृच्छाया वार्तार्थोयं सुबोधतः लिखितः ।
जयसुन्दरेण वाचकवरेण्यश्रीसंघयशसेन ॥२॥

इति श्रीगौतमपृच्छाबालावबोधः संपूर्णः समाप्तः ॥
संवत् १८२२ रा मीती मगसर वद ६ वार सोम ॥
लिषतं मयेम सरूपचन्द मेडतानगरे ॥

(पश्चात्कालीनोल्लेखः—)

साधविजी हस्तिश्रीजी पं० ।

[3430] अन्तः— इति श्रीगौतमपृच्छाबालावबोधः समाप्तः ॥

संवत् १५६९ वर्षे माघमासे १३ भौमवासरे ॥ तपागच्छाधिराज-परमगुरुश्रीहेमविमलसूरिविजयराज्ये पूज्याराध्ये पं०श्रीमाणिक्यचारित्रगणि-शिष्यविवेकचारित्रेण लखितः ॥ श्राविकाचन्द्राउलिपठनार्थम् ॥

[3437] अन्तः— इति श्रीप्रश्नबोलचाल संपूर्ण ।

संवत् १८८० मां चैत्र वीद १२ सोमः मां श्री ५ धनजी वीरचनथुए साधुश्री५ भगवानजी सांमीने बोलनी परत वोरावी छे ।

संवत् १८८१ नां चैत्र वद २ दीने घरमनी मने छइ सामानी छे ॥

[3442] अन्तः— इति स्याद्वादमंजरीवृत्तिः समाप्ता ॥

संवत् १५५६ वर्षे ज्येष्ठसुदि चतुर्थीदिने शनौ वारे लिखितं श्रीघीका-नगरे श्रीखरतरगच्छाधिराजश्रीजिनसमुद्रसूरि–पट्टालंकारयुगप्रधानावतार–श्रीजिन-हंससूरिविज[य]माने वाचनाचार्यवर्यश्रीशुभदत्तगणीनां शिष्यवाचनाचार्यहर्षमंदिर-गणीनां शिष्यपण्डितप्रकांडराजधर्ममुनिना योग्यम् ।

[3443] अन्तः— इति श्रीस्याद्वादमंजरीग्रन्थः समाप्तः ॥

श्रीमद्विक्रमात् गज–नयन–मुनींदु(१७२८)वर्षे ऊर्जार्जुनैकादश्यामिति गुरौ श्रीरस्तु ।

(श्वेतरङ्गेन प्रच्छन्नान्यक्षराण्यपि वाच्यन्ते–)

श्रीभाग्यसौभाग्य०-शिष्यग० विनयसौभाग्येनालेखि श्रीनागोलानगरमध्ये। सुखसाह्राज्ये(ज्ये)न पूर्णीजातमिति भद्रम् ।

[3445] आदिः— ननु प्रमाणशास्त्रे भवतां वैदुष्यमाकर्ण्यते । तदेतत् किं कुत्र सौगत-सांख्य-कणादाक्षपाद-प्राभाकर-जैन-जैमिन्यादिमतानामन्विष्यते इति प्रतिपादयन्तु भवन्तः । भट्टा वयमिति चेत्, तत्रापि किं प्राभाकरा जैमनीया वेदांतवादिनो वा ?। अथ भवतु नाम यत्र कुत्रचित्प्रागल्भ्यममीषां मध्ये किन्तु सर्वेऽप्यमी मीमांसकास्तैस्तु तत्त्वं मीमांस्यते तदत्र किं तत्त्वं तदेवोच्यतां, यतस्तत्परिज्ञानाभावान्न तदाश्रिता मीमांसा प्रमाणकोटिकुटीरकमटाट्यते(?मवाप्यते) ।

अन्तः— इदानीमपशब्दमहं परित्यज्य स(श)ब्दरत्ने मदुक्तिब्रह्मानन्द इव किमिति मनः क्षणमपि न निक्षिप्यते शब्दाद्वैतसाम्राज्यं विहायाऽपशब्दकदन्नभिक्षाटनं कुरुष्व । इदानीमपि मात्सर्यमुत्सार्य मदुक्तशब्दरत्नेन चतुर्मुखकण्ठसहकारवनीमर्त्तकि-(की)भारति(ती)कलाकोकिलाकण्ठिकण्ठालंकरणं भवान् करोतु ॥

इत्यपशब्दखण्डनं समाप्तम् ॥

[3457] आदिः— ननु भोः प्राज्ञ ! पांथश्रीकाः यूयमत्र कुतः स्थानात् समायाताः, को नाम, को ग्रामः किं वा युष्माकमभिधानं किं वा युष्माकमात्तुमातां निवासस्थानं किं वा कार्ये पदे येन शुभवतां भवतामत्र समागमो जातः आस्थीयतामत्र किंचित् कालं विद्वद्गोष्ठीसुखमनुभवामः ।

अन्तः— इत्याद्युक्तयुक्तियुक्तेषु केषु केषु सुग्रन्थग्रन्थेषु सातिशयः परिचयो भवतां पोस्फुरीतितरामित्यावेदयती(ति) मुनिज्ञानवर्द्धनपठनकृते ॥

संवत् १९५१ नी मीति आसोज वदी १३ ॥

[3463] अन्तः— इति श्रीज्ञानबिन्दुप्रकरणम् ।

संवत् युग-रस-शैल-शशि(१७६४)वत्सरे शाकेऽङ्क-नेत्र-रस-चन्द्र-(१६२९)प्रवर्त्तमाने फाल्गुनमासे कृष्णपक्षे दशमीतिथौ भृगुवासरे संपूर्ण(र्णी)कृतम् ।

[3473] बा०आदिः—ऐन्द्रवज्ज्योतिरानन्ददायिनी श्रुतदेवता ।
सर्वात्मचेतसि स्वैरं भावान् प्रोद्भावयत्विह ॥१॥

आचार्यसिद्धसेनैर्व्याख्यातं सूत्रमत्र यत् पूर्वम् ।
तदहं विवृणोमि मुदा बोधार्थं भव्यजीवानाम् ॥२॥

ग्रन्थना आरंभनइ विषइ उमास्वातिनामा आचार्य प्रथम मंगल आचरई छइ । मोक्षना मार्गनो देखाडनार कर्मरूप जे पर्वत तेहनउ भेदनहार विश्वतत्त्व कहतां जगना भाव तेहनउ जाणणहार । एहवा सर्वज्ञ प्रतइं हुं वादउं ।

बा०अन्तः— इति श्वेतांबराचार्यश्रीउमास्वातिगणिकृत-तत्त्वार्थसूत्रं तस्य बालावबोधः श्रीयशोविजयगणिकृतः समाप्तः ॥

संवत् १७६१ अश्विनि वद द्वि[ती]या भौमे श्रीपूर्णिमापक्षे भट्टारकश्री ५ श्रीमहिमाप्रभसूरीश्वर-चरणसेवकमुनिसहजरत्नशिशुना लिखी(पी)कृतमिदं पुस्तकम्, वाच्यमानश्चि(नं चि)रं नंद्यात् श्रीपार्श्वः सुखायास्तु ।

[3477] मू० आदिः— सिरिवीरजिणं वन्दिय कम्मगुरुं तत्तबोहगं वीरं ।
देवाइदेवतत्तं सुआनुसारे निरूवेमि ॥१॥

मू० अन्तः— तवगणगयणदिवायर विजयाइमाणसूरिरज्जंमि ।
नाणुविजयबुह-सेवगवायगलावण्णविजयेण ॥७०॥

गन्यन्तरगाहाहिं समत्थिया दव्वसित्तरी एसा ।
भवियजणबोहणत्थं मंगलमालं कुणउ निच्चं ॥७१॥

इति श्रीद्रव्यसित्तरी(सप्तति)सूत्रं समाप्तम् ॥

सम(संव)त् १९५३ का फागुणसुद ॥११॥

वृ०आदिः - इह ग्रन्थारम्भे ग्रन्थकृत् शिष्टसमयपरिपालनाय विघ्नोपशान्तये श्रोतृप्रवृत्तये च मंगलादिकं प्रतीआनीते सिरिवीर त्ति ।

वृ०अन्तः— अथ कविः स्वाभिनिवेशं निरासयन्नाह तहविहभविबोहे त्ति व्याख्या सुगमा ॥७०॥

अथ ग्रन्थसमाप्तिं निगमयन्नन्ते मंगलं दर्शयति-तवगणेति व्याख्या सुगमा ॥७१॥

इति श्रीद्रव्यसप्ततिकावृत्तिः समाप्ता ॥

वेद-वेदर्षि-चन्द्राब्दं(१७४४)ईयस्य सितपक्षतौ।
विदधे तत्र वृत्तिश्च लावण्याह्वयवाचकैः ॥१॥

यावन्मही मृगाक्षीयं धत्ते वारिधिमेखलाम्।
वाच्यमाना बुधैर्जीयात् सवृत्तिर्द्रव्यसप्ततिः ॥२॥

तर्कादिशास्त्रनिपुणैर्वैराग्य[ा]मृतसागरैः।
शोधितेयं श्रिये श्रीमद्विद्याविजयकोविदैः ॥३॥

लो० प्रौयत् कीसनदास अहिपुरमध्ये ग्रन्था० १३०० ॥

[3480] आदिः— प्रणिधाय परं रूपं राज्ये श्रीविजयदेवसूरीणाम्।
नयचक्रस्यादर्शप्रायो विरलस्य वितनोमि ॥९॥

अन्तः— इति श्रीमल्लवादिक्षमाश्रमणपादकृतनयचक्रस्य[ा]नुबन्धः समाप्तः, इति ग्रन्थमानसंख्या १८००० ॥

महोपाध्यायश्रीजश(यशो)विजयगणिना कृतो ग्रन्थः नयचक्रशास्त्रं संपूर्णम् ॥

लो० प्रोरोयत अमरचन्द सीवदासजीका पुत्र रेवासी नागोरका पुष्करणा ब्राह्मण।

संवत् १९६७ रा मिति फागण बद २ अइपुरमध्ये। नागोररा रेवासी मारवाडी।

[3494] अन्तः— इति श्रीन्यायावतारविवृतिः समाप्ता ॥
कृतिरिय[मा]चार्यसिद्धव्याख्यानिकस्य। ग्रन्थाग्रम् २०७३ ॥

संवत् १४५३ वर्षे फाल्गुनसुदिपूर्णिमादिने अद्येह श्रीमत्पत्तने श्रीराउतवाटके श्रीसाधुपूर्णिमापक्षीयभट्टारकश्रीअभयचन्द्रसूरि-शिष्यरामचन्द्रसूरिपठनार्थं न्या(न्या)यावतारवृत्तिप्रकरणं लल(ललित)कीर्तिमुनिना लिखितं शुभं भवतु।

[3503] अन्तः— इति ब्रह्मचर्याष्टकं संपूर्णम्। इति श्रीपद्मनन्दिकुन्दकुन्दाचार्यविरचितं पद्मनन्दिग्रन्थः समाप्तः। संवत् १७३४ वर्षे भाद्रवा वदि ९ दिने।

[3505] आदिः— न तु प्रमाणशास्त्रे भवतां वैदुष्यमाकर्ण्यते तदेतत् किं कव(कु)त्र सौगत-सांख्य-कणभिक्षा-ऽक्षपाद-प्रभाकर-जैन-जैम(मि)न्यादिमतानां मध्ये व्यवह्रियते इति।

अन्तः— इत्यत्राप्युक्तं समंतभद्राचार्यैः।

कालः कलिर्वा कलुषाशयो वा
श्रोतुः प्रवक्तुर्वचनानयो वा।
त्वच्छासनैकाधिपतित्वलक्ष्मी-
प्रभुत्वशक्तेरपवादहेतुः ॥

इत्याचार्य श्रीनरेन्द्रसेनरचिता प्रमाणप्रमेयकलिका परिसमाप्ता ॥

[3508] अन्तः— इति सिद्धः षट्दर्शनसमुच्चयतात्पर्यार्थः ।
श्रीमुनीश्वरसूरीन्द्रैः प्रोक्तस्तार्किकपर्षदि ।
मुनिहर्षमुनेरेष हस्तबाणः प्रमा[पि]तः ॥

इति प्रमाणसारे प्रस्तावागतदर्शनव्यवस्थास्वरूपप्ररूपकस्तृतीयः परिच्छेदः ॥

श्रीवृद्धगच्छालङ्कारसारवादीन्द्रचूडामणिकविसार्वभौमभट्टारकश्रीश्रीमुनीश्वर-सूरिविरचितः प्रमाणसारग्रंथः संपूर्णः ॥ तत्त्वानां पंचविंशं कलयति कपिलः० ।

पुस्तिका लिखिता मुनिचन्द्रर्षेण(र्षिणा) आत्मार्थे ।

[3517] आदिः— श्रीजिनं हर्षतो नत्वा वीरं विश्वातिशायिनम् ।
हेतुखण्डनपांडित्यतांडवं मंडयते मया ॥१॥

अस्य व्याख्या—मया हेतुखण्डनपांडित्यतांडवं मंड्यते ।

अन्तः— श्रीमत्तपोगणनभोंगणभासनैकभानूपमाः परमतापिमहःसमूहाः ।
शश्वत्प्रभोगरुचयः शुचयस्तपोभिः श्रीसोमसुन्दरगुरुप्रवरा बभूवुः ॥३०॥

तेषां संततिगणपतिलक्ष्मीलीलाविलासगोविन्दाः ।
श्रीमल्लक्ष्मीसागरगुरवो गोपीवरा रेजुः ॥३१॥

यत् कृष्णवर्त्माव्यभिचारिधूमानुमानसम्यग् समुदीरितं तत् ।
अकृष्णवर्त्मापि विशिष्टधूमोज्ज्वलच्छविर्यद् यशसां समूहः ॥३२॥

तत्पट्टोदयभूधरसहस्रकरसोदरा युगप्रवराः ।
श्रीसुमतिसाधुसूरीश्वरा जयन्त्यसमतममहसः ॥३३॥

हृत्कुण्डान्तरमण्डितोज्ज्वलतरध्यानाग्निना यैः स्फुरत्—
कामस्यामतनुर्व्यधायि सहसा नष्टोवदुष्टोसकौ ।
तापाक्रांततनुः सुधामयतनुं शिश्राय शीतद्युतिं
तस्मिन् श्यामललाञ्छनच्छविमिषादद्याप्ययं वीक्ष्यते ॥३४॥

तेषां श्रीगणराज्ये विद्यागुणगौतमानुकारकृताम् ।
श्रीजिनहर्षगुरूणां शिष्यशिशुः साधुविजययतिः ॥३५॥

प्राथमिकप्रामाणिकपठनायालीलिखद् यथावगमम् ।
प्रकरणमिदं सुधीभिः संशोध्यं मयि कृपां कृत्वा ॥३६॥ युग्मम् ॥

यः पठति वादिविजयप्रकरणमिदमादितोपि कौतुकतः ।
अहमहमिकया मोदात् वृणुते तं साधुविजयश्रीः ॥३७॥

इति वादिविजयप्रकरणं समाप्तम् ॥

[3521] अन्तः— अतो वृषभवर्द्धमानादय एव विश्ववेदिनः सिद्धा इति ॥
इति सर्वज्ञसिद्धिप्रकरणं समाप्तम् ॥छ॥

युग्मेषु-नन्द-शशभृत्परिवत्सरेऽयं(१९५२)मासि सहे सितदले दिवसे पवित्रे ।
कष्टेन ऋद्धिकरणेन मयाप्यलेखि श्रीनागपत्तन[पु]रे भगवत्प्रसादात्॥१॥

[3524] **अन्तः—** श्रीसूरीश्वरसोमसुन्दरगुरोर्दीक्षक्षमामण्डल-
ख्यातश्रीशशिगच्छदुग्धजलधिस्फूर्जत्सुधारोचिषः ।
श्रीमद्वाचकनायकः प्रतिमतध्वांतार्यमार्यादयः
शिष्यः श्रीजिनमण्डनोऽस्य तनुते हेतोरिदं खण्डनम् ॥१॥

इति हेतुविडम्बनस्थलः कृतः श्रीजिनमण्डनग० ।

[3527] **अन्तः—** ब्रह्मदेववृत्तिः समाप्ता । ग्रन्थसंख्या शत २७०० ।

स्वस्तिश्रीसंवत् १४८५ वर्षे श्रावणसुदि १३ शनौ दिने श्रीआवरस्थाने राइश्रीखांदरायराज्यप्रवर्त्तमाने श्रीकाष्ठासंघे मथुरान्वये पुष्करगणे आचार्यश्री-सहस्रकीर्तिदेवास्तत्पट्टे भट्टारकश्रीगुणकीर्तिदेवास्तच्छिष्यभट्टारकश्रीयशःकीर्त्तिदेवा. हरिभूषणदेवा ज्ञानचन्द्रदेवास्तेषामाम्नाये अग्रोतकान्वये गर्गगोत्रीयपरम-श्रावक-साधुधीतू-तद्भार्यासाध्वीथिरो(रा)पुत्राश्चत्वारः-साधुहीगा-महणा-सहणपाल पल्हासा। हीगा-भार्यासाध्वी सर्वगुणशालिनी दानपूजापरायणी साध्वीपल्होतया पुत्रबोल्हे द्वितीयनाममकुटवर्द्धन एतेषां मध्ये नसीरवादीया सा०वच्छराज-पुत्री हीगाभार्या साध्वीपल्होतया निजज्ञानावरणीकर्मक्षयार्थं केवलज्ञानोत्पत्तये इदं द्रव्यसंग्रह-ब्रह्मदेववृत्तिशास्त्रं लिषापितं धनाकायस्थेन लिषितम् ॥

ज्ञानवान् ज्ञानदानेन निर्भयोऽभयदानतः ।
अन्नदानात् सुखी नित्यं निर्व्याधी(धिः) भेषजाद् भवेत् ॥

वर्धतां जिनशासनम् ॥

[3531] **अन्तः—** इति श्रीद्रव्यसंग्रहे तृतीयोधिकारः संपूर्णः ॥

संवदग्नि-रसात्यष्टि(१७६३)मासे माहसुसंज्ञके लिखितम् ।

स्त०आदिः— श्रीमज्जिनेंद्रदेवानां पादानानम्य भक्तितः ।
द्रव्यसंग्रहस्य [सम्यग्]बालबोधो विधीयते ॥१॥

स्त०अन्तः— द्रव्यसंग्रहशास्त्रस्य बालबोधो यथामति ।
हंसराजेन मुनिना परोपकृतये कृतः ॥१॥

पौर्वापर्यविरुद्धं यल्लिखितं मयका भवेत् ।
विशोध्यं धीमता सर्वं तदाधाय कृपां मयि ॥२॥

खरतरगच्छनभोंगणतरणीनां वर्द्धमानसूरीणाम् ।
राज्ये विजयिनि निष्ठां नीतोयं सद्दृशि मासके ॥३॥

इति द्रव्यसंग्रहटबार्थः संपूर्णमजनि ॥

[3547] **अन्तः—** संवद्वसु-गज-रस-शशि(१६८८)मिते च दुर्भिक्षकार्तिके मासे ।
अमदावादे नगरे पटेलद्वाआभिधपोल्याम् ॥१॥

बृहोपाश्रयमध्ये चान्द्रकुले बृहत्खरतरे गच्छे ।
श्रीजिनसागरसूरेर्विजयिनि राज्ये सुसाम्राज्ये ॥२॥

नवतत्त्वसूत्रवृत्तिर्विहिता श्रीसमयसुन्दरैः सुगमा ।
मुनिसहजविमल-पंडितमेघविजयनामशिष्यकृते ॥३॥

वृत्तिं लिखित्वा मात्सर्यात् प्रशस्तिं न लिखिष्यति ।
जिनाज्ञालोपकृत् पापी नरके स पतिष्यति ॥४॥

इति श्रीसमयसुन्दरोपाध्यायकृतं नवतत्त्वशब्दार्थव्याख्यानं संपूर्णम् ॥

[3556] आदिः— श्रीवीरं तीर्थपतिं सूरिश्रीसोमसुन्दरगुरुंश्च ।
श्रीमत्तपोगणेशान् प्रणम्य विवृणोमि तत्त्वानि ॥१॥

अपि च—

श्रीवीरक्रमकमलं नत्वा नवतत्त्वसूत्रविवृतिमहम् ।
पा(प्रा)कृतवचनैर्जनतोपयोगिभिर्मुत्कलैः कुर्वे ॥२॥

अन्तः— तपागणे श्रीगुरुसोमसुन्दरक्रमाब्जभृङ्गो गणिहर्षवर्द्धनः ।
विचारसिंधौ नवतत्त्वसूत्रे बालावबोधं रचयांचकार ॥१॥

उत्सूत्रमत्रालिखमस्मि किंचित् रभस्यतो वा धिषणाविमोहात् ।
संशोधनीयः करुणां विधाय शुद्धाशयैस्तद्विबुधैः प्रसद्य ॥२॥

इति नव[त]त्त्वबालावबोधः समाप्तः ॥

श्रीचन्द्रगच्छमंडनबृहत्तपागणालंकारश्रीदेवसुन्दरसूरि-पट्टालंकरणयुगोत्तम-भट्टारकप्रभुगच्छाधिराजश्रीसोमसुन्दर-शिष्यहर्षवर्द्धनगणिकृतः ॥

नवतत्त्वस्य सद्वार्त्ता सार्द्धसप्तदशीमिता ।
कृता बालावबोधार्थं हर्षवर्द्धनसाधुना ॥१॥

ग्रन्थाग्रसंख्या १७५० ॥

इति नवतत्त्वबालावबोधः संपूर्णः ॥

[3567] मू० अन्तः—इति श्रीनवतत्त्वप्रकरणं समाप्तम् ॥

पंडितशिरोमणिपंडितश्री५श्रीहर्षसागरगणि-तत्शिष्यशांतिसागरलिखितं अजयपुरमध्ये शुभं भवतु कल्याणं दिने दिने । संवत् १६९७ वर्षे मुनिमेघसागरपठनार्थम् ।

बा० अन्तः— संगच्छाधिराजभट्टारकप्रभुश्री५श्रीहीरविजयसूरीश्वर-तत्शिष्यपंडितशिरोमणिपंडितचक्रवर्तिपंडि[त]श्री५श्रीविजयचन्द्रगणि-तत्शिष्यपंडितश्रीविजयहर्षगणि-तत्शिष्यगणिवर्द्धमानविजयलिखितं गणिश्रीजयाणंदपठनार्थं श्रीसुरतांणपुरमध्ये लिखितम् ॥

[3576] अन्तः— आ प्रत लल्लुभाई करमचन्दे पोताना छापखानामां छापी प्रगट करी। ठेकाणु अमदावादमां कालुपुरमां राजामेहतानी पोलमां तोबानी पोलमां छे।

संवत् १९१६ नवतत्त्वनी ॥

[3579] अन्तः— एतलें नवतत्त्वनो वार्त्तारूप बालावबोध संपूर्णः ॥
चतुर पुरस हुवे ते इणनें पढें ।

संवत् १८३९ वर्षे महामांगल्यप्रदमासोत्तममासे आसाढमासे शुक्लपक्षे शनीवारे तृतीयातिथौ श्रीकोटानगरे सकलपंडिताधिराजउपाध्यायश्रीलावण्यविजय-जी त(त्)शिष्यपं०श्रीलक्ष्मीविजयजी त(त्)शिष्यपं० लाभविजयजी त(त्)शिष्य-पं०विवेकविजय टबार्थेलिपिकृतं पं०खुसालविजय स्वआत्मार्थेवाचनाय पठनार्थम् ॥

[3584] स्त० अन्तः—संवत् १७१३ वर्षे आश्विनि सितपूर्णिमातिथौ बुधवासरे लिखितः पं०रत्नविजयेन स्ववाचनाय चेलागर्जसिंघसाहो(हाय्ये)न ।

संजम-भू-अर्चन(१७१३)वत्सरे आसोसुद्धस्स पनरसीदिवसे ।
नवतत्त्वसुत्तअत्थं लिहियं रयणेण नियहेउ ॥१॥

लिखितं सिंघासुआग्रामे ।

[3587] स्त० आदिः—नत्वा विश्वेश्वरं पार्श्वं शंखपूर्भूमिमण्डनम् ।
लिख्यते नवतत्त्वस्य टबार्थो लेशतः शुभः ॥१॥

स्त० अन्तः—समस्तशास्त्राम्बुधिपारदर्शिनोऽभूवन्महापंडितपद्मसागराः ।
तेषां सुशिष्याः कुशलादिसागरा निःशेषसत्ताठ(संस्थापकौ)लिमौलयः ॥१॥

तःछि(तच्छि)ष्याणां महाभाग(ग्य)वतां पंडितभूभुजाम् ।
श्रीमद्युत्तमवादीनां पदांभोजप्रसादतः ॥२॥

यशःशुभ्रकृतभ्वासकोविदाः पद्मसागराः ।
तच्छिष्याः समजायंत गणयः प्रेमसागराः ॥३॥

तत्‌शिष्याणां सुधारित्रसागराणां शिशुर्व्यधात् ।
केसराब्धिः स्वल्पमतो(ति)र्नवतत्त्वटबार्थकम् ॥४॥

इति(ती)दं जयशेखरसूरीश्वरपादैर्विरचितं नवतत्त्वप्रकरणं संपूर्णम् ।

सकलपंडितशिरोमणिपं०श्रीगुणविजय-तत्‌शिष्य-पं०श्री-विनीतविजयगणि-तत्‌शिष्यमुनिः गंगविज[यः] ॥

॥ संवत् १८०० वर्षे फाल्गुणसुदि ६ । वेसुरीमपरे ॥

[3593] अन्तः— संवत् १९३३ ना शाके १७९९ प्रवर्तमाने मासोत्त[म]मासे चैत्रमासे शुभे शुक्लपक्षे चतुर्दशीतिथौ शनिवासरे लिपीकृतं ब्राह्मणश्रीमालीज्ञातीआवस्ति-परमानंद अमदावादमध्ये लिपीकृता सम्मतिटीका संपूर्णा ॥

[3597] अन्तः— इति श्रीस्याद्वादचूलिका संपूर्णा ।

इति श्रीअमृतचन्द्राचार्यविरचितं समयसारनाटकं संपूर्णम् ।

अथ प्रशस्तिः—

वसुटयुक्सप्तेंदुयुते वर्षे मनोहरे ।
शुक्ले भाद्रपदे मासे चतुर्दश्यां शुभे तिथौ ॥ १ ॥

ईसरदेति सद्ग्रामे टीकेयं पूर्णतामिता ।
भट्टारकजगत्कीर्त्तिपट्टे देवेन्द्रकीर्त्तिना ॥ २ ॥

दुःकर्महानये शिष्यमनोहरगिरा कृता ।
टीका समयसारस्य सुगमा तत्त्वबोधिनी ॥ ३ ॥ युग्मम् ॥

बुद्धिमद्भिः बुधैः हास्यं कर्त्तव्यं नो विवेकिभिः ।
शोधनीयं प्रयत्नेन यतो विस्तरतां व्रजेत् ॥ ४ ॥

बुधैः संपाठयमानं च वाच्यमानं शुभं सदा ।
शास्त्रमेतच्छुभंकारि चिरं संतिष्ठतां भुवि ॥ ५ ॥
पूज्यदेवेन्द्रकीर्त्तिः सुशिष्येण स्वांतहारिणा ।
नाम्नेयं लिखिता टीका स्वहस्तेन स्वबुद्धये ॥ ६ ॥

संवत्सरे वसु-नाग-मुनीन्दुमिते १७८८ भाद्रपदमासे शुक्लपक्षे चतुर्दसी(शी)तिथौ ईसरदानगरे राजेश्री अजितसिंहजीराज्ये प्रवर्त्तमाने श्रीचन्द्र[प्र]भच्यैता-(चैत्या)लये श्रीमूलसंघे नन्द्याम्नाये बलात्कारगणे सरस्वतीगच्छे श्रीकुंदकुन्दाचार्यान्वये अम्बावत्याः भट्टारकजीच्छ्री सुरेन्द्रकीर्त्तिस्तत्पट्टे भट्टारकजिच्छ्रीजगत्कीर्त्तिजित्-तत्पट्टाख्यस्वगं(गां)भीर्यक्षमागुणनिर्जितसागरे लादिपदार्थाः स्वपंडितरीतरितागमांभोधिः भट्टारकशिरोमणिः भट्टारकजिच्छ्रीश्रीमद्देवेन्द्रकीर्त्तिस्तेनेयं समयसारटीका स्वशिष्यमनोहरकथनाद्वा पठनाय तत्त्वो(त्त्व)बोधिनी सुगमा निजबुद्धया पूर्वटीकामवलोक्य विहिता बुद्धिमद्भिः शोधि(ध)नीया । प्रमादाद्वा अल्पबुद्धया यत्र हीनाधिकं भवेत् तच्छोधनीयं याचतेयं कृता मया किं बहुकथनेन वाचकानां पाठकानां मंगलावली संबोभवितु श्रीजिनप्र(स)त्प्रसत्तेः ॥

संवत् १९०१४(१९१४) का मिति आसाढसुदि ३ दिने लिपिकृतं हीरविजयेन बालोचरमध्ये भागीरथ(थी)तटे संभवनाथजीप्रसादात् वाचनार्थ वीरचन्दजी शुभम् । ३००० ॥ श्री ॥

[3605] अन्तः— इति श्रीकुलमंडण(न)सूरिविरचिता कायस्थितिः समाप्ता ॥

अब्ज-बाण-निधीन्दुब्दे(१९५१) सप्तम्यां रविवासरे ।
स्वार्थमुर्जेऽसितं पक्षेलेखि चातुर्भिक्षुना ॥ १ ॥

[3623] वृ०आदिः—नेमिचन्द्रं जिनं नत्वा सिद्धं श्रीज्ञानभूषणम् ।
वृत्तिं गोमटसारस्य कुर्वे कर्णाटवृत्तितः ॥ १ ॥

श्रीमदप्रतिहतप्रभावस्याद्वादशासनगुहाभ्यन्तरनिवासिप्रवादिसिंधुरसिंहाय्य-मानसिंहनंदिमुनीन्द्राभिनंदितगंगवंशललामराजसर्वज्ञाद्यनेकगुणनामधेयभागधेयश्रीम-द्राजमल्लदेवमहीधरवल्लभमहामात्यपदवीराजमानरणरंगमल्लासहायपराक्रमगुणरत्न-भूषणसम्यक्त्वरत्ननिलयादिविविधगुणनामसमासादितकीर्तिकान्तश्रीमच्चामुंडराय-प्रश्नावतीर्णैकचत्वारिंशत्पदनामसत्त्वप्ररूपणद्वारेणाशेषविनेयजननिकुरम्बसंबोधनार्थं श्रीमन्नेमिचंद्रसैद्धान्तचक्रवर्तिसमस्तसैद्धान्तिकजनप्रख्यातविशदयशोविशालमतिरसौ भगवान् शास्त्रकारो महाकर्मप्रकृतिप्राभृतप्रथमसिद्धांत[व]ज्जीवस्थान-क्षुद्रबंध-बंधस्वामित्वं-वेदनाखंड-वर्गणाखण्ड-महाबंधानां षट्खण्डानां मध्ये जीवा-प्रमेयांशं निरवशेषं समुद्धृत्य गोम्मटसार-पंचसंग्रहप्रपंचमारचयंस्तदादौ निर्विघ्नतः शास्त्रपरिसमाप्तिनिमित्तं नास्तिकतापरिहारार्थं शिष्टाचारपरिपालनार्थमुपकारस्मरणार्थं चेष्टविशिष्टदेवताविशेषं नमस्करोति ।

वृ० अन्तः—यत्र रत्नैस्त्रिभिर्लब्धार्हन्त्यपूज्या नरामरैः ।
निर्वान्तिमूलसंघोयं नन्द्यादाचन्द्रतारकम् ॥ ४ ॥

तत्र श्रीशारदागच्छो बलात्कारगणोन्वयः ।
कुन्दकुन्दमुनीन्द्रस्य नंद्याम्नायोपि नंदतु ॥ ५ ॥

यो गुणैर्गणभृद्गीतो भट्टारकशिरोमणिः ।
भक्त्या नवीमि तं भूयो गुरुं श्रीज्ञानभूषणम् ॥ ६ ॥

कर्णाटप्रायदेशेशजैनभूपादिभक्तितः ।
सिद्धान्तं पाठितो येन मुनिचन्द्रं नमामि तम् ॥ ७ ॥

योभ्यर्थ्य धर्मवृद्ध्यर्थं मह्यं सूरिपदं ददौ ।
भट्टारकशिरोरत्नं प्रभेन्दुः स नमस्यते ॥ ८ ॥

सूरेः श्रीधर्मचन्द्रस्याभयचन्द्रगणेशिनः ।
वर्णिलालादिभव्यानां कृते कर्णाटवृत्तितः ॥ ९ ॥

रचिता चित्रकूटे श्रीपार्श्वनाथालयेमुना ।
साधुसांगा-सहसाभ्यां प्रार्थितेन मुमुक्षुणा ॥ १० ॥

गोम्मटसारवृत्तिर्हि नन्द्याद् भव्यैः प्रवर्तिनी ।
शोधयन्त्वागमात् किंचिद्विरुद्धं चेद् बहुश्रुताः ॥ ११ ॥

निर्ग्रन्थाचार्यवर्येण त्रैविद्यचक्रवर्तिना ।
संशोध्याभयचंद्रेणालेखि प्रथमपुस्तकम् ॥ १२ ॥

इत्याचार्यश्रीनेमिचन्द्रकृतायां गोम्मटसारापरनामपंचसंग्रहवृत्तौ कर्मस्थितिरचना-स्वभावो नाम नवमोधिकारः समाप्तः ॥

वर्द्धतां जिनशासनम् ॥

[3638] वृ० अन्तः— जिनशासनसुरशिखरिणि चन्द्रकुलं नन्दनायते तत्र ।
खरतरगणेन सुगणेन कल्पतरुवितमभिमतार्थे ॥६॥

तस्मिन् प्रद्योतन इव सूरिरुद्द्योतनो गुणनिधानम् ।
पट्टक्रमेण जिनभद्रसूरिरष्टादशोथासीत् ॥७॥

तच्छिष्योजनि वाचकेषु विधुरो भानुप्रभः सुप्रभ-
श्चत्वारोन्तिषदो बभूवुरमलप्रज्ञाश्रयं तस्य तु ।
आद्यो वाचकसोमधीरपट्टधीः यो मन्त्रविद्याग्रणी-
रन्योभून्महिमाप्रलाभसहितः पुण्यश्रिया संहितः ॥८॥

सुगुणगणिषु तृतीयस्सरलमतिः कुशलसिंहनामा यः ।
विख्यातचन्द्रवर्द्धनगणिरप्यासीत् क्रमेण ततः ॥९॥

तेषां शिष्यत्रितयं समजनि जगतीतले विदितविद्यम् ।
श्रीमेघनन्दन–दयानन्दन–जयविजयनाम्नात्र ॥१०॥

श्रेष्ठश्रेष्ठिकुलोत्तंसाः वाचकाः मेघनन्दनाः ।
वृत्तिं जीवविचारस्याकार्षीद् रत्नस्तदन्तिषत् ॥११॥

वृत्तिं जीवविचारस्य कुर्वता यन्मयार्जितम् ।
पुण्यं तेनैष भव्यौघः शिवसौख्यमवाप्नुताम् ॥१२॥

नृपविक्रमवत्सरतः प्राण-कायेन्दुशरदि(१६१०)नभसि सोमे ।
कृष्णाष्टम्यश्विन्यां वृत्तिर्वल्लस्थितेन कृता ॥१३॥

राज्ये सलेमसाहेः सूरान्वयकमलबोधनखरांशोः ।
गणनायके विजयवति श्रीजिनमाणिक्यसूरिवरे ॥१४॥

प्राकृतवृत्तेः संस्कृतवृत्तिमकार्षं यथागमं शिष्यैः ।
अभ्यर्थितोऽलमिति पाठकरत्नाकरः सुगमम् ॥१५॥

इति जीवविचारवृत्तिः संपूर्णा ॥

[3641] आदिः— ध्यात्वा जैनं महः श्रीमत् सद्गुरुं प्रणिपत्य च ।
वृत्तिं जीवविचारस्य कुर्वे संक्षेपतः स्फुटाम् ॥१॥

संवद्व्योम–शिलीमुखाष्ट–वसुधासंख्ये (१८५०) नभस्ये सिते
पक्षे पावनसप्तमीसुदिवसे श्रीकादिनेराभिधे ।
दुंगे श्रीमति पूर्णतामभजद् व्याख्या सुबोधिन्यसौ
सम्यक् श्रीजिनचन्द्रसूरिमुनिपे गच्छेशतां बिभ्रति ॥२॥

श्रीमन्तो जिनभक्तिसूरिगुरवश्चान्द्रे कुले जज्ञिरे
तच्छिष्या जिनलाभसूरिमुनिपाः श्रीप्रीतितः सागराः ।
तच्छिष्याऽमृतधर्मवाचकवरास्तेषां विनेयः क्षमा-
कल्याणः स्वपरोपकारविषयेकार्षीदिमां वृत्तिकाम् ॥३॥

इति श्रीजीवविचारप्रकरणवृत्तिः सद्भिर्वाच्यमाना चिरं नन्दतात् ॥

सं० १८९३ मिती पोह सुदि ५ ॥ सांवसुखा सुजाणमलजीपठनार्थम् ॥

[3650] अन्तः— इति श्रीजीवविचारप्रकरणं समाप्तम् ॥

संवत् १७१७ वर्षे भाद्रवावदि ११ गुरुवासरे लिखितोऽयम् ॥ तपागच्छे भट्टार[क]श्रीविजयराजसूरीश्वरराज्ये पण्डितोत्तमपण्डित-श्री५श्रीतेजविजयगणि-तत्शिष्यपण्डितश्री३श्रीधीमविजयगणिशिष्य...विजयलिखितं परोपका[का]राय । श्राविका सांपापठनार्थमिति श्रेयः ॥छ॥

[3652] अन्तः—(पुरातन'चोपडा' इत्याख्यप्रतौ पश्चात्काले लिखितमिदम्-)

अमेचन्दे दोकड १ पोताना आपीने लीधुं छे, भरुअचमधे श्रीपरभु मुनीसुवरतः ॐ नमो नमः वीसमो तीर्थंकर जगतअंतदरमो(?) ।

[3675] मू०अन्तः— सिरिजिणहंससुणीसररज्जे सिरिधवलचन्दसीसेण ।
गजसारेण लिहिया एसा विन्नत्ति अप्पहिया ॥३९॥

वृ०अन्तः—श्रीजिनहंससूरिनामानो ये श्रीजिनसमुद्रसूरिपट्टप्रतिष्ठिता मुनीश्वराः खरतरगच्छाधिपतयस्तेषां राज्यं गच्छाधिपत्यलक्षणं तस्मिन् विजयानि सैद्धांतिकशिरोमणीनां श्रीधवलचन्द्रगणिनां शिष्येण संविग्नपण्डिताऽभयोदयगणिलालितपालितेन गजसारगणिनाम्ना साधुना एषा विचारषट्त्रिंशिकारूपा श्रीतीर्थकृतां विज्ञप्ति-लिखितेतिपदेनौद्धत्यं परिहृत्य यद्वा पूर्वं यन्त्रपत्रतया लिखिता ततः सुगमतायै सूत्रतया गुम्फिता इत्यर्थः । किंभूता ? आत्महिता अनेन ।

भवति हि धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् ।
ब्रुवतोऽनुग्रहबुद्ध्या वक्तुस्त्वेकांततो भवति ॥१॥

इति सूक्तं स्थापितम् ॥

निधि-मुनि-शरेन्दु(१५७९)संवल्लिपीकृता पत्तने च चूर्णिरियम् ।
संशोध्या धीमद्भिर्मत्वेदं बालचापल्यम् ॥१॥

इति श्रीविचारषट्त्रिंशकाचूर्णिः संपूर्णा ॥

सं० १८९७ मिती माघवदि १० रविवासरे श्रीविक्रमपुरमध्ये लिखितं पं०वुलीचन्द सांवसुखा सुजाणमलजीस्वपठनहेतवे ।

[3684] स्त०अन्तः—विज्ञगीतयशःस्तोमयशस्सोमगुरोः शिशुः ।
भाषायां लिखिता ह्येषा टवार्थदण्डकस्तुतिः ॥

संवत् १८५६ वर्षे ज्येष्ठसुद ७ दिने पं०श्री५पं०हेमविजयग० तत्शीषमुनि-लालविजय लपीकृत्यं जामपुरे सीतलनाथप्रसादे ।

[3688] अन्तः— इति श्रीचउवीसदंडकसूत्रं संपूर्णम् ॥

संव[त्] १७२० वर्षे माघमासे कृ[ष्ण]पक्षे १० गुरौ श्रीअंचलगच्छे वाचकोत्तमवा० श्री५श्रीज्ञानशेखरगणि-तत्शिष्यमुनिश्रीवाक्लिखितं शुभं भूयात् । श्रीरताडीआग्रामे श्रीगोडीपार्श्वनाथप्रसादतः ।

(अन्यदीयहस्तेन लिखितम्)–

लि० श्र०मालजीइ बाकी ए परत लखवा राखी ती तो वणीने पाछी आपी छे । हवे कांइ मागता नथी परत ।

[3692] स्त०अन्तः—श्रीजिनहंससूरि मुनिसर तेहनइं राज्यइं श्रीश्रीधवलचन्द्रमहोपाध्यायना शिष्य गजसागरगणिए चउवीस तीर्थंकरनी वीनती आत्महेतु लिखी इति श्रीचिन्तारछत्रीसी नामइं श्रीतीर्थंकरनी वीनती संपूर्णः ॥

संवत् १८७३ अषाड सुदि १० वारगुरुश्रीसुरतबिंदरमध्ये श्रीसुपासजीना प्रसाद थकी ळीपी करी छे । श्लोकसंख्या १७५ ॥

पण्डितश्रीपं० भाग्यहंसगणिसेव[क]कृपलिपीकृतम् श्रीरांदेरबींदरमद्धे वीसाफलीआमद्धे तपागच्छे अप्यासरो छे । श्रीमनमोहनपार्श्वनाथप्रसादात् हरीपरा परामद्धे ॥

[3695] अन्तः— संवत् १८५७ वर्षे आसु वद ५ दने वार भौमे लषितं । मुनि प्राणचन्द मु०गुणचन्दजीपठनार्थं श्रीराजनगरे ॥ हाजापटेलनी पोलमध्ये श्रीशांतिनाथप्रसादात् श्रीचन्द्रप्रभुप्रसादात् श्रीअञ्चलगच्छे चोमासो कृतं सर्वैः ।.

[3701] स्तःअन्तः—संवत् १७८८ वर्षे ज्येष्ठसुदी २ दिने लषीतं राजनगरमध्ये । बाईसुषरबाईपठनार्थम् ।

सकलपंडितशिरोरत्नपंडितश्रीश्री ११ श्रीश्रीजिनचन्द्रगणिपंडितश्री५श्रीतेजचन्द्रगणि-शिष्यपंडितश्री५श्रीजीवणचन्द्रगणि-सतीर्थपंडितश्रीश्रीश्रीवृजनचंद्रगणिशिष्यपं०दोलतचन्दलखीतं(लिखितम्) ।

[3740] अन्तः— इति श्रीसिद्धपंचाशिकाटबार्थः कृतो लिखितश्च पंडितश्रीलालकुशलगणिभिः ।

सिद्धः पंचाशिकार्थोयं स्तंभतीर्थपुरे वरे ।
लालादिकुशलेनायः कलसः संघे श्रियं क्रियेत् ॥

इति टबो ग्रन्थ २४१ छइ ॥

संवत् १६४४ वर्षे मार्गशीर सुदि पूर्णमासीतिथौ वारगुरुदिने लखितम् ।

[3743] अन्तः— संवत १९२१ ना वर्षे चेत्रसुद ४ द्रने लष्यं लखावितम् गर[णी]जी जीवसरीजी तथा नवलसरीजी तथा खुशालसरीजी लषीतं पेमचन्द लष्युं छें. राजनगरमध्ये लष्युं, चोकटे लषु छे । अघोवा(या)ना डेला० ।